आचार्य दण्डी



# काव्यादर्शः

(अनेक टीकाओं सहित)

• रत्नश्री • हृदयङ्गमा
• प्रभा • विवृति

प्रो० योगेश्वरदत्तशर्मा (पाराशरः)




नाग पब्लिशर्स

आचार्य दण्डी

# काव्यादर्श


(अनेक टीकाओं सहित)

- रत्नश्री
- हृदयङ्गमा
- प्रभा
- विवृति

प्रो० योगेश्वरदत्तशर्मा (पाराशरः)




नाग प्रकाशक



# आचार्य दण्डी-काव्यादर्श

( अनेक टीकाओं सहित )



## द्वितीय खण्ड




१ रत्नश्री  २. हृदयङ्गमा

३. प्रभा  ४. विवृति

सम्पादक:

प्रो० योगेश्वरदत्तशर्मा ( पाराशरः )
हिन्दू कालेज, दिल्ली विश्वविद्यालय
दिल्ली-११०००७




नाग पब्लिशर्स
११ए/यू० ए०, जवाहर नगर, दिल्ली-११०००७
( भारत )

This Publication has been brought out with the financial assistance from Rashtriya Sanskrit Sansthan, New Delhi.



नाग पब्लिशर्स

(१) ११ए/यू. ए. जवाहर नगर, दिल्ली-११०००७


(२) जलालपुर माफी (चुनार-मिर्जापुर) उ० प्र०

दूरभाष-2915883, 3967975, 3957440

ISBN :81-7081-500-2 (Set)

ISBN : 81-7081-502-9 (Vol II)

प्रथम संस्करण : १९९९






मूल्य : 400/-

श्री सुरेन्द्र प्रताप द्वारा नाग पब्लिशर्स ११ ए०/यू० ए०, जवाहर नगर, दिल्ली ११०००७ द्वारा प्रकाशित तथा जी. आफसैट प्रिंटर्स, ३०८/२ शहजादा बाग, दयाबस्ती दिल्ली ११००३५ द्वारा मुद्रित। अक्षरयोजक ए० आर० प्रिंटर्स, डी-१०२ न्यू सीलमपुर, दिल्ली-११००५३



# विषयानुक्रमणिका

## द्वितीय खण्ड

विषयः पत्राङ्कः

### द्वितीये परिच्छेदे

**विषयः** **पत्राङ्कः**

# द्वितीयः परिच्छेदः।

वैशिष्ट्यमस्मिन् किमपीक्षमाणैः
सद्भिः समेत्य क्रियतां प्रयत्नः।
इति प्रयुक्तः प्रयते नियोगं
तमेक आख्यातुमशक्तरूपः॥

तदेवं मार्गविभागं [परिच्छिद्य संप्रत्यर्थ]लङ्कारं सर्वमार्गसाधारणं शासितुमुपक्रमते–

**काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते।**
**ते चाद्यापि विकल्प्यन्ते कस्तान् कार्त्स्न्येन वक्ष्यति॥१॥**

---

## रत्नश्री

काव्यस्य पद्यगद्यमिश्रात्मकस्य यथोक्तस्य शोभां सौन्दर्यं कुर्वन्ति ये धर्मा गुणास्तान्। अनुवादोऽयम्। अलङ्कारान् प्रचक्षते कथयन्ति। तद्विद इति विधिः। ये केचित् काव्यशोभाकरा विशेषास्ते अलङ्कारा विज्ञेया इति यावत्। अलंक्रियते शोभां नीयते काव्यमेभिः शरीरनिष्ठहारादिभिरित्यलङ्काराः। एवंलक्षणा अलङ्काराः, कियन्तस्त इत्याह–ते चेत्यादि। ते चालङ्काराः किमपि दीर्घं कालमारभ्याद्यापि इदानीं यावद्विकल्प्यन्ते प्रभिद्यन्ते,

अभियुक्तैरयमयमिति प्रतिपुरुषमपरापरोक्तिविशेषानिवृत्तेः, न त्वियत्ता लभ्यते। ततश्च तानेवमनन्तालङ्कारान् कात्स्न्र्येन लक्षितान् कृत्स्नान् को नाम पुरुषोऽर्वाग्दर्शी इदानीन्तनदर्शी वक्ष्यति वक्तुं शक्नुयात्। नैव निरवशेषमभिधातुमीदृशः कश्चिदीष्ट इत्यर्थः।।

यद्येवमानन्त्यात् कात्स्न्र्येन वक्तुं न शक्यन्ते, किमिदानीं क्रियतामित्याह-

## हृदयङ्गमा

काव्यनिरूपणानन्तरं तदुत्कर्षजनकधर्म्मान् अलङ्कारान् निरूपयितुं यतमानः परिच्छेदेऽस्मिन् तत्तद्विशेषालङ्कारान् निरूपयिष्यन् प्रथमं तेषां सामान्यलक्षणं निरूपयति, काव्यशोभाकरानिति।-काव्यस्य "शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली" इत्युक्तलक्षणस्य काव्यशरीरस्येत्यर्थः, शोभा सौन्दर्य्यं, तत्तद्विशेषकृतचमत्कारजनकवैचित्र्यामित्यर्थः, तत्करान् तत्साधनानि, धर्मान् शब्दार्थगताननुप्रासोपमादीन्, अलङ्कारान् प्रचक्षते वदन्ति, कवय इति शेषः, यथा हारकुण्डलादयः शरीरशोभासम्पादनात् अलङ्कारपदवाच्याः, तथा अनुप्रासोपमादयः काव्यशरीरभूतयोः शब्दार्थयोरुत्कर्षजननादलङ्कारा इति भावः। [अत्रैवं विवेकः,-काव्यस्य शब्दार्थस्वरूपेणोक्तत्वात् तच्छोभासम्पादक-धर्म्मा अलङ्काराः पुनः शरीरभूतशब्दार्थनिष्ठा एवेति निश्चीयते। ननु गुणानामपि उपक्रमोपसंहारलिङ्गैराचार्य्यतात्पर्य्यपर्य्यालोचनायां शब्दार्थनिष्ठत्वेनालङ्कारैरभेदापत्तिरिति चेन्न, काव्यशोभाकरपदस्य शोभातिशयहेतुत्वे विवक्षणीयत्वात् तद्दोषपरिहारः, तथा हि कैवल्येन शब्दार्थशोभाकरा गुणाः, गुणसाहचर्य्याभावेन शब्दार्थशोभातिशयहेतवश्चालङ्कारा इति प्राचीनोक्त एवानयोर्भेदः

मन्तव्यः। उक्तञ्च वामनेन,–"काव्यशोभायाः कर्त्तारो धर्म्मा गुणाः" (का० सू० वृ० ३अधि० १अ० १सू०) "तदतिशयहेतवस्त्वलङ्काराः" (का० सू० वृ० ३अधि० १अ० २सू०) इति। नव्यास्तु "काव्यस्य शब्दार्थौ शरीरं रसादिश्चात्मा गुणाः शौर्य्यादिवत् दोषाः काणत्वादिवत् रीतयोऽवयवसंस्थानविशेषवत्, अलङ्काराः कटककुण्डलादिवत्" एवं प्रमाणोकुर्वाणाः गुणालङ्कारयोर्भेदं कल्पयन्ति; तथा हि काव्यात्मभूतस्य रसस्यैव धर्म्माः माधुर्य्यौजःप्रसादास्त्रय एव गुणशब्दवाच्याः अलङ्काराश्च शब्दार्थशोभाजननेन रसस्योत्कर्षकाः इति गुणानां रसाश्रयत्वेनालङ्काराणां शब्दार्थाश्रयत्वेन च पृथगाश्रयत्वादनयोः भेदः। गुणत्वादोजःप्रभृतीनामात्मनि समवायवृत्त्या स्थितिः, अलङ्कारत्वादनुप्रासोपमादीनां शरीरे संयोगवृत्त्या स्थितिरिति तेषामाशयः। नैतत् युक्तमुत्पश्यामः, नव्यानां मते गुणानां रसधर्म्मत्वात् शब्दार्थगतत्वव्यवस्थायाः असम्भवात् प्रोक्तलक्षणात्मकमाधुर्य्यादीनां रसत्वाङ्गीकारेणैव सिद्धे गुणत्वाङ्गीकारवैफल्यात्, तादृशगुणानां रसाव्यभिचारित्वाच्च, तथा नीरसेऽपि बहुलालङ्कारिकैः काव्यत्वेनाङ्गीकृते संलक्ष्यक्रमव्यङ्ग्यप्रभेदे चित्रे अलङ्कारलक्षणायोगात् इति। किञ्च काव्यस्य रसश्चात्मा इति यदुच्यते, तत्र किं गुणसमष्टिविशिष्टं काव्यम्? तद्व्याष्टिविशिष्टं वा? नाद्यः, एकैकगुणोदाहरणेषु काव्यत्वाभावप्रसङ्गात्, नापि द्वितीयः, वस्त्वलङ्कारध्वनिषु रसाभावादेव गुणस्यैवाभावात्। किञ्च किं रसाः सर्वे सम्भूय काव्यात्मीभवन्ति उत एको रसः? तत्र प्रथमपक्षे न कुत्रापि काव्यात्मसम्भावना, विरोधिरसानामेकाधिकरणत्वासम्भवात्, द्वितीये वस्त्वलङ्कारध्वनिषु रसाभावात् काव्यव्यवहाराभावप्रसङ्गः।

अतः प्राचां मतमेव प्रागुक्तमस्माभिः सादरमाश्रीयते; उक्तञ्च,–"यदि भवति वचश्चातं गुणेभ्यः वपुरिव यौवनबन्ध्यमङ्गनायाः। अपि जनदयितानि दुर्भगत्वं नियतमलङ्करणानि संश्रयन्ते।।" इति]। विवक्षितव्येषु अलङ्काराणां विशेषलक्षणेषु स्वकीयायोग्यताप्रकाशपुरः सरमौद्धत्यं परिहरति, ते चेति।–ते च अलङ्काराः, अद्यापि विकल्पान्ते विविधरूपेण उद्भाव्यन्ते, भङ्ग्या किञ्चिद्वैचित्र्यं प्रतिपाद्य विस्तार्य्यन्ते इत्यर्थः, नवीनैः कविभिरिति शेषः, अतः कः पण्डितः, तान् कार्त्स्न्येन साकल्येन, वक्ष्यति निरूपयिष्यति? न कोऽपि निरूपयितुं शक्ष्यतीत्यर्थः, उक्तिवैचित्र्यस्यैवालङ्कारत्वात् तस्य च कल्पनैकमूलत्वात् कल्पनायाश्च कदाऽप्यविरामात् साकल्येन तन्निरूपणं नैव सम्भवति इति भावः।।१।।

## प्रभा

प्रथमपरिच्छेद वैदर्भगौडमार्गोपलक्षितं धर्मिभूतं काव्यशरीरं प्रदर्श्य इदानीं तर्द्धमानलंकारान् दिदर्शयिषुरलंकार-सामान्यलक्षणमाह– **काव्यशोभाकरानिति।** काव्यस्य इष्टार्थव्यवच्छिन्ना पदावलिः इत्युक्तस्वरूपस्य शोभा मनोहरता तस्याः कर्तारः तत्संपादकास्तान्। धर्मान् अनुप्रासोपमादीन्। अलंकारान् प्रचक्षते अलंकारनाम्ना व्यवहरन्ति। प्राञ्चः साहित्यकोविदा इति शेषः। यथा लावण्यमनोहरस्य शरीरस्य हारादयो अलंकाराः शोभातिशयं जनयन्ति तथा श्लेषप्रसादादिगुणोपस्कृतस्य इष्टार्थव्यवच्छिन्नपदावलिरूपस्य रमणीयार्थप्रतिपादकस्य काव्यस्य अनुप्रासोपमादयोलंकाराः शोभां परिवर्धयन्ति। अनेन एते अलंकाराः शब्दार्थगता इति

आचार्यदण्डिनो मतमवगन्तव्यम्। भरतेनापि–काव्यस्यैते ह्यलंकाराश्चत्वारः परिकीर्तिताः। (१६.४१) इत्यनेन ते काव्यधर्मत्वेनैव स्वीकृताः सन्ति। भामहोपि–इति वाचामलंकाराः पञ्चैवान्यैरुदाहृताः। (३.४) इत्युपक्रमे– गिरामलंकारविधिः सविस्तरं स्वयं विनिश्चित्य धिया मयोदितः। (३.५७) इति तृतीयपरिच्छेदोपसंहारे कथयन् शब्दार्थगतत्वमेव तेषां दर्शयति। वामनादयोपि इमामेव पद्धतिमनुसरन्ति। तदुक्तं वामनेन–काव्यशोभायाः कर्तारो धर्मा गुणाः। तदतिशयहेतवस्त्वलंकाराः। (३.१.१-२) इति। अत्र च प्रमाणत्वेन प्राचीनश्लोकावपि अवतारयति–

युवतेरिव रूपमङ्ग काव्यं स्वदते शुद्धगुणं तदप्यतीव।
विहितप्रणयं निरन्तराभिः सदलंकारविकल्पकल्पनाभिः।।

यदि भवति वचश्च्युतं गुणेभ्यो वपुरिव यौवनवन्ध्यमङ्गनायाः।
अपि जनदयितानि दुर्भगत्वं नियतमलंकरणानि संश्रयन्ते।।

इति।

अत्र पूर्वश्लोकेनालंकाराणां सगुणकाव्यस्य शोभाकरत्वं दर्शितम्। द्वितीयेन तु गुणाभावेलंकाराणां वैयर्थ्यं प्रोक्तम्। तत्र काव्यशोभासंपादने गुण नित्या अलंकारास्त्वनित्या इति अग्रिमेण पूर्वे नित्याः (३.१.३) इति सूत्रेण अभिहितम्। अयमेव च गुणालंकारयोः प्रभेदः। यद्गुणा नित्यास्तैर्विना काव्यशोभानुपपपत्तेः। आचार्यदण्डिना हि गुणा वैदर्भमार्गस्य प्राणत्वेन कथिताः। वामनेन ते नित्या इत्यनेन स एवार्थः पर्यायेणाभिहितः। रीतिरात्मा काव्यस्य इति काव्ये रीतेः प्राधान्यस्वीकारेपि तस्या गुणसमुदायाभिन्नस्वरूपत्वात् गुणाधीनत्वं स्पष्टमेव। एवं च प्राणा

दशगुणाः स्मृता इति आचार्यदण्डिनः सिद्धान्तस्य रीतिरात्मा काव्यस्य इति सूत्रयता वामनेन भङ्ग्यन्तरेण स्वीकारो दर्शितः। एवं भरतभामहवामनप्रभृतीनां गुणालंकारविषय ऐकमत्यमेव दृश्यते। प्रकाशकारादयस्त्ववर्वाचीना माधुर्यौजः प्रसादाख्यान् गुणान् रसस्याङ्गभूतान् अलंकाराश्च शब्दार्थयोरङ्गभूतान् कल्पयन्ति। तदुक्तं प्रकाशे–

ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः।
उत्कर्षहेतवस्ते स्यु रचलस्थितयो गुणाः।।
उपकुर्वन्ति तं सन्तं येङ्गद्वारेण जातु चित्।
हारादिवदलंकारास्तेनुप्रासोपमादयः।।
माधुर्यौजः प्रसादाख्यास्त्रयस्ते न पुनर्दश। (८.६६-६७) इति।

प्रतिपादितं च माधुर्यौजः प्रसादाख्या रसस्य गुणाः। हारादिवद् वाच्यवाचकलक्षणाङ्गगताः स्वाश्रयशोभाजनद्वारा अङ्गिनो रसस्य शोभाजनका अलंकारा इति। आश्रयभेदाच्च गुणालंकारयोर्भेदः इति। ओजस्वी प्रबन्धः मधुरा वर्णा इत्यादिव्यवहारस्तु आकारोस्य शूर इतिवद् औपचारिकः।। तत्र तावद्विचार्यते। मधुरो रस इति सामानाधिकरण्याद् अनुभवसिद्धानां रसस्वरूपविशेषकाणां माधुर्यादीनां गुणत्वस्वीकारे यदिदं साहित्यग्रन्थकाराणां काव्ये तादृशगुणनिवेशावश्यकत्वकथनं तद् विफलं स्यात्। रसवत् काव्यमित्येतावतैव लक्षणेन रसनिवेशे रसस्वरूपविशेषाणां माधुर्यादीनां निवेशस्यापि नियतत्वात्। यतस्तन्मते माधुर्यौजः प्रसादाख्या गुणा रसव्यभिचारिणो न कुत्रचिदुपलभ्यन्ते। अथ गुणाभिव्यञ्जकशब्दार्थप्रयोगाय लक्षणे गुणग्रहणमिति चेत् तादृशव्यञ्जकताया एव गुणत्वमुचितम्। सौन्दर्यादेरात्मोत्कर्षत्ववत्

तस्या एव रसोत्कर्षत्वात्। उत्कर्षकस्यैव गुणत्वात्। सा च व्यञ्जकता श्लेषादिधर्मस्वरूपा एव। अतः सिद्धं श्लेषादीनां गुणत्वं शब्दार्थगतत्वं च। तथैव स्वाश्रयशोभाजननद्वारा रसशोभाजननत्वमलंकाराणामित्यपि न विचारक्षमं तेषां वचः। यतो नीरसे सकलालंकारिकैः काव्यतया स्वीकृते संलक्ष्यक्रम-व्यङ्ग्यप्रभेदे चित्रे चोपमादीनामनलंकारतापत्तेः। स्वीकृतं हि तत्र तैरुपमादीनामलंकारत्वम्। तथाहि–

वस्तु वालंकृतिर्वेति षड्भेदोसौ व्यनक्ति यत्।
वस्त्वलंकारमथवा तेनासौ [व्यञ्जकः] द्वादशात्मकः।।
(का. प्र. ४.४०)

तथा–शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्। इत्यस्य व्याख्याने चित्रमिति गुणालंकारयुक्तम् इति। (१.५) अष्टमोल्लासेपि यत्र तु नास्ति रसस्तत्रोक्तिवैचित्र्यमात्रपर्यवसायिन इत्यादिना प्रबन्धेन तेनैव कथितमस्ति। ननु रसोपकारयोग्यत्वमलंकार इति तल्लक्षणमस्तु। तेन नीरसस्थले नाव्याप्तिरिति चेन्न। योग्यताया निर्वचनस्याशक्यत्वात् तादृशानुगमकधर्मेण लक्षणविधानस्यायुक्तत्वात्। जगन्नाथेनापि गुणानां शब्दार्थरसरचनागतत्वं स्वीकृत्य केवलरसधर्मत्वं खण्डितम्। तद्यथा–येमी माधुर्यौजःप्रसादा रसमात्रधर्मतया उक्तास्तेषां रसधर्मत्वे किं मानम्। प्रत्यक्षमेवोति चेन्न। दाहादेः कार्याद् अनलगतस्य उष्णस्पर्शस्य यथा भिन्नतयानुभवस्तथा द्रुत्यादिचित्तवृत्तिभ्यः रसकार्येभ्यः अन्येषां रसगतगुणानां अननुभवात्। तादृशगुणविशिष्टरसानां द्रुत्यादिकारणत्वात्। कारणतावच्छेदकतया गुणानामनुमानमिति चेत् प्रातिस्विकरूपेणैव रसानां कारणतोपपत्तौ

गुणकल्पने गौरवात्। शृङ्गारकरुणशान्तानां माधुर्यत्वेन द्रुतिकारणत्वं प्रातिस्विकरूपेण कारणत्वकल्पनापेक्षया लघुभूतमिति तु न वाच्यम्। परेण मधुरतरादिगुणानां पृथग्द्रुततरादिकार्यतारतम्य-प्रयोजकतयाभ्युपगमेन माधुर्यत्वेन कारणताया गडुभूतत्वात्। इत्थं च प्रातिस्विकरूपेणैव कारणत्वे लाघवम्। किं चात्मनो निर्गुणतया आत्मरूपरसगुणत्वं माधुर्यादीनामनुपपन्नम्। एवं तदुपाधिरत्यादिगुणत्वमपि। मानाभावात्। पररीत्या गुणे गुणान्तरस्यानौचित्याच्च। अथ शृङ्गारो मधुर इत्यादिव्यवहारः कथमिति चेद् एवं तर्हि द्रुत्यादिचित्तवृत्तिप्रयोजकत्वं प्रयोजकतासंबन्धेन द्रुत्यादिकमेव वा माधुर्यमस्तु। व्यवहारस्तु वाजिगन्धोष्णेतिव्यवहारवद् अक्षतः। प्रयोजकत्वं चादृष्टादिविलक्षणं शब्दार्थरसरचनागतमेव ग्राह्यम्। अतो न व्यवहारातिप्रसक्तिः। तथा च शब्दार्थयोरपि माधुर्यादेरीदृशस्य सत्त्वादुपचारो नैव कल्प्य इति तु मादृशा इति।। (५४-५५ पत्रयोः) रहस्यं तु एतदेव यद् गुणानां रसधर्मत्वं न विचारक्षमम्। ते शब्दार्थरसरचनागता एवेति ज्ञेयम्। आचार्यदण्डिप्रभृतयः प्राचीना रसानां रसवदलंकारत्वेनैव काव्यशोभाकरत्वं मन्यन्ते। तथा च गुणे गुणान्तरस्यानौचित्यान्न माधुर्यादयो गुणा रसानामिति तेषां राद्धान्तः। अस्त्वेषा सूक्ष्मविचारचर्चा। प्रकृतमनुसरामः। अलंकाराणां एवं काव्याशोभाकरधर्मरूपं सामान्यलक्षणमभिधाय वक्तव्यानां विशिष्टालंकाराणामानन्त्यं विचिन्त्य तद्विवेचने स्वस्यासामर्थ्यं विनयेन प्रकटयति–**ते चेति**। ते अलंकाराः। अद्यापि विकल्प्यन्ते विविथकल्पनाभिर्नवनवा उद्भाव्यन्ते। कविभिरिति शेषः अतः कः पण्डितः तान् अलंकारान्। कार्त्स्न्येन साकल्येन। वक्ष्यति निरूपयिष्यति। न कोपि विवेक्तुं प्रभविष्यतीत्यर्थः। वक्ष्यतीति

भविष्यत्प्रयोगेण न पूर्वं केनापि निरूपिता नाधुनापि कश्चिन्निरूपयति न वाग्रे केपि निरूपयेयुरिति साकल्येन कालत्रयेपि ते निरूपयितुमशक्या इति सूचितम्। मेधाविनां कल्पनाया अविरामात् कल्पनोपजीविनोलंकारस्याप्यविरामः। अत इयत्तया तेषां निरूपणं दुःशकमिति भावः।।१।।

## विवृति

तदेवं श्लेषप्रसादादिशब्दालङ्काररूपं मार्गभावा (विभाग) निरूपणद्वारेणाभिधाय साधारणमुभयमार्गव्यापकं (स्वभावाख्याना) दिभाविकपर्यन्तममुना द्वितीयपरिच्छेदेनोच्यते।

तत्रालङ्कारान् प्रचक्षते इत्यनेनास्य प्रकरणस्य शब्दभागरूपस्यालङ्काराभिधेयत्वप्रतिपा (दनानान्निरभि)ध(धे) यत्वाशङ्कामपाकरोति। तथा काव्यशोभाकरान् धर्मानित्यनेनाभिधेय-प्रयोजनप्रतिपादनात् काकदन्तपरीक्षावद- प्रयोजनत्वा(शङ्कामभिधे) यत्वं (स्य) निराकरोति; यतश्शब्दार्थौ सहितौ काव्यम्। तत्र शब्दः काव्यशरीरम्। तत् त्रिविधं चतुर्विधं चाख्यातम्। यदुक्तं 'तैः शरीरं च काव्यानामलङ्काराश्च दर्शिताः' इति। शब्दशरीराभिधानादेवार्थो ऽप्यभिधेयः प्रदर्शित एव। इदानीं काव्यशरीरानन्तरं अलङ्कारानाह। काव्यशोभाकरान् धर्मानित्यादिनाऽलङ्कारसामान्यलक्षणमुक्तम्। अलङ्कारानिति लक्ष्यनिर्देशः। प्रचक्षते मेधाविरुद्रभामहादयः। तेचालङ्कारा अद्यापि नि(विकल्प्यं)ते। यद्यपि काव्यशोभाकराः धर्मा अलङ्कारा इत्युक्तम्; तथा ऽपि नैतावताऽलङ्कारसाधारणलक्षणमात्रकथनादेव ज्ञातुं पार्यन्ते। किं त्वद्यापि (उत्प्रेक्ष्य निरूप्यन्ते) लक्षणोदाहरणप्रदर्शनेन कतिचित्। यः तस्मात् (कस्तान्) (कात्स्न्र्येन) वक्ष्यति। तेषां

(विकल्प्यमाना) नामा (नन्त्यात् कात्स्र्न्येन कथनमशक्यमिति)।

काव्यशरीरं मार्गभेदेन द्विधा विभक्तं दर्शितम्। इदानीं तद्धर्मान् अलङ्कारान् दर्शयितुं अलङ्कारसामान्यलक्षणमाह–**काव्येति।** काव्यशोभाकरा ये धर्माः ते अलङ्काराः। ते च अद्यापि विकल्प्यन्ते, तत्तदलङ्कारावान्तरभेदा बहवः कविभिः प्रयुज्यन्ते; न पर्यवसिताः।

पूर्वस्मिन् परिच्छेदे वैदर्भगौडमार्गविभागार्थं काव्यशरीर-प्रदर्शनार्थं च असाधारणधर्माः केचिदलङ्कारा उक्ताः ; इदानीं शब्दरचनालक्षणतः प्रतिष्ठापितस्य काव्यशरीरस्य साधारणा ये अलङ्काराः ते अस्मिन् परिच्छेदे वक्ष्यन्ते; इत्यत्रानयोस्सम्बन्धः। वक्ष्यमाणस्य अलङ्कारस्य प्रथमं लक्षणप्रतिज्ञा क्रियते–**काव्येति।** अलङ्कारो नाम भूषणम्। यथा भूषणं अङ्गस्य शोभायै भवति, तथा काव्यशरीरस्य शोभां जनयतो घर्मान् अलङ्कारान् आमनन्ति। ते धर्माः अद्यापि विदुषां शेमुषीविशेषात् बहुधा विकल्प्यन्ते। अतः तान् साकल्येन अभिधातुं कः समर्थः? न कोऽपि इति भावः। अपरे तु अलङ्कारलक्षणम् एवमाहुः–

**'चतुर्णामपि पादानामादौ मध्येऽन्त एव वा।**
**स्थितिरेकपदस्यैव तदलङ्कारलक्षणम्॥'** इति॥१॥

---

**किं तु बीजं विकल्पानां पूर्वाचार्यैः प्रदर्शितम्।**
**तदेव प्रतिसंस्कर्तुमयमस्मत्परिश्रमः॥२॥**

## रत्नश्री

किं त्वपि त्वित्यर्थान्तरविवक्षायां तदाह–बीजमित्यादि। विकल्पानामलङ्कारप्रभेदानां जात्युपमारूपकादीनां बीजं प्रतिनियतं सकलव्यक्तिव्यापि सामान्यं रूपम्। यतः प्रभेदा विविधास्तदनुसृताः प्रवर्तन्ते। पूर्वाचार्यैश्चिरन्तनैः काव्यलक्षणकारैः मेधाविश्यामवादि- [प्रभृति]भिः प्रदर्शितम् निर्दिष्टं यत्तदेव नान्यत्। प्रतिसंस्कर्तुं संक्षेपेण परिस्फुटं यथावदभिधातुमयं प्रकृतः अस्माकं परिश्रमो यत्नो वर्तते नतु सर्वमलङ्कारमभिधातुम्। आनन्त्यादशक्तेश्च। किं तु परिमिताः केचिदलङ्काराः पूर्वाचार्योपदिष्टाः प्रतिसंस्क्रियन्ते। तथा च वक्ष्यति–

पन्थाः स एष विवृतः परिमाणवृत्या
संक्षिप्यविस्तरमनन्तमलंक्रियाणाम् [२.२६७] इत्यादि॥

पूर्वं श्लेषादयः शब्दालङ्कारा मार्गनियताः कथिताः। इदानीं सर्वमार्गसाधारणा अलंकारा उच्यन्त इति दर्शयन्नाह–

## हृदयङ्गमा

यदि कार्त्स्न्येन वक्तुमशक्या अलङ्कारविशेषास्तदा भवता किं न निरूपणीया? इत्याशङ्कामपनेतुमाह, किन्त्विति।–किन्तु विकल्पानां विविधकल्पनानां, नवीनप्रोक्तालङ्कारभेदानामित्यर्थः, वीजं मूलं, 'सादृश्यम् उपमा' इत्यादिसामान्यलक्षणरूपमित्यर्थः,

पूर्वाचार्य्यैः प्रदर्शितं निरूपितं, यत् उपजीव्य नव्यानां वैचित्राभेदेन नाना कल्पना इति भावः ; तदेव पूर्वाचार्य्यप्रदर्शितवीजीभूतम् अलङ्कारलक्षणमेव इत्यर्थः, परिसंस्कर्त्तुं सम्यक् स्फुटीकर्त्तुम्, अयम् अस्माकं परिश्रमः प्रयासः।।२।।

## प्रभा

अलंकाराणामानन्त्याद् भवता तद्वर्णनं परित्याज्यमिति चेन्न। ते प्राचीनैर्बीजरूपेण निरूपिता एव स्फुटतया मया कथ्यन्ते इति निवेदयति–**किंत्विति।** विकल्पानां अर्वाचीनैः कल्पितानां अलंकारविशेषाणाम्। पूर्वाचार्यैः भरतादिभिः। बीजं सामान्यतः सर्वत्र वर्तमानं मूलम्। प्रदर्शितम् कथितम् यथा नवीनैरुद्भावितानां उपमाभेदानां बीजं–उपमा नाम सा ज्ञेया गुणाकृतिसमाश्रया। (१६४२) इत्येव केवलं उपमालक्षणं विदधता भरतेन कथितम्। अग्रे दर्शितास्तु वाक्यार्थोपमा सातिशयोपमा श्लेषोपमा निन्दोपमा अभूतोपमा विपर्ययोपमा संशयोपमा नियमोपमा मालोपमा विक्रियोपमा इत्यादयः प्रभेदा अन्यैः कल्पिताः सन्ति। अत्र सर्वत्र बीजभूतमौपम्यं वर्तत एव। अयमुपमालंकारप्रपञ्चौ दर्शितः। एवं रूपकादिष्वपि प्रपञ्चो द्रष्टव्यः। एवमेव औपम्यमूलकोलंकारान्तरविस्तारोपि दृश्यते। तदुक्तं वामनेन–प्रतिवस्तुप्रभृतिरुपमाप्रपञ्च इति। (४.३.१) तेनैव। च विविधैः सूत्रैरग्रे प्रभृतिपदोपसंग्राह्या अलंकारा दर्शिताः। तट्टीकाकारेण च ते श्लोकैरेवं निबद्धाः। यथा–

प्रतिवस्तुप्रभृतय उद्दिश्यन्ते यथाक्रमम्।
प्रतिवस्तु समासोक्तिरथाप्रस्तुतशंसनम्।।

अपह्नुती रूपकं च श्लेषो वक्रोक्त्यलंकृतिः।
उत्प्रेक्षातिशयोक्तिश्च संदेहः सविरोधकः।।

विभावनानन्वयः स्यादुपमेयोपमा ततः।
परिवृत्तिः क्रमः पश्चाद्दीपकं च निदर्शना।।

अर्थान्तरस्य न्यसनं व्यतिरेकस्ततः परम्।
विशेषोक्तिरथ व्याजस्तुतिर्व्याजोक्त्यलंकृतिः।
स्यात् तुल्ययोगिताक्षेपः सहोक्तिश्च समासतः।

अथ संसृष्टिभेदौ द्वावुपमारूपकं तथा।
उत्प्रेक्षावयवश्चेति विज्ञेयोलंकृतिक्रमः।। इति।

भरतमुनिना तु–

उपमा दीपकं चैव रूपकं यमकं तथा।
काव्यस्यैते ह्यलंकाराश्चत्वारः परिकीर्तिताः।। (१६.४१)

इत्यलंकारचतुष्टयमेवोक्तम्। एतद्विस्तारो भामहादिभिः प्रदर्शितस्तत एव बोद्धव्यः। प्रदर्शितमिति कथनं प्रायिकमिति बोध्यम्। यतो निश्चयोल्लेखादीनां नवीनतरैरुद्भावितानां केषांचिदलंकाराणां सामान्यलक्षणरूपबीजस्य प्राचीनैरकथनात्। तदेव पूर्वाचार्यैर्दर्शितमेव विकल्पमूलभूतं बीजम्। परिसंस्कर्तुं सम्यक्तया विशदीकर्तुम्। अयं प्रक्रान्तग्रन्थरूपः अस्मत्परिश्रमः मदीयो व्यवसायः। पूर्वाचार्यकथितबीजभूतानि अलंकारतत्त्वानि मया विविधैर्लक्षणैरुदाहरणैश्च विव्रियन्ते। अनया दिशा अन्ये विकल्पाः प्रतिभावद्भिः स्वयमूहनीया इति भावः।।२।।

## विवृति

तेषामतिबाहुल्याल्लक्षणप्रतिपादनम (शक्यं चेत् कथं भवतोऽत्र यत्न:?) आह–

तदेव बीजं प्रतिसंस्कर्तुं विवरीतुमयमस्मत्परिश्रम इति। अनेनात्मनः स्वतन्त्रप्रतिषेधादनुपासितगुरुता (प्रयुक्तन्यूनतां परिह)रति।

सामस्त्येन वक्तुं न शक्यत इति कारणेन किं केचिदलङ्काराः परित्यज्यन्ते? न इत्याह–**किन्त्विति।** सर्वावान्तरभेदगर्भं तत्तदलङ्कारलक्षणं पूर्वाचार्यैः प्रदर्शितम्? तदेव तत्तद्विशेषवत्तया स्फुटीकर्तुम् अयम स्मदुपक्रमः।

**किन्त्विति।** कतिपयभेदा उदाह्रियन्ते; तेऽपि न स्वबुद्ध्या। कथं पुनः आरम्भावकाश इति चेत्–तेषां भेदानां बीजं पूर्वाचार्यैः प्रदर्शितम्; तदेव तदाधारतया व्याख्यातुम् अत्र अस्माकमुपक्रमः। बीजमिव बीजम्; यथा बीजं अङ्कुरप्रसवादीनां कारणं, तद्वत् पूर्वाचार्यवचनमपि भेदानां कारणं भवितुमर्हतीति यावत्।।२।।

---

**काश्चिन्मार्गविभागार्थमुक्ताः प्रागप्यलंक्रियाः।**
**साधारणमलङ्कारजातमन्यन्निरूप्यते॥३॥**

---

## रत्नश्री

काश्चिदलंक्रियाः केचिदलङ्काराः श्लेषप्रसादादयः न सर्वाः, प्रागपि प्रथमे परिच्छेदेऽपि उक्ताः शिलष्टा[दयः।] न केवलमिदानीमुच्यन्ते। प्राक् किमर्थमुक्ता इत्याह-मार्गविभागार्थमिति। मार्गयोर्वैदर्भगौड़ीययोर्विभागो विवेकः उक्तलक्षण्ः अर्थः प्रयोजनं यस्मिन् वचन इति क्रियाविशेषणम्। श्लेषादिषु हि कथितेषु तत्स्वभावो वैदर्भमार्गः प्रतीयते। तद्विपर्ययस्वभावश्च गौड़ीय इति श्लेषाद्यलङ्कार-वचनात् मार्गविभागो जायते। नान्ययेति श्लेषादिव वनं मार्गविभागार्थं सम्पद्यते। किमिदानीं वाच्यमित्याह-साधारणमित्यादि। वैदर्भादिषु सर्वमार्गेषु साधारणं सामान्यं न प्रागिवासाधारणम्। अलङ्कारजातम् अर्थालङ्कारवृन्दम् अन्यत् इदानीं निरूप्यते शिष्यत इति।।

यथोद्देशं निर्दिदिक्षुस्तावदलङ्कारानुद्दिशति-

## हृदयङ्गमा

रीतिभेदप्रसङ्गात् पूर्वनिरूपितश्रुत्यनुप्रासादिभिन्नानामेव निरूपणं विधेयमित्याह, काश्चिदिति।-काश्चित् अलङ्क्रियाः श्रुत्यनुप्रासादयः अलङ्काराः, मार्गविभागार्थं रीतिविभेददर्शनार्थं, प्रागपि पूर्वमेव, उक्ताः, अलंङ्कारनिरूपणप्रतिज्ञया तेषामपि प्राप्तौ निरूपितनिरूपणं व्यर्थमेवेति पुनर्न ते वक्तव्या इति भावः,

इदानीमन्यत् उक्तेभ्यो भिन्नं, साधारणं मार्गद्वयसमानम्, अलङ्कारजातं प्रदर्श्यते निरूप्यते।।३।।

## प्रभा

एवं सामान्यतोलंकारनिरूपणे प्रतिज्ञाते प्रसङ्गतः पूर्वं निर्णीतानामलंकाराणां पुनर्निरूपणं पिष्टपेषणवद्विफलं स्यादिति तान् परिहृत्यैव निरूपणं क्रियते इति कथयति–**काश्चिददिति।** काश्चित् श्रुत्यनुप्रासवृत्त्यनुप्रासायमकादयः। अलंक्रियाः शब्दालंकाराः। मार्गविभागार्थम् गौडवैदर्भमार्गयोर्वैसादृश्यद्योतनार्थम्। प्रागपि प्रथमपरिच्छेद उक्ताः। तत्र श्रुत्यनुप्रासः ५२ श्लोकेन वृत्त्यनुप्रासः ५५ श्लोकेन यमकं च सामान्यतः ६१ श्लोकेन निर्दिष्टम्। तत्प्रयोजनं तु श्रुत्यनुप्रासो वैदर्भैरङ्गीकृतो न गौडेरित्यादिना मार्गभेदकथनम्। अतः तेलंकारा न पुनर्निरूप्यन्ते इति भावः। अन्यत् पूर्वोक्ताद् अन्यत् साधारणं उभयमार्गसमानम्। गौडवैदर्भानुमतमित्यर्थः। अलंकारजातम् स्वभावाख्यानमुपमेत्यादिना अग्रे निरूप्यमाणोलंकारसमूहः। प्रदर्श्यते विविच्यते। यमकस्य पूर्वं सामान्यतो लक्षणमुक्तं तद्विशेषप्रकारनिरूपणं तु-तत् तु नैकान्तमधुरमतः पश्चाद्विधास्यते। (१.६१) इति पूर्वप्रतिज्ञानुरोधेनैव तृतीयपरिच्छेदे सोदाहरणं प्रपञ्चितमस्तीति ज्ञेयम्।।३।।

## विवृति

काश्चित् श्लेषप्रसादादयो वैदर्भगौडीयमार्गविभागार्थमुक्ताः। प्रागप्याद्यपरिच्छेदे। अलंक्रियाः अलङ्काराः। इदमन्यत् श्लेषादिभ्यः उभयमार्गसाधारणमलङ्कारजातं जात्यादि प्रदर्श्यते।

**काश्चिददिति।** पूर्वं श्लेषादयो दश गुणा इत्युक्तम्। कथं ते अलङ्कारा उच्यन्त इति चेत्–शोभाकरत्वं हि अलङ्कारलक्षणम्, तल्लक्षणयोगात् तेऽपि अलङ्काराः। शोभाहेतवो गुणाः, शोभातिशयहेतवः अलङ्काराः, इति कैश्चिदुक्तम्। शोभातिशयहेतुत्वस्यैव विवक्षितत्वात् नायं भेदहेतुः, इति गुणा अलङ्कारा एव, इति आचार्याः। ततः श्लेषादयः गुणात्मकालङ्काराः पूर्वं मार्गप्रभेदप्रदर्शनाय उक्ताः। इदानीन्तु मार्गद्वयसाधारणा अलङ्कारा उच्यन्ते।

**काश्चिददिति।** अस्मिन् परिच्छेदे वैदर्भगौडमार्गसाधारणम् अलङ्कारजातं प्रदर्श्यते इत्यर्थः।।३।।

---

**स्वभावाख्यानमुपमा रूपकं दीपकावृती**
**आक्षेपोऽर्थान्तरन्यासो व्यतिरेको विभावना॥४॥**

## हृदयङ्गमा

अलङ्कारान् निर्दिशति, स्वभावेत्यादिचतुर्भिः श्लोकैः।– स्वभावाख्यानं स्वभावोक्तिः, दीपकञ्च आवृतिरावृत्तिश्च ते दीपकावृती॥४॥

## प्रभा

प्रतिज्ञातालंकारनिरूपणाय प्रथमं तानुद्दिशति– **स्वभावाख्यानामिति।** स्वभावाख्यानं स्वभावोक्तिः, अस्यैव जातिरिति संज्ञान्तरम्। दीपकं च आवृतिश्च दीपकावृती। आङ्पूर्वकाद् वृतेरिगुपधात् कित् इति औणादिः कित्प्रत्ययः। आवृत्तिरित्यर्थः। सोयं अर्थावृत्तिः पदावृत्तिरुभयावृत्तिरेव च (२. ११६) इति त्रिधा अग्रे निरूपितोस्ति। अन्यत् स्पष्टम्॥४॥

## विवृति

तत्र किंनामानोऽलङ्काराः, कियन्तः, किं च तेषां लक्षणम्। आह–॥४॥

**समासातिशयोत्प्रेक्षा हेतुः सूक्ष्मो लवः क्रमः।**
**प्रेयोरसवदूर्जस्वि पार्यायोक्तं समाहितम्॥५॥**

## हृदयङ्गमा

समासः समासोक्तिः, अतिशयः अतिशयोक्तिः, समाहितं समाधिः, अप्रस्तुतस्तोत्रम् अप्रस्तुतप्रशंसा, इति उक्तप्रकारेण नामतो निर्दिष्टाः, ॥५॥

## प्रभा

**समासेति।** समासः समासोक्तिः। अतिशयः अतिशयोक्तिः। लवः लेशः। तथा चाग्रे वक्ष्यति–हेतुश्च सूक्ष्मलेशौ च वाचामुत्तमभूषणम् (२.२३५) इति। क्रमः यथासंख्यम्। अस्यैव संख्यानमिति संज्ञान्तरम्। तदुक्तमग्रे–यथासंख्यमिति प्रोक्तं संख्यानं क्रम इत्यपि (२.२७३) इति। समाहितं अर्वाचीनैः समाधिनाम्ना व्यवहृतोलंकारः॥५॥

## विवृति

स्वभावाख्यानादयो भाविकपर्यन्ताः इति वाचां शब्दानामलङ्कारा भूषणानि स्मर्यन्ते पूर्वसूरिभिः पूर्वाचार्यैः। स्मर्यन्त इति वचनात् तैरपि न क्रियन्ते। तेषां शब्दार्थसम्बन्धरूपेणानादित्वादित्युपदर्शयति॥५॥

---

**उदात्तापह्नुतिश्लिष्टविशेषास्तुल्ययोगिता।
विरोधाप्रस्तुतस्तोत्रे व्याजस्तुतिनिदर्शने।।६।।**

## हृदयङ्गमा

वाचां वाक्यानाम्, अलङ्काराः स्वभावोक्त्यादिभाविकपर्य्यन्ताः पञ्चत्रिंशत्सङ्ख्याकाः, पूर्वसूरिभिः प्राचीनकविभिः, दर्शिताः।।६।।

## प्रभा

**उदात्तेति।** उदात्तश्च अपह्नुतिश्च श्लेषश्च विशेषश्चेति द्वन्द्वः। विशेषः विशेषोक्तिः। विरोधः अप्रस्तुतस्तोत्रं च विरोधाप्रस्तुतस्तोत्रे। अप्रस्तुतस्तोत्रं अप्रस्तुतप्रशंसा। व्याजस्तुतिश्च निदर्शनं च व्याजस्तुतिनिदर्शने।।६।।

## विवृति

तानेव अलङ्कारान् उद्दिशति–**स्वभावाख्यानमिति।** दीपकावृती इत्यत्र आवृतिशब्दः आवृत्तिवाचकः ; वृतु वर्तने इत्यस्मात् आङुपसृष्टात् इगुपधादिति इन्प्रत्ययः कित्। अर्थावृत्तिः पदावृत्तिः इत्यावृत्तिर्द्विविधा।।६।।

**सहोक्तिः परिवृत्त्याशोः संकीर्णमथ भाविकम्।**
**इति वाचामलङ्कारा: स्मर्यन्ते पूर्वसूरिभिः॥७॥**

## रत्नश्री

दीपकमावृतिरावृत्तिश्च औणादिक इकारः। समासश्च समासोक्तिः। अतिशयश्च अतिशयोक्तिः उत्प्रेक्षा च। उदात्तम्, अपह्नुतिः, श्लिष्टम्, विशेषश्च। विरोधोऽप्रस्तुत स्तोत्रं च। व्याजस्तुतिः निदर्शनं च, परिवृत्तिराशीः संकीर्णं च। अथ भाविकं च इत्येते यथोक्ताः अलङ्कारा: उक्तलक्षणाः स्मर्यन्ते आम्नायन्ते पूर्वसूरिभिः आद्यैराचार्यैः रामशर्मादिभिः काव्यालङ्कारकारैः। कस्येत्याह-वाचामिति। काव्यानां सम्बन्धिनः॥

तत्र स्वभावोक्तिं तावन्निदर्शयन्नाह-

## हृदयङ्गमा

(वाचाम् इत्यनेन लक्षितानामलङ्काराणामेषामर्थगतत्वेऽपि वाक्यगतत्वोक्तिर्वाच्यवाचकयोरभेदाङ्गीकारादित्यवधेयम्। तथा चोक्तं पातञ्जलसूत्रभाष्यव्याख्याने महर्षिणा व्यासेन,- "स्थितोऽस्य वाचकस्य वाच्येन सहाभेदः सम्बन्धः" इति)॥७॥

## प्रभा

**सहोक्तिरिति।** संकीर्णं संसृष्टिः। तदुक्तमग्रे- नानालंकारसंसृष्टेः संसृष्टिस्तु निगद्यते। (२.३५९) इति एवं नामनिर्देशपूर्वकम्। कथिताः पूर्वोक्ताः पञ्चत्रिंशत्संख्याकाः। वाचां वाक्यानाम् अलंकाराः। पूर्वसूरिभिर्दर्शिताः। यद्यपि एत

अर्थालंकारास्तथापि शब्दार्थयोर्वैयाकरणानुमतं तादात्म्य-मङ्गीकृत्योक्तं वाचामित्युक्तम्। पूर्वसूरिभिरित्यनेन संप्रदायागतानेतानेव विवृणोमि न तु निश्चयोल्लेखादी-नर्वाचीनकविकल्पितसदृशानन्यान् कानपि विशिनष्मि। तादृशवैचित्र्य- स्वीकारेण अलंकारान्तरकल्पने तेषामानन्त्यापत्तेरिति भावः।।७।।

## विवृति

तान् उद्दिशति–**स्वभावाख्यानमिति।** स्वभावाख्यानमित्यारभ्य स्मर्यन्ते पूर्वसूरिभिः इत्येतत्पर्यन्तं पञ्चत्रिंशदलङ्कारा: प्रोक्ताः। पूर्वसूरिभिः काश्यपवररुचिप्रभृतिभिः।।७।।

---

**नानावस्थं पदार्थानां रूपं साक्षाद् विवृण्वती।**
**स्वभावोक्तिश्च जातिश्चेत्याद्या सालंकृतिर्यथा॥८॥**

## रत्नश्री

पदार्थानां वस्तूनां जातिक्रियागुणद्रव्याणां रूपं स्वभावम्। किंविशिष्टम्? नानावस्थं नाना विचित्रा न त्वेकैव काचित्, अवस्था दशा यस्य तादृशमनेकप्रकारं साक्षात् अञ्जसा अभिधानव्यापारेण न तु सामर्थ्यात्। विवृण्वती प्रकाशयन्ती सती या प्रवर्तते सा तादृश्यलंकृ[42b]तिः। आद्या प्रथमा अलङ्कारेष्विह स्वभावोक्तिर्नाम वेदितव्या, जातिर्नाम वा। अनेन संज्ञाद्वयेन अयमलङ्कारो व्यवह्रियते। स्वभावं पदार्थानां विचित्रं वक्तीति स्वभावोक्तिः। जातेः पदार्थस्वरूपस्य तथा तथा प्रतिपादकत्वेन तादर्थ्याज्जातिः। यथेत्युदाहरति। यथेदं तथान्यदपि तादृशं सर्वमेव द्रष्टव्यम्। न त्विदमेवेत्यर्थः। एवमुत्तरत्राप्यनुगन्तव्यम्॥

## हृदयङ्गमा

स्वभावोक्तिं निरूपयति, नानेति।—पदार्थानां जातिगुणक्रियाद्रव्याणां, नाना अवस्था बहुविधा दशा यस्य तादृशं, रूपं स्वरूपं, वर्णात्मकं संस्थानात्मकञ्च धर्म्ममित्यर्थः, साक्षात् प्रत्यक्षमिव, विवृण्वती प्रदर्शयन्ती, सा प्रसिद्धा, आद्या प्रथमा सर्वाग्रा वा, यथार्थनिरूपणसारत्वादिति भावः ; अलङ्कृतिः अलङ्कारः, स्वभावोक्तिश्च जातिश्च इति नामद्वयवती, (अस्याः प्राथम्यं जातिसंज्ञाञ्च भोजराजेनाप्युक्तं,—"ज्ञेया जात्यादयः प्राज्ञैस्तेऽर्थालङ्कारसंज्ञया। जातिर्विभावना हेतुः—"इत्यादि। तत्र जातिलक्षणं यथा,—"नानाऽवस्थासु जायन्ते यानि रूपाणि वस्तुनः।

स्वेभ्यः स्वेभ्यो निसर्गेभ्यस्तानि जातिं प्रचक्षते।।" इति। तथा च पदार्थानां नानावस्थस्वरूपस्य कविप्रतिभया वैचित्र्येण वर्णनं स्वभावोक्तिरिति निष्कर्षः। (नानावस्थमित्यनेन एकरूपाया अवस्थायाः कीर्त्तने न अयमलङ्कारः, वैचित्र्याभावात्, वैचित्र्यस्य एव अलङ्कारत्वात् इति सूच्यते; यथा,–"अम्भोदमुदितं दृष्ट्वा मुदा नृत्यन्ति वर्हिणः" इत्यत्र वस्तुस्वरूपनिरूपणेऽपि वैचित्र्याभावात् न अलङ्कारता। अत्र रूपपदं क्रियाया उपलक्षणम् इति केचित्। उक्तञ्च प्रकाशकारेण यथा,–"स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम्" इति। वस्तुतस्तु क्रियारूपयोर्वर्णने प्रकाशकता स्वभावोक्तिरित्युक्तम्, आचार्य्यस्तु रूपवर्णनमेव स्वभावोक्तिरित्याह। तच्च रूपं सहजमागन्तुकञ्च इति द्विविधम्; यदुक्तं,–' स्वभाव एव भावानां स्वरूपमभिधीयते। निजमागन्तुकञ्चेति द्विविधं तदुदाहृतम्।।" इति। केचित्तु वस्तुस्वरूपोल्लेखन- रूपार्थव्यक्तिमर्थगुणेषु कथयन्ति, तेषां मते स्वभावोक्तेर्गुणत्वम्। सार्वकालिकस्य वस्तुनो रूपोट्टङ्कने गुणत्वं, जायमानागन्तुकरूपवर्णने त्वलङ्कारत्वमिति भोजः ; यदाह,–"अर्थव्यक्तेरियं भेदमियता प्रतिपद्यते। जायमानमियं वक्ति रूपं सा सार्वकालिकम्।।" इति)। यथेति परोक्तस्य उदाहरणस्य सूचकम्।।८।।

## प्रभा

तत्र उद्देशवाक्यानुसारेण अलंकारान् लक्षयति– **नानावस्थमिति।** सा अलंकारेषु प्रथिता। आद्या उद्देशवाक्ये प्रथमा। अलंकृतिः स्वभावोक्तिः जातिः इति च नामद्वयवती। वर्तते इति

शेषः। तल्लक्षणं तु नानावस्थमित्यादि। पदार्थानां स्थावरजङ्गमानाम्। नानावस्थं जातिगुणक्रियाद्रव्यवशेन विविधप्रकारम्। रूपं स्वरूपविशेषम् असाधारणधर्मम्। साक्षाद् अव्याजेन। विवृण्वती दर्शयन्ती। अथवा साक्षाद् विवृण्वती सूक्ष्मत्वाद्दुर्लक्षमपि प्रत्यक्षमिव दर्शयन्ती। सा जातिरिति संबन्धः। एवं च वस्तुनो यथावत् स्वरूपस्फुटीकरणसमर्थमसाधारणधर्मवर्णनं स्वभावेक्ति-रिति लक्षणं संपन्नम्। अत्र सर्वत्र अलंकारेषु काव्यशोभाकरत्वरूपं साधारणलक्षणप्राप्तं चमत्कृतिहेतुत्वमपेक्ष्यत एव। तेन च–

दीर्घपुच्छश्चतुष्पादः ककुद्मांल्लम्बकम्बलः।
गोरपत्यं बलीवर्दस्तृणमत्ति मुखेन सः।।

इत्यादौ नायमलंकारः। अत्र केचित् नानावस्थमित्यनेन एकावस्थवस्तुरूपवर्णने न वैचित्र्यातिशय इति नालंकारता। यथा–अम्भोदमुदितं दृष्ट्वा मुदा नृत्यन्ति बर्हिण इत्यत्र नर्तनमात्रं वर्णितमिति नात्र स्वभावोक्तिरित्याहुः। प्रकाशकारस्तु स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम्। (१०.१११) इति लक्षणं विधाय रूपवत् क्रियावर्णनमपि स्वभावोक्तिमाह। भोजस्तु–अर्थव्यक्तिः स्वरूपस्य साक्षात् कथनमुच्यते। (१.८१) इति अर्थव्यक्तिम् अर्थगुणमाह। अनया सह स्वभावोक्तेः सांकर्यपरिहाराय सार्वकालिकस्य वस्तुस्वरूपस्य वर्णनम् अर्थ व्यक्तिगुण आगन्तुकस्य वस्तुस्वरूपस्य वर्णनं स्वभावोक्तिरलंकार इति भेदं निरदिशत्। यथा–

अर्थव्यक्तेरियं भेदमियता प्रतिपद्यते।
जायमानमियं वक्ति रूपं सा सार्वकालिकम्।। (३.५) इति।

अन्यत्रापि–

स्वभाव एव भावानां स्वरूपमभिधीयते।
निजमागन्तुकं चेति द्विविधं तदुदाहृतम्।।

इति प्रपञ्चितमस्ति। आचार्यो दण्डी तु– अर्थव्यक्तिरनेयत्वमर्थस्य इति तां शब्दगुणत्वेनैव स्वीचकार। अतस्तन्मते उपर्युक्तं सार्वकालिकागन्तुकोभयरूपं पदार्थस्वरूपवर्णनं स्वभावोक्तेरेव विषय इति ध्येयम्।।८।।

## विवृति

तत्र स्वभावोक्तेर्लक्षणम्।

नानावस्थं वि(वृण्व) किन्न(तीत्यन्तं) लक्षणम्। रूपं स्वभावमसाधारणं धर्मं पदार्थानां जातिक्रियागुणद्रव्याणां साक्षाद्वाचकेन शब्देन (अ)वक्रोक्तिरूपेण (विवृ)ण्वति(ती) स्वभावोक्तिश्चेति जातिश्चेति संज्ञाद्वयाङ्किता आद्यालंकृतिः प्रथमोऽलङ्कारः। यथेत्युदाहरणे।

स्वभावाख्यानं लक्षयति–**नानेति।** पदार्थानां जातिक्रियागुणद्रव्याणां नानावस्थं नानाप्रकारं रूपं साक्षाद्विवृण्वती प्रत्यक्षमिव दर्शयन्ती आद्या अलंकृतिः, स्वभावोक्तिः जातिः इति च, संज्ञाद्वयाङ्किता उच्यते।

उद्देशक्रमेण स्वभावाख्यानस्वरूपमाह–**नानेति।** पदार्थानां स्थावरजङ्गमानां जातिक्रियागुणद्रव्यवशेन अनेकधा स्थितं रूपं, साक्षात् अव्याजेन, विवृण्वती ,या उक्तिः, सा स्वभावोक्तिः स्वभावाख्यानम्। तस्यैव जातिरिति केषांचिदाचार्याणां संज्ञा। जातिक्रियागुणद्रव्येषु प्रथमं जातेरुदाहरणमनन्तरं क्रियादेः।।८।।

---

**तुण्डैराताम्रकुटिलैः पक्षैर्हरितकोमलैः।**
**त्रिवर्णराजिभिः कण्ठैरेते मञ्जुगिरः शुकाः॥९॥**

## रत्नश्री

एते प्रत्यक्षवर्तिनः शुकाः तुण्डैः चञ्चुभिः आताम्रैः लोहितैः, कुटिलैः वक्रैश्च, पक्षैश्च हरितवर्णैः, कोमलैः मृदुभिः कण्ठैश्च, त्रिभिर्वर्णैः सितासितलोहितैः राजिभिः लक्षिताः। मञ्जर्मधुरा गीः शब्दो येषां ते मञ्जुगिरः। इयं शुकजातेः पदार्थस्य विचित्रं स्वरूपं वक्तीति जातिस्वभावोक्तिरीदृशी द्रष्टव्या॥

विशालाः श्रोणिषु क्षामा मध्ये दीर्घा विलोचने।
पयोधरैरसंक्षिप्तैस्तास्तु रम्या वरस्त्रियः॥

इत्यपरमुदाहणम्॥

[क्रि]यास्वभावोक्तिमुदाहरन्नाह–

## हृदयङ्गमा

प्रथमं जातौ उदाहरति, तुण्डैरिति।–एते मञ्जुगिरः मधुरप्रलापिनः, शुकाः आताम्राणि आलोहितानि, कुटिलानि च तैः तुण्डैः मुखैः, हरिताः पालाशवर्णाः, कोमलाश्च तैः पक्षैः तथा त्रयाणां वर्णानां हरितरक्तधूसराणां, राजयः रेखाः येषु तादृशैः कण्ठैः उपलक्षिता इत्यर्थः। (सर्वत्र विशेषणे तृतीया। अत्र शुकजातेः तादृशतुण्डत्वादिकम् असाधारणं रूपं संस्थानञ्च पूर्वमप्रत्यक्षायमाणमपि वर्णनावैचित्रेण माक्षादिव प्रतीयते इति,

तथा शुकशब्दस्य बहुव्यक्तिवाचित्वादियं जातिंगता स्वभावोक्तिः)॥९॥

## प्रभा

जात्यादिचतुष्टयरूपां स्वभवोक्तिं क्रमेण उदाहरति– **तुण्डैरिति।** आताम्रकुटिलैः आताम्राणि ईषल्लोहितानि कुटिलानि वक्राणि च तैः। तुण्डैः मुखैः। उपलक्षिताः। इत्थंभूतलक्षणे इति तृतीया। एवमग्रेपि। हरितकोमलैः हरिताः पालाशवर्णाः कोमलाः सुकुमारास्तैः। पक्षैः गरुद्भिः। त्रिवर्णराजिभिः त्रयो वर्णा नीलरक्तधूसरास्तेषां राजयः रेखा यत्र तैः। कण्ठैः ग्रीवाभिः। एते अग्रे वर्तमानाः। शुकाः कीराः। मञ्जुगिरः मधुरप्रलापिनः। वर्तन्त इति शेषः। अत्र तुण्डादीनां ताम्रत्वादिकः सर्वशुकजातेर्धर्मः। तेन जात्युदाहरणमेतत्॥९॥

## विवृति

(तुण्डैराताम्रकुटिलैः शुकाः) इति जातेरुदाहरणम्॥९॥

---

**कलक्कणितगर्भेण कण्ठेनाघूर्णितेक्षणः।**
**पारावतः परिक्षिप्य रिरंसुश्चुम्बति प्रियाम्॥१०॥**

## रत्नश्री

पारावतः प्रियां पारावतीं चुम्बति रिरंसू रन्तुकामः परिक्षिप्य परिभ्रम्य कलमव्यक्तमधुरं क्वणितं शब्दो गर्भोऽन्तर्वर्ती यस्मिन् तेन कण्ठेन लक्षितः। आघूर्णिते भ्रमिते ईक्षणे नेत्रे यस्य स तथा। इह क्वणनाघूर्णनादेः क्रियापदार्थस्य स्वभावः प्रकाश्यत इति क्रियास्वभावोक्तिरेवंविधा विज्ञेयेति।

वेपते श्वसिति का[म्यत्यलं] पश्यति रोदिति।

बिभेति हरति स्वाङ्गं बाला नवसमागमे॥

इत्यपरमुदाहरणम्॥

गुणस्वभावोक्तिं निदर्शयन्नाह–

## हृदयङ्गमा

क्रियायामुदाहरति, कलेति।–कलं मधुरं, क्वणितं गर्भे यस्य तादृशेन कण्ठेन उपलक्षितः, (विशेषणे तृतीया) तथा आघूर्णिते ईक्षणे नेत्रे यस्य तथाभूतः, पारावतः रिरंसुः रन्तुमिच्छुः सन्, परिभ्रम्य प्रियां चुम्बति। (पारावतानामुक्तविधचुम्बनं स्वाभाविकमिति क्रियागता स्वभावोक्तिरिति अवगन्तव्यम्)॥१०॥

## प्रभा

क्रियास्वभावेक्तिमुदाहरति–**कलेति**। कलक्कणितगर्भेण कलम्

अव्यक्तमधुरं यत् क्वणितं मञ्जुलध्वनिः स गर्भे अन्तः यस्य तेन। कण्ठेन उपलक्षितः। आघूर्णितेक्षणः आघूर्णिते प्रेम्णा प्रियामुखमभितः संचालिते ईक्षणे नयने येन सः। रिरंसुः रन्तुमिच्छुः। पारावतः। कलरवः सन्। परिभ्रम्य परितश्चङ्क्रमणं कृत्वा। प्रियां कपोतीम्। चुम्बति तस्या अधरपानं करोति। अत्र कलक्वणितादयः सर्वे धर्माः पारावतचुम्बनक्रियाया इति क्रियास्वभावोक्तिरियम्।।१०।।

## विवृति

कलक्वणितगर्भेण कण्ठेन पारावत इति क्रियायाः।।१०।।

---

**बध्नन्नङ्गेषु रोमाञ्चं कुर्वन् मनसि निर्वृतिम्।**
**नेत्रे चामीलयन्नेव प्रियास्पर्शः प्रवर्तते॥११॥**

---

## रत्नश्री

प्रियायाः प्रणयिन्याः स्पर्शो गुणः पृथिव्यादिभूताश्रयत्वात्। स प्रवर्तते। कथम्? अङ्गेषु प्रियस्य गात्रेषु रोमाञ्चं रोमहर्षं बध्नन् उत्पादयन् मनस्यन्तरात्मनि निर्वृतिं कुर्वन्नानन्दममन्दं सन्दधानः। नेत्रे च प्रियतमस्य दृशौ हर्षभरसञ्चरे आमीलयन् मुकुलयन्नेव। ऐष इत्यपि पाठः। प्रवर्ततामिति प्रकृतम्। अत्र स्पर्शाख्यस्य गुणपदार्थस्य स्वरूपं रोमाञ्चादि विचित्रं [43a]निर्वृत्तमिति गुणस्वभावोक्तिरियमेवंरुपाअनुसर्तव्येति।

अक्ष्णोराघूर्णनं वाक्यं स्खलद्रागं कपोलयोः।
मदः करोति नारीण्रां भ्रुवोर्वल्गु च वल्गितम्॥

इत्यपरमुदाहरणम्॥

द्रव्यस्वभावोक्तिमुदाहरति–

## हृदयङ्गमा

गुणोदाहरणं दर्शयति, बन्धन्निति।–एष प्रियायाः स्पर्शः अङ्गेषु रोमाञ्चं बन्धन् जनयन्, मनसि निर्वृतिं सातिशयानन्दं, कुर्वन् तथा नेत्ने आमोलयन् मुद्रयंश्च, प्रवर्त्तते प्रसरति। (अत्न स्पर्शो गुणः इति गुणगतेयम्)॥११॥

## प्रभा

गुणगतां स्वभावोक्तिमुदाहरति–**बध्नन्निति।** एष अनुभूयमानः। प्रियास्पर्शः दयितास्पर्शः। अङ्गेषु गात्रेषु। रोमाञ्चम् रोमहर्षणम्। बध्नन् संपादयन्। मनसि निर्वृतिं परमानन्दम्। कुर्वन् जनयन्। नेत्रे आमीलयन् सौख्यातिशयेन निमीलयन्। प्रवर्तते जयतीत्यर्थः। अत्र प्रियास्पर्श इति स्पर्शस्य गुणत्वाद् गुणगतेयं स्वभावोक्तिः। भोजराजेन स्वभावोक्तेः–देशः कालश्च शक्तिश्च साधनानि च हेतवः (३.८) इति हेतून् कथयित्वा शक्तेरिदमुदाहरणं दर्शितम्। अत्र रोमाञ्चबन्धादिषु प्रियास्पर्शप्रवृत्तेर्निमित्तस्योक्तत्वादियं शक्तिहेतुर्नाम जातिरिति च लक्षणसंगतिर्दर्शिता।।११।।

## विवृति

बध्नन्नङ्गेषु रोमाञ्चं प्रियाश्वासः प्रवर्तते इति गुणस्य।।११।।

---

**कण्ठे कालः करस्थेन कपालेनेन्दुशेखरः।**
**जटाभिः स्निग्धताम्राभिराविरासीद् वृषध्वजः॥१२॥**

## रत्नश्री

वृषध्वजः शङ्करः आविरासीत् प्रकाशीबभूव। कण्ठे कालः कालकूटलक्षणो यस्य कण्ठेकालो वा सप्तम्या अलुक्। इन्दुरर्धचन्द्रः शेखर उत्तंसो यस्य। करस्थेन हस्तवर्तिना कपालेन भिक्षापात्रेण स्निग्धाभिरपरुषाभिस्ताम्राभिः पाटलाभिर्जटाभिश्च लक्षित इति योज्यम्। शङ्कराख्यस्य द्रव्यस्य नानाप्रकारं स्वरूपमिहोपवर्णितमिति द्रव्यपदार्थस्वभावोक्तिरित्थम्भूता बोद्धव्येति।

स्वेदबिन्दुमदुद्भिन्नपुलकं लोलमाकुलम्।
तद्दर्शनादभूदङ्गमङ्गं तस्या नतभ्रुवः॥

इत्यपरमुदाहरणम्॥

एवं स्वभावोक्तिं प्रतिपाद्य निगमयन्नाह-

## हृदयङ्गमा

द्रव्योदाहरणं दर्शयति, कण्ठे इति।–कण्ठे कण्ठदेशे, कालः नीलः, (कण्ठेकालशब्दः अलुक्तत्पुरुषनिष्पन्नः) करस्थेन कपालेन, स्निग्धताम्राभिः जटाभिरिति च (विशेषणे तृतीया) इन्दुशेखरः चन्द्रचूडः वृषध्वज आविरासीदित्यन्वयः। (अत्र वृषध्वजशब्दो द्रव्यवाचकः, संज्ञाशब्दस्य द्रव्यवाचकत्वात्। एवञ्च द्रव्यपदं वैयाकरणोक्तैकव्यक्तिवाचकद्रव्यपरं, वैशेषिकोक्तानां

क्षित्यादिनवद्रव्याणां जातिपदेन ग्रहणादित्यवधेयम्। द्रव्यभूतस्य शिवस्य कण्ठेकालत्वादिनानाधर्म्मप्रदर्शनपुरः सरवर्णनेन स्वरूपस्फुटीकरणात् वैचित्र्यमावहतीति द्रव्यगता स्वभावोक्तिरिति)।।१२।।

## प्रभा

द्रवयगतजातिमुदाहरति–**कण्ठेकाल इति।** कण्ठेकालः कण्ठे कण्ठप्रदेशे कालः कालकूटं तदुत्पन्नकालिमा वा यस्य स शिवः। अमूर्धमस्तकात् स्वाङ्गादकामे इति अलुक्समासः। करस्थेन करस्थितेन। कपालेन शिरोस्थना। तथा स्निग्धताम्राभिः स्निग्धाः कोमलास्ताम्रा अरुणास्ताभिः। जटाभिर्जटिलकेशपाशैः। उपलक्षितः। एतादृग् वृषध्वजः वृषः वृषभः ध्वजः केतुचिह्नं यस्य सः। आविरासीत् प्रादुरभूत्। अत्र कण्ठेकालत्वादयः सर्वेपि धर्माः शिवरूपद्रव्यगता इति द्रव्यस्वभावोक्तिरियम्। वृषध्वजशब्दो यादृच्छिकः शिवसंज्ञायां संकेतितः। संज्ञासंज्ञिनोश्चाभेदाद्द्रव्यगतेयं स्वभावोक्तिः।।१२।।

## विवृति

कण्ठे कालो वृषध्वजः इति द्रव्यस्य।

शुकजातिस्वभावमाह–**तुण्डैरिति।** पारावतचुम्बनक्रिया-स्वरूपमाह– कलेति। प्रियास्पर्शगुणस्वरूपमाह–**बन्धन्निति।** ईश्वरद्रव्यस्वभावमाह **कण्ठेकाल इति।** करस्थेन कपालेन, जटाभिः स्निग्धताम्राभिः, इत्यत्र इत्थंभूतलक्षणे तृतीया।

उदाहरणानि–तुण्डैरित्यादयः। तुण्डैः चञ्चुभिः; इत्थंभूतलक्षणे तृतीया। मञ्जु मधुरम्।।१२।।

स्वयं व्याचष्टे–

एवंविधमन्यदपीत्ति ईदृशशब्द(दे)सर्वनामा(म)दर्शयति। शास्त्रेष्वस्यैव स्वभावाख्यानस्यैवालङ्कारस्य साम्राज्यं प्रभावः(?)प्राचुर्यम्। क(त)था काव्येष्वप्येतदीप्सितम्। तथा च यदुक्तम् कैश्चित् 'गतोऽस्तमर्को भातीन्दुर्यान्ति वासाय वायसाः। इत्येवमादिकं (किं) काव्यं वार्तामेनां प्रचक्षते' इति तन्निरस्तम्।

---

**जातिक्रियागुणद्रव्यस्वभावाख्यानमीदृशम्।**
**शास्त्रेष्वस्यैव साम्राज्यं काव्येष्वप्येतदीप्सितम्॥१३॥**

## रत्नश्री

जातिः क्रिया गुणो द्रव्यं च तेषां स्वभावो लक्षणं नानावस्थस्तस्याख्यानमाख्यायतेऽनेनेतीदृशमेवंजातीयं द्रष्टव्यमिति शेषः। क्वास्य विनियोग इत्याह–शास्त्रेष्वित्यादि। शास्त्रेषु आन्वीक्षिक्यादिषु विद्यास्थानेषु। अस्यैव स्वभावाख्यानस्यालङ्कारस्य नान्यस्योपमादेः साम्राज्यं प्राधान्यम्, तस्यैव तत्र प्रायः प्रयोगात्। काव्येष्वपि सर्गबन्धादिष्वेतत् स्वभावाख्यानमीप्सितमिष्टम्, तत्रापि यथावसरं प्रयुक्तस्य शोभाकरत्वात्। अपिशब्दान्न केवलं शास्त्रेष्वित्याचष्टे॥

स्वभावोक्त्यनन्तरोद्दिष्टत्वात्तन्निर्देशानन्तरमुपमां विवृण्वन्नाह–

## हृदयङ्गमा

स्वभावोक्तिमुपसंहरन्नाह, जातीति।–जातिक्रियागुणद्रव्याणां जातिः गोपिण्डादिषु गोत्वादिका, क्रिया पूर्वापरीभूतावयवा कर्म्मरूपा, गुणः रूपादिः, द्रव्यम् एकव्यक्तिबोधक-चैत्रमैत्रादिसंज्ञाशब्दप्रतिपाद्यस्वरूपं, तेषां स्वभावाख्यानं स्वभावोक्तिः, ईदृशम् एवम्प्रकारम्, अनयैव दिशा सर्वत्रैव स्वभावो वर्णनीय इति भावः। अस्यैव स्वभावाख्यानस्यैव, शास्त्रेषु दर्शनेतिहासादिषु, साम्राज्यम् आधिपत्यं, बहुलप्रचार इत्यर्थः, एतच्च काव्येषु काव्यशास्त्रेषु अपि, ईप्सितं प्रियं, कवीनामिति शेषः, कवयः स्वभावोक्तिमेव विशेषेण आद्रियन्ते इति भावः॥१३॥

## प्रभा

स्वभावोक्तिमुपसंहरति–**जातीति**। जातिश्च क्रिया च गुणश्च द्रव्यं च जातिक्रियागुणद्रव्याणि तेषां स्वभावः नैसर्गिकस्वरूपं तस्य आख्यानं मनोहरतया कथनम्। ईदृशम् अनया रीत्या स्वभावो वर्णितश्चेत् स्वभावोक्तिरलंकारो भवति इति भावः। अत्र द्रव्यपदं वैयाकरणपरिभाषितैकव्यक्तिवाचकम् न तु नैयायिकपरिभाषित-पृथिव्यादिवाचकम् तेषां जातिपदेन संग्रहात्। अस्यैव स्वभावाख्यानस्यैव। शास्त्रेषु पदार्थस्वरूपनिरूपणप्रधानेषु न्यायव्याकरणवेदान्तादिशास्त्रेषु। साम्राज्यम् प्राधान्यम्। सर्वाण्यपि शास्त्राणि पदार्थस्वभावनिर्णयायैव प्रवृत्तानि। अतः स्वभावाख्यानं सर्वत्र वरीवर्ति इति भावः। एवकारेण अलंकारान्तराणां न एतादृक् शास्त्रेषु उपयोग इति सूचितम्। काव्येष्वपि एतत् स्वभावाख्यानम्। ईप्सितम् कविभिरलंकारान्तरापेक्षया एतदेव सहृदयतया आदृतम्। सर्वेषु अलंकारेषु एतदेव विराजत इति भावः।।१३।।

## विवृति

**जातीति**। जातिः गोत्वाश्वत्वशुकत्वादिः; क्रिया गमनवचन-रमणादिः; गुणः शब्दस्पर्शरूपादिः; द्रव्यं आकाशविष्णुव्रजादि। शास्त्रेषु इदं स्वभावाख्यानमेव भाति; तत् तत्तद्वस्तुतत्त्वकथनात् काव्येष्वपि हृद्यतमम्।

**जातीति**। शास्त्रेषु धर्मागमादिशास्त्रेषु अमृतवचनाभावात् अस्यैव स्वभावालङ्कारस्य साम्राज्यं सम्पत्तिः भवति। काव्येषु वर्णनाप्राधान्यात् असत्यवचनं कल्पितमपि च अस्ति। तस्मात्तेषु स्वभावालङ्कारस्य नास्ति बहुलता, किञ्चिदीप्सितत्वं भवति।।१३।।

---

**यथाकथञ्चित् सादृश्यं यत्रोद्भूतं प्रतीयते।**
**उपमा नाम सा तस्याः प्रपञ्चोऽयं प्रदर्श्यते॥१४॥**

## रत्नश्री

एवमुत्तरत्राप्यनुसर्तव्यम्। यत्र विषये सादृश्यं पदार्थयोः कयोश्चित्साम्यं यथाकथञ्चित् येन केनचित् प्रकारेण, गुणादिना सर्वथा साम्यस्य दुर्लभत्वात्। तत्त्वे [चैक्य]प्रसङ्गात्। प्रतीयते गम्यते शब्दादर्थतो वा यथासम्भवम्। ननु रूपकेऽपि सादृश्यं प्रतीयत इति लक्षणसंकर इति चेदाह-उद्भूतमिति। व्यक्तम्, भेदस्य परिस्फुटत्वादुपमानोपमे[43b]ययोः। रूपके तु तत्त्वारोप इत्यसङ्करः। अत एव वक्ष्यति-

उपमैव तिरोभूतभेदा रूपकमिष्यते॥

[२.६६]

इति। सा सादृश्योक्तिरुपमानामालंक्रिया वेदितव्या। उपमितिः साधर्म्यकथनमुपमेति कृत्वा। तस्या एवंलक्षणायाः अयं प्रस्तुतः प्रपञ्चः विचित्रः प्रभेदः प्रदर्श्यते उदाह्रियते॥

## हृदयङ्गमा

उपमां निरूपयति, यथेति।-यत्र वैचित्रे, यथाकथञ्चित् येन केनापि धर्म्मेण गुणेन क्रियया अन्येन वा इत्यर्थः, उद्भूतं प्रस्फुटम्, अभिधेयमित्यर्थः, सादृश्यं साम्यम्, उपमानोपमेययो रेकधर्मवत्त्वमित्यर्थः, (साम्यं सारूप्यं साधर्म्मं सादृश्यमिति च पर्य्यायशब्दत्वेनाभिन्नार्थकमिति बोध्यम्) प्रतीयते उपमानोपमेय

तन्निष्ठसमानधर्मादिप्रतीतिर्भवति इत्यर्थः, सा वैचित्र्यरूपा, उपमानाम अलङ्कारः। (अत्रेदं ज्ञेयं यत्–उपमायां घटकतया त्रयः पदार्था विद्यन्ते उपमानमुपमेयं समानधर्म्मश्चेति; इह तु सादृश्यपदेनैव उपमानोपमेयत्वयोर्लाभः, सादृश्यस्य तदुभयसम्बन्धित्वात्, तत्रोपमीयते उत्कृष्टगुणेण चन्द्रादिना सादृश्यमानीयते अन्यन्मुखादिकं येन तदुपमानं, यत्तु न्यूनगुणमुत्कृष्टगुणेनान्येनोपमीयते तदुपमेयम् "उत्कृष्टगुणवत्त्वया सम्भाव्यमानमुपमानम् अपकृष्टगुणवत्त्वया सम्भाव्यमानमुपमेयम्" इति केचित्, "सादृश्यप्रतियोगि उपमानं सादृश्यानुयोगि उपमेयम्" इत्यपरे। उपमानोपमेयगतो धर्म्मः समानधर्म्मः ततश्च इवादिपदवाच्यमुपमानोपमेयोभयसम्बन्धि वैचित्र्यजनकं सादृश्यमुपमा इति लक्षणम्। यथा,–"कमलमिव मुखं मनोज्ञमेतत्" इत्यादौ मनोज्ञत्वधर्म्मसंसर्गात् मनोज्ञतया स्वतः प्रसिद्धेन कमलेन मुखमुपमीयते मनोज्ञत्वं समानो धर्म्मः कमलमुपमानमेवं मुखमुपमेयमिति पदार्थत्रयसमावेशादुप-मालङ्कारत्वम् इति। वैचित्र्याभावे तु नायमलङ्कारः, यथा गौरिव गवय इत्यादि। अत एव रसगङ्गाधरे,–"सादृश्यं सुन्दरं वाक्यार्थोपस्कारकम् उपमालङ्कृतिः" इत्युपमालङ्कारलक्षणे सुन्दरमिति सादृश्यविशेषणं, व्याख्यातञ्च तत्रैव, "सौन्दर्य्यं चमत्कृत्याधायकत्वं चमत्कृतिश्च आनन्दविशेषः" इति। उपमानोपमेयगतधर्म्माश्च गुणक्रियादिरूपाः यथासम्भव-मत्रावगन्तव्याः, यथा,–"हंसीव धवला कीर्त्तिः" इत्यत्र धवलत्वं गुणः, "सलीलमियमायाति बधूर्गजबधूरिव" इत्यत्रागमनक्रिया, "आकाशः काशतेऽत्यर्थं शिववद्विधुभूषणः" इत्यत्र च विधुरूपद्रव्यं सादृश्यधर्म्मः। स च शब्दोपात्त एव, क्वचिदनुपात्ता

अपि ते धर्माः स्वयमूहनीयाः, यथा,–"मुखमिन्दुर्यथा" इत्यत्र मनोज्ञत्वधर्म्मः अनुपात्तोऽपि प्रतीयते। तस्य च धर्म्मस्य क्वचिद्वस्तुतोऽभिन्नत्वेनैकरूपत्वं क्वचिदेकशब्दप्रतिपाद्यत्वं क्वचिद्विम्बानुविम्बत्वं, तच्चोक्तं विश्वनाथेन,–"एकरूपः क्वचित् क्वापि भिन्नः साधारणो गुणः। भिन्ने विम्बानुविम्बत्वं शब्दमात्रेण वा भिदा।।" इति। एकरूपे यथोदाहृतं,–"मधुरः सुधावदधरः" इत्यादि। विम्बप्रतिविम्बत्वे यथा,–"भल्लापैवर्ज्जितैस्तेषां शिरोभिः श्मश्रुलैर्महीम्। तस्तार सरघाव्याप्तैः सक्षौद्रपटलैरिव।।" अत्र 'श्मश्रुलैः' इत्यस्य 'सरघाव्याप्तैः' इति दृष्टान्तवत् प्रतिविम्बनम्। शब्दमात्रेण भिन्नत्वे यथा,–"स्मेरं विधाय नयनं विकसितमिव नीलमुत्पलं सा।" अत्र एके एव स्मेरत्वविकसितत्वे प्रतिवस्तूपमावच्छब्दभेदेन निर्दिष्टे इति)। तस्याः प्रपञ्चः विस्तरः, विविधभेदः इत्यर्थः, अयं वक्ष्यमाणरूपः, निदर्श्यते प्रदर्श्यते।।१४।।

## प्रभा

क्रमप्राप्तामुपमां निरूपयति–**यथेति**। यत्र काव्ये। वृत्तित्वं सप्तम्यर्थः। तच्च वृत्तित्वं शक्तिलक्षणान्यतरसहकारेण बोधकत्वसंबन्धेन ज्ञेयम्। केचित्तु यत्र वैचित्र्ये इति विषयसप्तमी। विषयश्च प्रतिपाद्यरूप इत्याहुः। यथाकथंचित् येनकेनचित् प्रकारेण। गुणकियाद्रव्यवशेनेति भावः। उद्भूतं प्राधान्येन स्फुटम्। सादृश्यम् साम्यम्। प्रतीयते अभिधालक्षणव्यञ्जनान्यतरवृत्त्या प्रतीतिविषयमेति। सा उपमा तत् सादृश्यमुपमालंकारः। विधेयगतलिङ्गत्वेन तच्छब्दस्य स्त्रीत्वम्। तथा च काव्यनिष्ठमलौकिकचमत्कारजनकं सादृश्यमुपमेति फलितम्। चमत्काराजनकं सादृश्यं नोपमालंकारः। यथा गौरिव गवयः। घट

इव पटः पदार्थः। अथवा–अस्थिवद्दधिवच्चैव पिष्टवत् कुष्टवत् तथा। राजन् तव यशो भाति इत्यादिषु। एतत् सर्वालंकारसमानम्। तेन गोसदृशो गवय इति नोपमा। गौर्वाहीक इति न रूपकम्। स्थाणुर्वा पुरुषो वा इति न संदेहः। इदं रजतम् इति न भ्रान्तिमान्। नायं सर्प इति नापह्नुतिः। पीनो देवदत्तो दिवा न भुङ्क्ते इति न पर्यायोक्तम्। पर्वतो वह्निमान् इति नानुमानम्। सोयं देवदत्त इति न स्मरणम्। तस्थस्थमिपां तातंताम इति न यथासंख्यम्। पुत्रेण सह आगतः पिता इति न सहोक्तिः। तेन विना गत इति न विनोक्तिः। श्वेतो धावति इति न श्लेषः। इत्याद्यूहनीयम् इति चित्रमीमांसायां (६ पत्रे) अप्ययदीक्षिताः। उक्तं हि रसगङ्गाधरे–सादृश्यं सुन्दरं वाक्यार्थोपस्कारकं उपमालंकृतिरिति। (१५७ पत्रे) व्याख्यातं च सुन्दरमिति सादृश्यविशेषणम्। सौन्दर्यं च चमकृत्याधायकत्वम्। चमत्कृतिश्चानन्दविशेष इति। तस्याः प्रपञ्चो विस्तरः। अयं वक्ष्यमाणप्रकारकः। प्रदर्श्यते निदर्श्यते। अस्योपमालंकारस्य चत्वार्यङ्गानि। उपमानम् उपमेयम् साधारणो धर्म उपमावाचकश्चेति। तत्र सादृश्यप्रतियोगि उपमानम्। सादृश्यानुयोगि उपमेयम्। उपमाने उपमेये चोभयत्र संगतो धर्मः साधारणो धर्मः। उपमावाचकश्च इवादिशब्दः। परे तु यस्य धर्मस्य संबन्धाद् येन सह यदुपमीयते स साधारणो धर्मः। तदुपमानम् तच्चोपमेयम् इति साधारणधर्मोपमानोपमेयपदानि विवृण्वन्ति। यथा कमलमिव मुखं मनोज्ञम् इत्यादौ मनोज्ञत्वधर्मसंबन्धेन तद्वत्तया प्रसिद्धेन कमलेन सह मुखमुपमीयते इति मनोज्ञत्वं साधारणो धर्मः कमलमुपमानं मुखमुपमेयम् इवशब्दश्च उपमावाचक इत्युपमालंकारः। एते च उपमानादयः पदार्थाः क्वचित् सन्तः क्वचिदसन्तः क्वचिदुपात्ताः क्वचिदनुपात्ता अपि सामर्थ्यावसेया भवन्ति। अत एव त्वयि

कोपोयमाभांति सुधांशाविव पावकः। इत्यत्र सुधांशौ पावकस्यासतोपि उपमानत्वसिद्धिः। तत्र उपात्तानां गुणक्रियाद्रव्याणां सादृश्यात् क्रमेणोपमालंकारः। यथा हंसीव धवला कीर्तिरित्यत्र धवलत्वगुणेन, सलीलमियमायाति वधूर्गजवधूरिव इत्यत्र गमनक्रियया आकाशः काशतेत्यथ शिववद्विधुभूषण इत्यत्र विधुरूपद्रव्येण। अनुपात्तानां यथा–

मुखमिन्दुर्यथा पाणिः पल्लवेन समः प्रिये।
वाचः सुधा इवौष्ठस्ते बिम्बतुल्यो मनोश्मवत्।। इति।

अत्र मुखेन्दुप्रभृतीनां प्रसिद्धसादृश्यानां मनोज्ञत्वादयो धर्मा नोपात्ताः। ते सामर्थ्यादेव ज्ञायन्ते। उद्भूतम् प्राधान्येन स्फुटम् तेन यत्र वैचित्र्यान्तरनिगीर्णसादृश्यवैचित्र्यं तत्र नोपमालंकारः। तथा च रूपकादिस्थले ताद्रूप्यादिप्रतीतिजन्यवैचित्र्यस्य चमत्कारातिशय-जनकतया तत्कुक्षिनिलीनमिवोपमावैचित्र्यं न तादृशं चमत्कारं दर्शयति इति न तत्रोपमालंकारप्रसक्तिः। एवमेव व्यतिरेकालंकोरपि। तंत्र भेदप्रतीतिवैचित्र्येण सादृश्यप्रतीति-जन्यवैचित्र्यस्य तिरोधानात्। अङ्गाङ्गिभावसंकरे तु सादृश्यजन्यवैचित्र्यं नान्येन तिरोधीयते। परं काव्यार्थालोचनया प्रधाननिर्वाहकत्वेन तदङ्गत्वेन प्रतीयते। सादृश्यमतिरिक्तः पदार्थ इति वैयाकरणमीमांसकादयः। साधर्म्यमिति नैयायिकादयः। साधर्म्यमुपमा भेदे इति प्रकाशकारः। साधर्म्यं च उपमानोपमेयोरेकधर्मसंबन्धः। समासोत्तरवर्तिभाववाचितद्धित-प्रत्ययस्य संबन्धाभिधायकत्वात्। तदुक्तं भर्तृहरिणा–कृत्तद्धितसमासेभ्यः संबन्धाभिधानं भावप्रत्ययेनेति। एकत्वं हि धर्माणां क्वचिद्वस्तुतोभिन्नत्वं क्वचिदेकजातीयत्वं

क्वचिदेकशब्दप्रतिपाद्यत्वं क्वचिदेकधर्मत्वं चेति चतुर्विधम्। तत्र गुणक्रियायदृच्छानां साधर्म्यत्वे प्रथमम्। तेषामभिन्नत्वस्य वैयाकरणैरङ्गीकृतत्वात्। द्रव्यसामान्यादीनां साधर्म्यत्वे द्वितीयम्। एकजातीयत्वं च एकजातित्वम्। एकशब्दप्रतिपाद्यत्वं श्लिष्टपदोपस्थाप्ये धर्मे ज्ञेयम्। तत्र शब्दश्लेषे सकलकलं पुरमेतज्जातं संप्रति सुधांशुबिम्बमिव इत्यादि। अत्र सकलकलम् इत्यस्य कलकलसहितं संपूर्णकलायुतं चेत्यर्थः। बिम्बानुबिम्बितायामेकधर्मवत्त्वम्। यथा–

भल्लापवर्जितैस्तेषां शिरोभिः श्मश्रुलैर्महीम्।
तस्तार सरघाव्याप्तैः स क्षौद्रपटलैरिव।। इति।

अत्र श्मश्रुलत्वसरघाव्याप्तत्वयोर्धर्मयोरेककृष्णत्वादि-गुणयोगादेकत्वम्। आचार्यदण्डिनो मते एतत् सादृश्यं द्वयोरेवेति नाग्रहः। एकस्यैव उपमानोपमेयस्वरूपस्य अनन्वयस्याप्यनेन उपमात्वस्वीकारात्। तथैव वाक्यद्वयगता उपमेयोपमा अपि एतन्मते उपमैव। अतस्तदर्थं सादृश्यस्य एकवाक्यगतत्वमिति विशेषणं नापेक्ष्यते। तत्र इवादिपदप्रयोगे वाच्यं तदप्रयोगे क्वचिल्लक्ष्यं क्वचिद्वाक्येन व्यङ्ग्यम् इति ज्ञेयम्। अत्र तावदुपमाया वाक्यार्थबोधं संक्षेपतो दर्शयामः। चन्द्र इव मुखं आह्लादकम् इत्यत्र आह्लादकोपमानभूतचन्द्राभिन्नमाह्लादकमुपमेयं मुखमिति बोधः। अत एव इवादिसमभिव्याहारे उपमानोपमेययोः समानविभक्ति-कत्वनियमः। साधारणधर्मसंबन्धश्च क्वचिद्विशेषणतया यथा चन्द्र इव मुखमाह्लादकम् इत्यादौ क्वचिद्विशेष्यतया यथा चन्द्र इव मुखमाह्लादयति। अत्र उपमानचन्द्रकर्तृकाह्लादाभिन्न उपमेयमुखकर्तृकाह्लाद इति बोधः। अतोत्रापि तयोः

समानविभक्तिकतैव। हरीतकीं भुङ्क्ष्व राजन् मातेव हितकारिणीम्। इत्यादि तु असाध्वेव। समानविभक्तिकत्वाभावात्। ये त्वत्र चन्द्रसादृश्यप्रयोजको मुखकर्तृक आह्लाद इति बोधं वदन्ति तेषां मते उपमानोपमेययोः समानविभक्तिकत्वनियमे मानं चिन्त्यम्। यत्तु वाचनिकी समानविभक्तिकतेति तन्न व्याकरणशास्त्रे तादृशवचनानुपलम्भात्। एवं गजराज इव गच्छति देवदत्त इत्यादौ बोध्यम्। वनं गज इव शूरः समरभूमिं गच्छति इत्यादौ उपमानगजकर्तृकवनकर्मकगमनाभिन्नमुपमेयशूरकर्तृकसमरकर्मकं गमनमिति बोधः साधारणधर्मरूपगमनस्य विधेयतया उपमाविधेयिकात्र धीः। व्याघ्र इव यः शूरः पुरुषः स गच्छति इत्यादौ उपमानशूरव्याघ्राभिन्नपुरुषकर्तृकगमनमिति धीः। शूरत्वादिसाधारणधर्मस्योद्देश्यतया उपमोद्देश्यिकात्र धीः। अत एव भेदाभेदप्रधाना उपमेति वृद्धाः। यद्यपि चन्द्रमुखयोस्तत्त्वेन भेदस्तथापि साधारणधर्मवत्त्वेनाभेदान्वययोग्यता बोध्या इति मञ्जूषायां नागेशः। विस्तरस्तु रसगङ्गाधरे द्रष्टव्यः। उपमाया विविधालंकारमूलत्वमाह उपमाप्रस्तावे अप्पयदीक्षितश्चित्र-मीमांसायाम्। यथा–

उपमैका शैलूषी संप्राप्ता चित्रभूमिकाभेदान्।
रञ्जयति काव्यरङ्गे नृत्यन्ती तद्विदां चेतः।।

चन्द्र इव मुखमिति सादृश्यवर्णनं तावदुपमा सैव उक्तिभङ्गभेदेनानेकालंकारकत्वं भजते। तथाहि चन्द्र इव मुखं मुखमिव चन्द्र इत्युपमेयोपमा। मुखं मुखमिव इत्यनन्वयः। मुखमिव चन्द्र इति प्रतीपम्। चन्द्रं दृष्ट्वा मुखं स्मरामि इति स्मरणम्। मुखमेव चन्द्र इति रूपकम्। मुखचन्द्रेण तापः शाम्यति इति परिणामः।

किमिदं मुखमुताहो चन्द्र इति संदेहः। चन्द्र इति चकोरास्त्वन्मुखमनुधावन्ति इति भ्रान्तिमान्। चन्द्र इति चकोराः कमलमिति चञ्चरीकास्त्वन्मुखे रज्यन्ति इत्युल्लेखः। चन्द्रोयं न मुखम् इत्यपह्नवः। नूनं चन्द्र इत्युत्प्रेक्षा। चन्द्रोयम् इत्यतिशयोक्तिः। मुखेन चन्द्रकमले निर्जिते इति तुल्ययोगिता। निशि चन्द्रस्त्वन्मुखं च हृष्यति इति दीपकम्। त्वन्मुख एवाहं रज्यामि चन्द्र एव चकोरा रज्यन्त इति प्रतिवस्तूपमा। दिवि चन्द्रो भुवि त्वन्मुखम् इति दृष्टान्तः। मुखं चन्द्रश्रियम् बिभर्ति इति निदर्शना। निष्कलङ्कं मुखं चन्द्राददतिरिच्यत इति व्यतिरेकः। त्वन्मुखेन समं चन्द्रो निशासु हृष्यति इति सहोक्तिः। मुखं नेत्राङ्कुरुचिरं स्मितज्योत्स्नोपशोभितम् इति समासोक्तिः। अब्जेन सदृशं वक्त्रं हरिणाहितसक्तिना इति श्लेषः। मुखस्य पुरतश्चन्द्रो निष्प्रभ इत्यप्रस्तुतप्रशंसा। एवमुक्तानेकालंकारविवर्तवतीयमुपमा।

तदिदं चित्रं विश्वं ब्रह्मज्ञानादिवोपमाज्ञानात्।
ज्ञातं भवतीत्यादौ निरूप्यते निखिलभेदसहिता सा।। इति।
(५ पत्रे)

राजशेखरोपि–

अलंकारशिरोरत्नं सर्वस्वं काव्यसंपदाम्।
उपमा कविवंशस्य मातेवेति मतिर्मम।।
इति तां प्रशंसति।।१४।।

## विवृति

उपमालक्षणमाह–

यथा कथञ्चित् येन केनचित् प्रकारेण सादृश्यं समानो धर्मो

यत्र यत्रोद्भूतं प्रकटं प्रतीयते, उपमा नाम सा। तस्याः प्रपञ्चोऽयमलंकृतेः प्रदर्श्यते।।१४।।

उपमां लक्षयति–**यथेति।** 'भूयोऽवयवसामान्ययोगो जात्यंन्तरस्य तत्'– इति सादृश्यलक्षणम् अन्यैरुक्तम्। नेदं तल्लक्षणम्। किं तु गुणद्रव्यक्रियाजातिषु उभयोः एकतमयोगः सादृश्यम्; इति यथाकथञ्चित् इत्युच्यते। उद्भूतं शब्देन अभिहितं वा प्रतीयते वा यत्र तत्र उपमा। अत्र वा–शब्दः अध्याहार्यः। अभिधीयमानसादृश्या प्रतीयमानसादृश्या इति द्विविधा उपमा। अलङ्कारान्तराणामपि प्रपञ्चनिदर्शनार्थम् अस्या उपमायाः प्रपञ्चः प्रदर्श्यते।।१४।।

---

**अम्भोरुहमिवाताम्रं मुग्धे करतलं तव।**
**इति धर्मोपमा साक्षात् तुल्यधर्मनिदर्शनात्॥१५॥**

---

## रत्नश्री

मुग्धे बाले! प्रियामन्त्रण[मेतत्।] तव करतलं हस्तोपरिभागः आताम्रमरुणम्। किमिव? अम्भोरुहमिव कमलमिव इतीयमेवंजातीया धर्मोपमा ज्ञेया। कुतः? करतलाम्भोरुहयोर्द्वयोः समानस्य धर्मस्य गुणस्याताम्रलक्षणस्य निदर्शनात् प्रतिपादनात् कारणात्। कथम्? साक्षाद्वाचकव्यापारेणाताम्रपदप्रयोगात्, न त्वर्थात्। ततः शब्दोपात्तत्वात् साधारणस्य धर्मस्य। तेनैवेयं व्यपदिश्यते नान्यथा, तथा विवक्षितत्वात्॥

## हृदयङ्गमा

धर्मोपमाख्यभेदमुदाहरति, अम्भोरुहमिति।–हे मुग्धे! तव करतलम् अम्भोरुहमिव कोकनदमिव, आताम्रम् आलोहितम्, इति उक्तवाक्ये, साक्षात् तुंल्यधर्मस्य आताम्रमिति पदोपात्तस्य साधारणधर्मस्य आताम्रत्वस्य, प्रदर्शनात् कीर्त्तनात्, धर्मोपमा। (अत्र 'अम्भोरुहमिव' इति पदमसमस्तम्, इवशब्दः सादृश्यवाची, तत्र अम्भोरुहस्य भेदेनान्वयः, उपमानोपमेयस्थले हि समानविभक्तिकत्वस्य नियमात् न च भेदलक्षणा षष्ठीविभक्तिः ; यदुक्तं,–"विभक्तिः पुनरेका स्यादुपमानोपमेययोः" इति। अत एव अभेदान्वयस्थले यथा विशेष्यविशेषणयोः समानविभक्तित्वं, तथा चन्द्र इव मुखं भाति, चन्द्रमिव मुखं पश्यामि, चन्द्रेणेव मुखेन शोभसे इत्यादौ समाना विभक्तिः ; ततश्च अम्भोरुहसदृशं करतलमिति बोधः, षष्ठीस्थानीयतया इवशब्द एव

उपमानोपमेययोः सादृश्यलक्षणमभिधया बोधयति। केचिदत्र अम्भोरुहमिव इति पदं समस्तम् ''इवेन नित्यसमासो विभक्त्यलोपश्च पूर्वपदप्रकृतिस्वरत्वञ्च'' इत्यनुशासनात्, लक्षणया अम्भोरुहपदं तत्सदृशार्थकम्, इवशब्दश्च सादृश्यद्योतकः इति मन्यन्ते, तन्मते लक्षणागम्यं सादृश्यम्। उपमानोपमेययोरभेदेनान्वयाच्च सम्भवत्येव समानविभक्तित्वमिति दिक्। पूर्णोपमेयमिति दर्पणकारः ; तथा हि, करतलमुपमेयम्, अम्भोरुहमुपमानं, साधर्म्मामाताम्रमिव पदञ्चात्र सादृश्यवाचकं, सर्वस्यैव वाच्यत्वात्, तथा इवपदेन सादृश्यप्रतीतेः श्रौती वेयमिति)।।१५।।

## प्रभा

प्रतिज्ञातमुपमाप्रपञ्चं दर्शयति–**अम्भोरुहमिति** हे मुग्धे मुन्दरि। तव करतलं पाणितलम्। अम्भोरुहमिव कोकनदमिव। आताम्रं आलोहितम्। अम्भोरुहमिवेति समस्तम्। इवेन नित्यसमासो विभक्त्यलोपश्चेति शासनात्। अम्भोरुहपदं च अम्भोरुहसदृशे लाक्षणिकम्। इवशब्दः सादृश्यद्योतकः। तथा च आताम्रोपमानभूताम्भोरुहाभिन्नमाताम्रमुपमेयं करतलमिति बोधः। यत्तु–इवार्थः सादृश्यम्। तत्र प्रतियोग्यनुयोगिभावेनैव अम्भोरुहकरतलयोरन्वयोपपत्तौ किं लक्षणया। तथा च अम्भोरुहप्रतियोगिकसादृश्यानुयोगि करतलमिति बोध इति तन्न। इवशब्दस्य सादृश्यार्थवाचकत्वे तदर्थे सादृश्य उपमानस्य भेदेनान्वये अम्भोरुहमिव मुखं पश्यामि अम्भोरुहमिव मुखं दृश्यत इत्यादौ अम्भोरुहपदस्य सामानाधिकरण्याभावाद् उक्तानुक्तत्वप्रयुक्त–

विभक्त्यनापत्तेः षष्ठ्यापत्तेश्च। तथा अम्भोरुहेणेव करतलेन शोभसे इत्यादौ समानविभक्तित्वं न स्यात् अभेदान्वयस्थले एव विशेषणविशेष्ययोः समानविभक्तितत्वनियमात्। ननु अभेदान्वयस्थलवदुपमानोपमेयभावस्थलेपि समानविभक्तित्वस्यानुशासनमस्ति। तथा हि–विभक्तिः पुनरेका स्यादुपमानोपमेययोरिति। इति चेन्नेतद्रुचिरम्। एतच्छासनस्य मुनित्रयानुपदिष्टत्वात्। अत्र केचित् साधारणधर्मस्य आताम्रत्वस्य प्रथममुपमेयभूतकरतलेनैवान्वयो न तु उपमानभूतेनाम्भोरुहेण। तस्य समस्तैकपददेशपदबोध्यत्वात्। तद्गतत्वेन प्रतीतिस्तु पर्यालोचनया अन्वयबोधोत्तरमेव। अत एव धर्मसाधारण्यप्रतीतिस्तयैव च वैचित्र्यमिति साधारणधर्मसंबन्धे विषय आहुः। परं नैतद्रुचिरम्। पूर्वोक्तदोषपरिहाराय इवशब्दस्य द्योतकत्वं स्वीक्रियते। तेनोपमानोपमेयगतं सादृश्यं सममेव स द्योतयतीति ज्ञेयम्। अपरं च यथेवादिशब्दा यत्परास्तस्यैवोपमानताप्रतीतिरिति यद्यप्युपमानविशेषणान्येवेत्यादिप्रकाशकारोक्तिविरुद्धमेतद् इति सुधीभिर्विचार्यमेतत्। प्रकृतमनुसरामः। इति एवं साधारणधर्मप्रयोगस्थले धर्मोपमा। धर्मस्य उपादानेन धर्मोपमा इत्यर्थः। अत्र हेतुमाह–**साक्षादिति।** साक्षाच्छब्देन प्रतिपादितसय तुल्यधर्मस्य आताम्रत्वस्य। प्रदर्शनात् कीर्तनात्। अत्र इवशब्दश्रवणमात्रेण सादृश्यरूपसंबन्धस्य प्रतीतेरियं श्रौती। उपमानोपमेयसाधारणधर्मसादृश्यवाचकानां चतुर्णामपि प्रयोगाच्च पूर्णेयमुपमा। चतुर्ष्वङ्गेशु कस्यचिदनुपादाने लुप्तोपमेति ज्ञेयम्। एतद्भेदकरणमर्वाचीनानामेव। प्राचीनग्रन्थेष्वनुपलम्भात्। आचार्यदण्डी तु प्राचीनमतमेवानुसरति। धर्मवस्तूपमाविषये प्रमाणमाग्नेये यथा–

यत्र साधारणो धर्मः कथ्यते गम्यतेथवा।
ते धर्मवस्तुप्राधान्याद्धर्मवस्तूपमे उभे।। (३४४.१०) इति।

इत्यलं पल्लवितेन।।१५।।

## विवृति

अतः परं उपमालङ्कारलक्षणमाह–**यथेति**। यत्र उद्भूतं सादृश्यं यथाकथञ्चित् प्रतीयते, उपमा नाम सा। तस्या उपमायाः अयं प्रपञ्चः अत्र प्रदश्र्यते। तन्त्रान्तरेष्वपि उपमालक्षणमुक्तम्। तद्यथा–

**द्रव्यं द्रव्येण यच्चान्यत् साधर्म्यादुपमीयते।**
**प्रायशः कृत्स्नशो वाऽपि तदौपम्यस्य लक्षणम्।।**

**समानमधिकं हीनं विपरीतैकदेशिकम्।**
**यादृच्छिकमभूतं च सप्तौपम्यार्थसंग्रहः।।**

**भवदत्तो हि मेधावी पितेवेति समोपमा।**
**अतसीपुष्पसङ्काश इषुरित्याधिकोपमा।।**

**आननं शशितुल्यं ते तन्त्रीस्वर इव स्वरः।**
**पद्मपत्रनिभं नेत्रमिति हीनोपमा स्मृता।।**

**यथा त्वं गुणवान् लोके तथा ते निर्गुणो रिपुः।**
**इतीदमुपमानं तु विपरीतमिति स्मृतम्।।**

**मद्ध्याह्ने सूर्यवद्भाति भवानित्यैकदेशिकम्।**
**यदृच्छिकमितो व्योम्नः पतत्युल्केव देवता।।**

**भवतो रौषसम्पत्तिरौष्ण्यं चन्द्रमसो यथा।**
**अभूतमप्रतर्क्यार्थमभूतोपममिष्यते।।**

इत्येवं सप्तविधानां उपमानानां प्रकारः धर्मोपमाद्युपमासु यथासम्भवं द्रष्टव्यः।

इत्येषां धर्मोपमा। आताम्रमिति धर्मस्तस्य साक्षादाताम्रशब्देन तुल्यस्याम्भोरुहकरतलोभयधर्मिसाधारणस्य निदर्शनात्।।१५।।

**अम्भोरुहमिति**। आताम्रशब्देन समानधर्मस्याभिधीयमानत्वात् धर्मोपमा।।१५

अतः परम् उदाहरणानि। यानि दुर्बोधानि तान्येव व्याख्यायन्ते। अम्भोरुहमिति धर्मोपमामाह; अत्र धर्म इति उच्यते ताम्रगुणः।।१५।।

---

**राजीवमिव ते वक्त्रं नेत्रे नीलोत्पले इव।**
**इयं प्रतीयमानैकधर्मा वस्तूपमैव सा।।१६।।**

## रत्नश्री

ते तव वक्त्रं मुखं राजीवमिव पद्ममिव, नेत्रे चक्षुषी नीलोत्पले इवेति एवं विधा या सा वस्तूपमैव। धर्मिण एव साक्षादादानात्। तेनैवं व्यपदिश्यते। न धर्मेण तस्य साक्षादग्रहणात्। कथं तर्हि तदवसाय इत्याह–प्रतीयमानेत्यादि। प्रतीयमानस्य उपात्तस्य वस्तुनो राजीवादेस्तदव्यभिचारादर्थाद् गम्यमान एकः समानो धर्मः कान्त्यादिलक्षणो गुणो यस्याः। सेयमीदृशी वस्तूपमेति प्रकृतम्।।

## हृदयङ्गमा

वस्तूपमां लक्षयति, राजीवमिति।–ते तव, वक्तं मुखं, राजीवं पद्ममिव, तथा नेत्रे नीलोत्पले इव, प्रतीयमानः गम्यमानः, न तु अभिधीयमानः इति भावः, एकः सामान्यः, धर्मः यस्यां सा तथाविधा, इयम् अलङ्कृतिः, वस्तूपमा एव वस्तुनोरुपमानोपमेययोः एवोपादानात्। एवञ्च सामान्यधर्माप्रयोगेऽपि स्फुटसादृश्यानामौपम्यप्रतीतेधर्म्मं विना साधर्म्माप्रतीतेरभावादिति ज्ञेयम्। (विश्वनाथस्तु श्रौतीं लुप्तोपमामिमामाह। प्राञ्चस्तु तदनङ्गीकुर्वाणाः वस्तूपमेयमित्याहुः; तथा चोक्तमाग्नेये,–"यत्र साधारणो धर्म्मः कथ्यते गम्यतेऽथवा। ते धर्म्म वस्तुप्राधान्यात् धर्म्म वस्तूपमे उभे।।" इति)।।१६।।

## प्रभा

वस्तूपमां दर्शयति–**राजीवमिति।** ते तव। वक्त्रं वदनं।

राजीवमिव कमलसदृशम्। नेत्रे नयने। नीलोत्पले नीलकमले इव। इयं निर्दिष्टस्वरूपा उपमा। प्रतीयमानः शब्देनानुपादानाद् गम्यमानः। एव केवलः। अन्येषामुपमानोपमेयोपमावाचकानां शब्दोपात्तत्वाद् इति भावः। धर्मः साधारणो धर्मः मनोज्ञत्वसौरभत्वादिर्यत्र सा वस्तूपमा। वस्तुनोरुपमानोपमेययोरुपादानादियं वस्तूपमा। प्रसिद्धतया अत्र साधारणधर्मस्य शब्दप्रयोगमन्तरेणापि औपम्यप्रतीतिर्भवतीति भावः। केचित्तु प्रतीयमानैकधर्मेतिपदस्थैकशब्दस्य सामान्यः साधारण इति अर्थं दर्शयन्ति। इदमेकधर्मत्वं यत्राप्रसिद्धं तत्र नेयं वस्तूपमा भवति। तथा च सकलकलं पुरमेतज्जातं संप्रति सुधांशुबिम्बमिव। इत्यादौ न वस्तूपमा। अत्र सकलकलमिति समानधर्मस्यानुपादाने न हि पुरसुधांशुबिम्बयोः सादृश्यं प्रसिद्ध्या रूढं भवति। इयं च धर्मलुप्तोपमेति अप्पय्यदीक्षितैर्मन्यते।।१६।।

## विवृति

इत्येषा प्रतीयमानो गम्यमानोऽनुपात्त एको धर्मः राजीवमुखयोः कान्तिः नेत्रनीलोत्पलयोश्च दैर्ध्यं यस्याः सा प्रतीयमानैकधर्मा वस्तूपमैव। वस्तुशब्दोऽन्यत्र द्रव्यादिषु वर्तमानो (त्र धर्मिपरः। धर्मं विना राजीवनीलोत्पलाभ्या) मुपमीयेते मुखनेत्रे यतस्ततो वस्तूपमा धर्म्युपमेत्युच्यते।।

° **राजीवमिति।** प्रतीयमानैकसौरभ्यादिधर्मा वस्तूपमा। अतः परम् उपमाभेदलक्ष्यलक्षणानि प्रायेण सुगमानि इति न व्याख्यातानि।

वस्तूपमामाह–**राजीवमिति।** एवम्, उक्ते(?)अनुक्तेऽपिधर्मे, वस्तुनि उक्ते सति, प्रतीयमानैकधर्मत्वात् वस्तूपमा मता।।१६।।

---

त्वदाननमिवोन्निद्रमरविन्दमभूदिति।
सा प्रसिद्धि विपर्यासाद्विपर्यासोपमेष्यते॥१७॥

## रत्नश्री

उन्निद्रं विकसितमरविन्दं पद्मं तवाननं मुखमिवाभूत्। ईदृशी या सादृश्योक्तिः सा विपर्यासोपमेष्यते कविभिः। पद्ममुपमानमुपमेयं मुखमिति या प्रसिद्धिः निरुढ़िस्तस्याः विपर्यासाद् वैपरीत्यात् कारणात्। पद्मस्योपमेयीकरणात् वक्त्रस्योपमानीकृतेः ततो विपर्यासोपमैवेदृशी द्रष्टव्या। कान्त्यादिविशेषश्चाननन्यात्र कश्चिद् विवक्षित इति गम्यते। अन्यथा किं विपर्यासेनेति॥

## हृदयङ्गमा

विपर्य्यासोपमां लक्षयति, तवेति।–अरविन्दं पद्मं, तवाननमिव त्वदीयं मुखसदृशम्, उन्निद्रं विकसितम्, अभूत्, इति एवं, प्रसिद्धेः विपर्य्यासात् वर्णनीया हि प्रस्तुतमुखादयः उपमेयाः तदुत्कर्षताप्रतिपत्तयें कविनिवहैरुपात्ता अप्रस्तुतारविन्दचन्द्रादयः उपमानानीति प्रसिद्धिः, तस्याः विपर्य्यासः वैपरीत्यं, प्रस्तुतानां मुखादीनाम् उपमानत्वरूपम् अप्रस्तुतानां चन्द्रादीनाम् उपमेयत्वरूपमित्यर्थः, तस्मात्, सा विपर्य्यासाख्या उपमा इष्यते इत्यन्वयः। (आननमिव इत्यत्र उपमानपदोत्तरप्रयुज्यस्येव-पदस्याननपदसान्निध्यात् आननस्योपमानत्वप्रतीतेरत्र प्रसिद्धि-विपर्य्यासः बोद्धव्यः। दर्पणकारस्तु नेयमुपमा किन्तु प्रतीपालङ्कार इत्याह; यथा,– "प्रसिद्धस्योपमानस्योपमेयत्वप्रकल्पनम्। निष्फलत्वाभिधानं वा प्रतीपमिति कथ्यते॥" इति। उदाहृतञ्च तेनैव,–"यत् त्वन्नेत्रसमानकान्ति सलिले मग्नं तदिन्दीवरं

मेघैरन्तरितः प्रिये! तव मुखच्छायानुकारी शशी। येऽपि त्वद्गमनानुकारिगतयस्ते राजहंसा गतास्त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते।।'' इति। अत्र नेत्रादीनामुपमेयत्व-मिन्दीवरादीनामुपमानत्वमिति प्रसिद्धौ येयमत्यनुरागान्नेत्रादिषु आधिक्यबुद्धिः, नात्यनुरागादिन्दीवरादिषु तदनुकारबुद्धिः तयेह रामेण विरहिणा अभिधीयमानसादृश्यानाममीषां परस्परम् उपमानोपमेयभावः प्रसिद्धस्योपमानस्योपमेयत्वकल्पनसिद्ध इति)।।१७।।

## प्रभा

विपर्यासोपमामाह–**त्वदाननेति**। त्वदाननमिव। उन्निद्रं प्रबुद्धम्। अरविन्दं कमलम्। अभूद् आसीत्। इति प्रसिद्धेर्विपर्यासाद् वैपरीत्यात्। सा प्रसिद्धा विपर्यासोपमा अत्रास्तीति शेषः। अयं भावः। प्रस्तुतत्वेन वर्णनीयानां मुखादीनामेवोपमेयत्वं तदुत्कर्षप्रतिपादनाय न्यस्तानां चन्द्रारविन्दानामुपमानत्वम् इति कविसंप्रदायसिद्धः पन्थाः। तस्य मार्गस्य उपमेयस्य उत्कर्षप्रतिपादनाय विपर्यास उपमेयोपमानभावविपर्ययस्तस्माद्वि-पर्यासोपमा। प्रस्तुते उदाहरणे आननमुपमेयभूतमपि उपमानतया वर्णितम्। इवान्तस्य उपमानत्वनियमात्। तदनुरोधेन च यच्च उपमानभूतमरविन्दं तद् उपमेयतया वर्णितम्। अतो विपर्यासोपमालंकारः। नव्यास्तु अमुं प्रतीपं कथयन्ति। तदुक्तं कुवलायानन्दे–

प्रतीपमुपमानस्योपमेयत्वप्रकल्पनम्।
त्वल्लोचनसमं पद्मं त्वद्वक्त्रसदृशो विधुः।। (१४ पत्रे) इति।

उदाहरति च जगन्नाथः-

किं जल्पसि मुग्धतया हन्त ममाङ्गं सुवर्णवर्णमिति।
तद्यदि पतति हुताशे तदा हताशे तवाङ्गवर्णं स्यात्।।

(४९६ पत्रे)

इति।।१७।।

## विवृति

(प्रसिद्धे) रुपमानोपमेयभावस्य विपर्यासात् मुखारविन्दयोरुपमानोपमेयभावस्य प्रदर्शनाद्विपर्यासोपमानं (पमा)।।१७।।

**त्वदाननमिति।** अम्भोजादीनाम् उपमानत्वेन प्रसिद्धिः; वक्त्रादीनां उपमेयत्वेन प्रसिद्धिः। अत्र तु मुखम् उपमानत्वेन कमलं उपमेयत्वेन उक्तमिति, प्रसिद्धेः विपर्यासात्, असौ विपर्यासोपमा ज्ञातव्या।।१७।।

---

**तवाननमिवाम्भोजमम्भोजमिव ते मुखम्।**
**इत्यन्योन्योपमा सेयमन्योन्योत्कर्षशंसिनी॥१८॥**

## रत्नश्री

तवाननमिवाम्भोजं पद्मम्। अम्भोजमिव ते तव मुखमिति। एवं जातीया अन्योन्योपमेष्यते। अन्योन्यस्य परस्परस्य मुखस्याम्भोजस्य चान्योन्येन तेनैव द्वयेन उपमानात् साम्यकथनात्। सा चेयमन्योन्यस्य मुखस्याम्भोजस्य चोत्कर्षं विशेषं कान्त्यादिलक्षणं शंसति प्रकाशयति। अन्योन्येनैवेतद् द्वयं समानं [44a]नान्येन केनचिदिति द्वयोरतिशयः कश्चिदवसीयत इति। अनेन

उपमानोपमेयत्वं यत्र पर्यायतो भवेत्।

उपमेयोपमां नाम ब्रुवते तां यथोदिताम्।।

[काव्यालङ्कारे ३.३७]

इति परेष्टोपमेयोपमा पृथगुपमायामन्तर्भाविता।।

## हृदयङ्गमा

अन्योऽन्योपमां निरूपयति, तवेति।–अम्भोजं तव आननमिव, ते मुखम् अम्भोजमिव, इत्यत्र, अन्योऽन्यस्य परस्परस्य, अम्भोजोपमानत्वेन मुखस्य, मुखोपमानत्वेन अम्भोजस्य इत्यर्थः, यः उत्कर्षः वैचित्र्यं, तस्य शंसिनी सूचयित्री, सा प्रसिद्धा, इयम् अन्योऽन्योपमा। (अत्रायं विवेकः,–"यदेव वर्णनीयमानननादिकं तदेव भवति सर्वत्र प्रस्तुततया ख्यातं, तदुत्कर्षविशेष-प्रतिपादनार्थञ्च कविभिरप्रस्तुतकमलादिकमुपमानमुपन्यस्यते, इह

तु मुखाम्भोजयोर्द्वयोरेव प्रस्तुतत्वमवश्यमङ्गीकार्य्यम्, अन्यथा अप्रस्तुतभूतकमलादेरुत्कर्षप्रकाशप्रयासः क्लेशहेतुरेव स्यात्, अनन्यसदृशत्वप्रतिपादनार्थञ्च परस्परस्योपमानोपमेयत्वकल्पनम्; ततश्च उपमेयस्य कस्यापि स्थलान्तरवन्न्यूनगुणत्वमपि नाशङ्कनीयमिति सुधीभिर्विभाव्यम्, एतेन पर्य्यायेण परस्परस्योपमानोपमेयभावविवक्षाया वैचित्र्याजनकत्वात्। मुखमम्भोजञ्च तुल्यमित्यादौ तथा प्रतीतौ अपि वैचित्र्याभावात् न अयमलङ्कारः। दर्पणकारस्तु एतामेव उपमेयोपमामाह; यथा,–"पर्य्यायेण द्वयोरेतत् उपमेयोपमा मता" इति। उदाहरणान्तरं यथा,–"हासः प्रसूनमिव हासमिव प्रसूनं पाणिः प्रबाल इव पाणिरिव प्रबालः। केशो द्विरेफ इव केश इव द्विरेफः सा भाति वीरुदिव सेव विभाति वीरुत्।।" इति। अत्र च उपमेयेन उपमा सादृश्यं यत्र सा उपमेयोपमा इत्यन्वर्थबलात् सदृशोपमानान्तराभावत्वं प्रतीयते, ततश्च यत्रोपमानान्तरतिरस्कारो न प्रतीयते तत्र नायमलङ्कारः। यथा,–"सविता विधवति विधुरपि सवितरति तथा दिनन्ति यामिन्यः। यामिनयन्ति दिनानि च सुखदुःखवशीकृते मनसि।।" इति। न ह्यत्र उपमानान्तरतिरस्करणं विवक्षितं, किन्तु सुखदुःखवशीकृतमनसामेवं विपरीतं भवतीति प्रतीतेः। भोजस्तु एतामुभयोपमामाह)।।१८।।

## प्रभा

अन्योन्योपमामाह **तवाननमिति।** अन्योन्यस्य आननेन उपमानेन अम्भोजस्य, अम्भोजेन उपमानेन आननस्य इति परस्परस्य उत्कर्षो गुणमाहात्म्यं तत् शंसिनी कथयित्री सेयमन्योन्योपमा इति।

इत्यनेन उदाहरणस्वरूपं निर्दिश्यते। तेन च यत्र पर्यायेण उपमानोपमेयभावस्तत्रैवेयमिति सिद्धम्। तेन च मुखमम्भोजं च तुल्यमित्यत्र तथा प्रतीतावपि नेयं भवति उपरिदर्शित-वैचित्र्याभावात्। अत्र पर्यायेणोपमानोपमेयकत्वकल्पनं तृतीयसदृशव्यवच्छेदार्थम्। तेन न्यूनगुणेनोपमेयेनोपमीयमानस्य गुणाधिकस्योपमानस्य कथमुत्कर्ष इति शङ्का परास्ता। अत्र द्वयोरेव मुखाम्भोजयोः प्रस्तुतत्वं बोध्यम्। अम्भोजस्य अप्रस्तुतत्वे तदुत्कर्षप्रतिपादनवैयर्थ्यात्। प्रस्तुतोत्कर्षप्रतिपादनायैव गुणा-लंकाराणां समुत्पत्तेः। अत एव हेमचन्द्र इमामुपमेयोपमाभिधानेन इत्थमुदाजहार–

तवाननमिवाम्भोजमम्भोजमिव ते मुखम्।
निलीनां नलिनीखण्डे कथं नु त्वां लभेमहि।।
(२७४ पत्रे) इति।

निलीनां गूढाम्। अप्पय्यदीक्षितोपि–धर्मोर्थ इव पूर्णश्रीरर्थो धर्म इव त्वयि। इत्युभयप्रस्तुतमेवोदाहरत्। अर्वाचीनैस्तु इयमुपमेयोपमाशब्देन व्यवह्रियते। जगन्नाथादयस्तु केवलं तृतीयसदृशव्यवच्छेदमेंवास्याः फलं मन्वते। तथा प्रस्तुताप्रस्तुतेपि इयं भवतीति–

कौमुदीव भवती विभाति मे कातराक्षि भवतीव कौमुदी।
अम्बुजेन तुलितं विलोचनं लोचनेन च तवाम्बुजं समम्।।

इत्येतदुदाहरणतः स्पष्टं भवति। अत्र आननं मुखमिति प्रक्रमभङ्गः प्राचां निरङ्कुशत्वात् सोढव्य इति प्रेमचन्द्रशर्माणः। परे तु

कविना एतदुदाहरणं केवलमुपमाभेदप्रदर्शनायोल्लिखितं न तु काव्यत्वेनोपन्यस्तम्। अतस्तत्र प्रस्तुतमपहाय केवलक्षुद्रदोषैकदृष्टिभिर्विपश्चिद्भिर्न भवितव्यमित्याहुः॥१८॥

## विवृति

अत्र मुखेनाम्भोजमुपमीयते। अम्भोजेन मुखमित्यन्योन्योपमा अन्योन्योत्कर्षशंसिनीति हेतुः अन्योन्यातिशयशंसित्वादन्योन्योपमा ॥१८॥

---

**त्वन्मुखं कमलेनैव तुल्यं नान्येन केनचित्।**
**इत्यन्यसाम्यव्यावृत्तेरियं सा नियमोपमा॥१९॥**

---

## रत्नश्री

तव मुखं कमलेनैव तुल्यम्। नान्येन केनचित् कमलव्यतिरिक्तेन वस्तुनेति। एवंविधा या सादृश्योक्तिः सेयं नियमोपमा कथ्यते। नियमस्य साक्षादुपादानात्। यदाह-अन्यसाम्यव्यावृत्तेरिति। कमलादन्येन केनचिद्वस्तुना साम्यस्य सादृश्यस्य व्यावृत्तेर्व्यवच्छेदात् कारणात्। तेनैव च नियमेन व्यपदिश्यते, नान्यथेति॥

## हृदयङ्गमा

नियमोपमां लक्षयति, त्वदिति।-त्वन्मुखं कमलेन एव तुल्यम्, अन्येन केनापि न, इति अत्र, अन्यस्य साम्यं सादृश्यं, तस्य व्यावृत्तिः निरासः तस्याः हेतोः, इयं सा प्रसिद्धा, नियमोपमा, उपमानबाहुल्यम् उपमेयस्यापकर्षं गमयति, तद्व्यावृत्त्या एकेन प्रकृष्टतमेन सादृश्यकल्पनात् उत्कर्षातिशयः समधिकवैचित्राम् आवहतीति ध्येयम्॥१९॥

## प्रभा

नियमोपमामाह-**त्वन्मुखमिति**। कमलेनैवेति एवकारोन्ययोग-व्यवच्छेदकः। तदेव शब्दतः कथयति नान्येनेति। अन्यसाम्यव्यावृत्तेरिति उपमानबाहुल्यमुपमेयस्यापकर्षं गमयति।

तद्व्यावृत्त्या प्रकृष्टेनैकेन साम्यकथनम् उत्कर्षातिशयवैचित्र्यमावहतीति अस्या अलंकारकत्वं ज्ञेयम्।।१९।।

## विवृति

त्वन्मुखं कमलेनैव तुल्यं नान्येन चन्द्रादिना केनापि सदृशमित्यन्यसाम्यव्यावृत्तेरप(र)साधर्म्यनिषेधादियमित्थंभूता सा नियमोपमेत्युच्यते।।१९।।

---

**पद्मं तावत् तवान्वेति मुखमन्यच्च तादृशम्।**
**अस्ति चेदस्तु तत्कारीत्यसावनियमोपमा॥२०॥**

## रत्नश्री

तव मुखं कर्तृ पद्मं कर्मभूतम्। अन्वेत्यनुगच्छति पद्मेन तुल्यं तावत्। एतन्निश्चितम्। वाचोयुक्तौ वा। अन्यच्चापरमपि किञ्चिद्वस्तु तादृशं पद्मसमम्। तत्कारि त्वन्मुखान्वयकारि त्वदाननस्योपमानमस्ति चेत् यदि भवेत्, अस्तु भवतु न वार्यत इति एवंरूपा यासौ तादृशी अनियमोपमा स्मर्यते तज्ज्ञैः। पद्मेनैव तुल्यमित्यस्य नियमस्यानपेक्षणात्, अन्यस्यापि तादृशस्याभ्यनुज्ञानादिति॥

## हृदयङ्गमा

अनियमोपमां निरूपयति, पद्ममिति।–तव मुखं पद्मं तावत् अन्वेति अनुकरोति, अन्यच्च तादृशं पद्मवत् सुन्दरं वस्तु चन्द्रादि, अन्वेतीति पूर्वेणान्वयः। लक्ष्यं प्रदर्श्य लक्षणं सङ्गमयति, अस्तीति।–तत्कारि पद्मानुकारि, सदृशोपमानान्तरभूतं वस्त्वित्यर्थः, अस्ति चेत् अस्तु उपमानबाहुल्यं भवति चेत् न काचित् क्षतिरिति भावः ; इति अस्मात्, एकोपमानेन साम्यप्रतिपादननियमाभावादित्यर्थः, असौ अनियमोपमा, पद्मस्य तदन्यस्य च यस्य कस्यचित् अपि उपमानकल्पनात् कल्पनायाश्च नियमाभावात् इति भावः। (अत्र केचित् पद्मं कर्त्तृपदं मुखञ्च कर्म्मपदमिति कृत्वा पद्मं तव मुखमन्वेति इत्यन्वयं विदधुः, तेन च मुखस्योपमानत्वम् अत एव वैचित्र्यातिशयः, वैपरीत्ये तु न तथेति तेषामाशयः ; तन्न समीचीनं, प्रसिद्धस्योपमानस्य उपमेयत्वकल्पने विपर्य्यासोपमाया

अभ्युपगमात् इत्यवधेयम्। नियमोपमायामेकमेवोपमानम्, इह तु तत्सदृशमपरमपीति द्वयोर्भेदः)।।२०।।

## प्रभा

अनियमोपमां दर्शयति–**पद्ममिति।** पद्मम् कमलम्। तावद् इति वाक्यालंकारे। तव मुखमन्वेति अनुकरोति। अन्यत् कमलादितरत्। तादृशं सुन्दरं वस्तु चन्द्रादि। तत्कारि तव मुखानुकारि। अस्ति चेदस्तु। इति एवं नियमाभावरूपा अनियमोपमा। नास्ति नियम उपमानविषये यत्र सा अनियमोपमेत्यर्थः।।२०।।

## विवृति

पद्मं तावत्तवान्वेति मुखं पद्मसदृशं तावत् त्वन्मुखम्। अन्यदपि वस्तु यदि पद्मसमं कान्तं किमप्यस्ति तदा तत्कारि तद्वस्तुनापि त्वन्मुखं सममस्त्विति नियमकरोऽ(स्या)करणादसावनियमोपमा।

पद्ममिति। तत्कारि सादृश्यकारि।।२०।।

---

**समुञ्चयोपमाप्यस्ति न कान्त्यैव मुखं तव।**
**ह्लादनाख्येन चान्वेति कर्मणेन्दुमितीदृशी॥२१॥**

---

## रत्नश्री

क्वचिदेकत्र क्रियादावनेकपदार्थातिसर्जनं समुच्चयः। तन्मुखेनोपमा समुच्चयोपमाप्यस्ति वक्ष्यमाणा, न केवलं पूर्वोक्ताः। कीदृशी? तव मुखं कर्तृभूतमिन्दुमन्वेत्यनुगच्छति। न कान्त्यैव न सौम्यत्वेन गुणेन केवलेन, किं तु ह्लादनाख्येन प्रीणनेन च कर्मणा क्रियया अन्वेति ईदृशी एवंप्रकारावस्थया ह्लादनमित्याख्या संज्ञा यस्य कर्मण इति विग्रहः। कान्त्या ह्लादकत्वेन च त्वन्मुखमिन्दुनोपमीयत इत्यर्थ इति॥

## हृदयङ्गमा

समुच्चयोपमामाह, समुच्चयेति।—तव मुखं कान्त्यैव केवलया कान्त्या, न, ह्लादनाख्येन प्रह्लादनजनकेन, कर्मणा च, (चकारः समुच्चयद्योतकः) इन्दुं चन्द्रम्, अन्वेति अनुगच्छति, अनुकरोतीत्यर्थः, इति ईदृशी एवम्प्रकारा, समुच्चयोपमा अपि अस्ति। (ईदृशीत्यनेन केवलगुणसमुच्चये केवलक्रियासमुच्चये वा साधारणसमुच्चयेऽपि वा अयमलङ्कारो बोद्धव्यः)॥२१॥

## प्रभा

समुच्चयोपमां दर्शयति—**समुच्चयेति**। तव मुखं कान्त्यैव केवलकान्त्या एव। इन्दुं नान्वेति। ह्लादनाख्येन संतोषजननाख्येन। कर्मणा क्रियया च। चशब्दः समुच्चयद्योतकः। तेनापि इत्यर्थः।

अन्वेति अनुकरोति। इतीदृशी एतादृशवैचित्र्यविशिष्टा समुच्चयोपमा अपि अस्ति। अत्र गुणक्रिययोः समुच्चयः। ईदृशीत्यनेन केवलगुणकेवलक्रियासमुच्चये सधारणधर्म-समुच्चयेपि इयं ज्ञेया।।२१।।

## विवृति

समुञ्चयोपमाऽप्यस्ति न कान्त्यैवैकया ह्लादनाख्येन चानन्दजनकत्वेन च कर्मणा त्वन्मुखमिन्दुमन्वेतीतीदृशी।।२१।।

---

**त्वय्येव त्वन्मुखं दृष्टं दृश्यते दिवि चन्द्रमाः।**
**इयत्येव भिदा नान्येत्यसावतिशयोपमा॥२२॥**

## रत्नश्री

तव मुखं त्वय्येव भवत्यामेव दृष्टम्, न दिवि। चन्द्रमाश्चन्द्रस्तु दिवि नभस्येव दृश्यते, न त्वयि। इयत्येव परिमाणभिन्नाश्रयतामात्रलक्षणा भिदा भेदो विद्यते नान्या काचिद् एतद्व्यतिरिक्ता। अन्यथा सर्वथा साम्यमेवानयोरित्यनेकभेदसम्भवे अपि अतिशयस्येदृशस्य विवक्षया कविनानयोः साम्यकथनातिशयपरत्वेनातिशयोपमा आख्यायत इति॥

## हृदयङ्गमा

अतिशयोपमां निरूपयति, त्वयीति।–तव मुखं त्वयि एव दृष्टं, चन्द्रमाः दिवि आकाशे, दृश्यते, इयती आश्रयमात्रनिबन्धना एव, भिदा प्रभेदः, मुखचन्द्रमसोरिति शेषः, न अन्या न गुणक्रियादिकृता इति भावः, असौ अतिशयोपमा, अतिशयश्च मुखचन्द्रमसोः विभिन्नाश्रयगतत्वेन गुणक्रियाकारादिगतत्वेन च सत्यपि महति भेदे नान्येत्यनेनाभिन्नत्वारोपरूपः, ईदृशातिशयस्य वैचित्रातिशयप्रतिपादकत्वात् अतिशयाख्येयमुपमा इति दिक्। (अत्र सादृश्यवाचकेवादिशब्दाप्रयोगात् सादृश्यं व्यञ्जनागम्यं, व्यञ्जना च वक्तृतात्पर्य्यगतया भेदाभेदप्रतीत्या लब्धावकाशा; न च अत्ररूपकध्वनिः, आश्रयभेदेन भेदस्यैव स्पष्टतया प्रतिपादनेन अभेदप्रतीतेरभावादिति ध्येयम्)॥२२॥

## प्रभा

अतिशयोपमां दर्शयति—**त्वय्येवेति।** त्वन्मुखं त्वयि एव दृष्टम्। दिवि आकाशे। चन्द्रमा दृश्यते। एवं मुखचन्द्रमसोर्भिन्नाश्रयत्वं प्रतिपादितम्। इयती एव भिदा, एतावानेव भेदः। नान्या अन्यो भेदो न। गुणक्रियादिकं सकलं समम् इति भावः। इति एवं वैचित्र्यशालिनी अतिशयोपमा भवतीति शेषः। उपमानोपमेययोर्गुणक्रियादिभिर्महत्यपि भेदे किंचिद्भेदप्रदर्शनपुरःसरं नान्यो भेद इति अभिन्नाध्यवसानेन उपमेयस्य गुणक्रियातिशयो वर्णितो भवति। अतः अतिशयोपमा। अत्र इवादिसाधर्म्यवाचकशब्दाप्रयोगात् साम्यं व्यञ्जनागम्यमेव। व्यञ्चना च वक्तृवैशिष्ट्यसचिवया भेदाभेदप्रतीत्या प्राप्तप्रसरा वर्तते। नात्र रूपकध्वनिः। आश्रयभेदस्य स्पष्टप्रतिपादनेन अभेदप्रतीतेरभावात्। नापि व्यतिरेकः। उपमानादुपमेयगताधिक्यस्य अनुद्भवात्। तस्मादुपमा एव इयम्।।२२।।

## विवृति

त्वय्येव त्वन्मुखं दृष्टं न दिवि दृश्यते दिवि चन्द्रमाः न त्वयीति इयत्येव भिदा इयानेव भेदो मुखचन्द्र(यो)र्न कान्तिकृतोऽस्तीत्यतिशयख्यापनादतिशयोपमा।।२२।।

**त्वयीति।** भिदा भेदः।।२२।।

---

**मय्येवास्या मुखश्रीरित्यलमिन्दोर्विकत्थनैः।**
**पद्मेऽपि सा यदस्त्येवेत्यसावुत्प्रेक्षितोपमा॥२३॥**

## रत्नश्री

यस्या मृगदृशो मुखश्रीर्वदनकान्तिर्मय्येव वर्तते, नान्यत्रेत्येवंरूपैर्विकत्थनैः श्लाघयाऽलम्। कृतमिन्दोश्चन्द्रस्य। [44b] न विकत्थनीय- मित्थमिन्दुना। किमिति? यद् यस्मात्। सा मुखश्रीः. पद्मेऽपि न केवलमिन्दौ। अस्त्येव न नास्ति। इत्युत्प्रेक्षया असतोऽपि तथाविकत्थनस्याध्यासेन वदनमिन्दुनोपमीयत इति। उत्प्रेक्षितोपमैवासौ तादृशी वेदितव्येति॥

## हृदयङ्गमा

उत्प्रेक्षितोपमां लक्षयति, मयीति।—अस्या मुखश्रीः मुखकान्तिः, मुखसदृशकान्तिरित्यर्थः, मयि एव न अन्यत्र, इन्दोः चन्द्रस्य, इति एवं, विकत्थनैः आत्मश्लाघनैः, अलं, यत् यस्मात्, सा कान्तिः, पद्मेऽपि अस्ति पद्ममपि तत्सदृशकान्तीत्यर्थः, असौ उत्प्रेक्षितोपमा, इन्दौ आत्मश्लाघाया अतात्त्विकत्वेन नायकस्य चाटूक्त्या तथा समारोपितत्वादिति भावः। (साम्यञ्च अत्र व्यङ्ग्यम्। नव्यास्तु अत्र चन्द्रस्य विकत्थनासम्बन्धेऽपि तत्सम्बन्धोक्तेरसम्बन्धे सम्बन्धरूपातिशयोक्तिरित्याहुः। केचिदत्र उत्प्रेक्षितोपमानामसादृश्येन नवीनमतमनुसृत्य उत्प्रेक्षाऽलङ्कारमाचक्षते, तन्न; उत्प्रेक्षायाः सम्भावनारूपत्वात् सम्भावनायाश्च उत्कटैककोटिकसंशयरूपत्वात् प्रकृते च तदभावदित्यवधेयम्)॥२३॥

## प्रभा

उत्प्रेक्षितोपमां दर्शयति–मय्येवेति। अस्याः प्रकृतनायिकायाः। मुखश्रीः मुखलक्ष्मीः। मुखशोभासदृशशोभेति निदर्शनागर्भेयमुक्तिः। मय्येव इति एवंप्रकारैः। इन्दोर्विकत्थनैः श्लाघावचनैरलम्। यत् यस्मात् सा श्रीः पद्मेपि अस्त्येव वर्तत एव इति एतादृशी वर्णना उत्प्रेक्षितोपमा ज्ञेया। अत्र चन्द्रमसा आत्मश्लाघाया अतात्त्विकत्वेन नायकस्य चाटूक्त्या संभावनयोत्प्रेक्षितत्वेन इयम् उत्प्रेक्षितोपमा। अत्र साम्यं व्यञ्जनागम्यम्। एवमेवाग्रेपि तत्र तत्र बोद्धव्यम्।।२३।।

## विवृति

मय्येवास्याः कान्तायाः मुखश्रीर्वदनशोभेत्यलं प्रतिषेधः (?)। इन्दोर्विकत्थनैः श्लाघनैः। कुतो विकत्थनैरलमित्याह–पद्मेऽपि सा यदस्त्येव। (न)केवलमस्य मुखश्रीश्चन्द्रे तथा पद्मेऽप्यस्तीत्यसावुत्प्रेक्षितोपमा। चन्द्रः किलैवं मन्यत इति कामुकेनोत्प्रेक्ष्यत इत्युत्प्रेक्षा। चन्द्रपद्मगतकान्तिसादृश्याच्च मुखस्येत्यु(स्यो)पमा।।

**मयीति**। अस्याः मुखश्रियं लब्ध्वा हि चन्द्रमाः आत्मानं बहुमनुत इत्युत्प्रेक्षा। उत्प्रेक्षितार्थविशेषिता उपमा उत्प्रेक्षितोपमा। विकत्थनैः श्लाघादिभिः।।२३।।

---

**यदि किञ्चिद् भवेत्पद्ममुद्भ्रु विभ्रान्तलोचनम्।**
**तत् ते मुखश्रियं धत्तामित्यसावद्भुतोपमा॥२४॥**

## रत्नश्री

उद्धृते भ्रुवौ विभ्रान्ते च लोचने यस्मिन्। तत्तादृशं किञ्चित् किमपि यदि भवेत् क्वचित् तदीदृशं ते तव सुन्दरि मुखश्रियं धत्तां न निषिध्यते। किं त्वाश्चर्यमिदं दुर्लभमीदृशमिति। अभूतोद्भावनेन वदनपद्मेनोपमीयत इति। असावियमेवंभूता अद्भुतोपमा ज्ञातव्येति॥

## हृदयङ्गमा

अद्भुतोपमामाह, यदीति।—हे सुभ्रु! यदि किञ्चित् पद्मं विभ्रान्तलोचनं विघूर्णितनयनं, भवेत्, तत् तदा, ते तव, मुखश्रियं वदनकान्तिं, धत्तां धारयतु, इति एवंरूपा, असौ अद्भुतोपमा; अत्रोपमेयभूतमुखस्यैव धर्म्मो विभ्रान्तलोचनत्वं, न तु तत्प्रतियोगिन्युपमानभूते पद्मे तत् सम्भवति, यद्यर्थबलात् सम्भावनया असौ प्रतीयते, तेन च सादृश्योद्बोधात् समधिकचमत्कार इत्युपमाया अद्भुतत्वात् इयमद्भुतोपमा। (उक्तञ्च,—"यत्रोपमेयधर्मा: स्युरुपमानेऽधिरोपिता:। चमत्कारविधानार्थं तामाहुरद्भुतोपमाम्॥" इति। नव्यास्तु एनामतिशयोक्तिमाहु: ; तदुक्तं प्रकाशकारेण यथा,—"निगीर्य्याध्यवसानन्तु प्रकृतस्य परेण यत्। प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनम्॥" इति। उदाहृतञ्च विश्वनाथेन यथा,—"यदि स्यान्मण्डले सक्तमिन्दोरिन्दीवरद्वयम्। तदोपमीयते तस्या वदनं चारुलोचनम्॥" अत्र यद्यर्थबलादाहृतेन सम्बन्धेन

सम्भावनया सम्बन्धादसम्बन्धे सम्बन्धरूपातिशयोक्ति-रित्यभिप्रायः)॥२४॥

## प्रभा

अद्भुतोपमामाह–**यदीति**। सुभ्रु हे सुन्दरि। यदि पद्मं किंचिन् मनाक्। विभ्रान्तलोचनं घूर्णितनयनम् भवेत्। तत् तर्हि। ते तव मुखश्रियं धत्ताम् प्राप्नोतु। इति असौ अद्भुतोपमा। विभ्रान्तलोचनादयो धर्मा मुखस्यैव तेषां संभावनया पद्मस्थितिकल्पनेन मुखसादृश्यवर्णनं चमत्कारातिशयाय भवति इतीयमद्भुतोपमा। यदुक्तम्–

यत्रोपमेयधर्माः स्युरुपमानेधिरोपिताः।
चमत्कारविधानार्थं तामाहुरद्भुतोपमाम्॥ इति।

प्रकाशकारादयस्तु एनामतिशयोक्तिमाहुः। तदुक्तं प्रकाशे–

प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनम्। उदाहृतं च–

राकायामकलङ्कं चेदमृतांशोर्भवेद्वपुः।
तस्या मुखं तदा साम्यपराभवमवाप्नुयात्॥ (७६२ पत्रे) इति।

इदमत्रावधेयम्। यत्र संभावनयापि पर्यन्त औपम्यस्य अनिष्पत्तिः कवेरभिप्रेता तत्र नोपमा किंतु अतिशयोक्तिः। यथा प्रस्तुतोदाहरणे सुधांशुवपुषो अकलङ्कभवनमशक्यमतस्तेन मुखसाम्यप्रापणमपि अशक्यमेवेत्यत्र कवितात्पर्यमस्ति। अतो नेयमुपमा किंतु अतिशयोक्तिः। यथा वा–

उभौ यदि व्योम्नि पृथक् प्रवाहौ आकाशगङ्गापयसः पतेताम्।
तदोपमीयेत तमालनीलमामुक्तमुक्तालतमस्य वक्षः॥

इत्यादावपि अनयैव दिशा अतिशयोक्तिः।

पुष्पं प्रवालोपंहितं यदि स्यान्मुक्ताफलं वा स्फुटविद्रुमस्थम्।
ततोनुकुर्याद्विशदस्य तस्यास्ताम्रोष्ठपर्यस्तरुचः स्मितस्य।।

इत्यादौ तु नातिशयोक्तिः। पुष्पस्य प्रवालोपहितत्वस्य संभवात्। नात्र कवेरौपम्याभावप्रदर्शने यत्नः। केवलं चारुतातिप्रदर्शनायैव पेयं संभावना। अत इयं कविकल्पितोपमानतया उत्पाद्योपमेति प्राचीनैर्व्यवहृतास्ति। आचार्यदण्डिमते तु उभयत्रापि अद्भुतोपमैवेति सुधीभिर्विचार्यम्।।२४।।

## विवृति

अद्भुतोपमामाह—

यदि किञ्चिद्भवेत् पद्मं भ्रूः (सुभ्रु) उन्नतभ्रूः (भ्रु) तथा विभ्रान्तलोचनं विभ्रान्ते लोचने यस्य तद्विभ्रान्तलोचनम्। तत्त तव मुखश्रियं धत्तां नान्यथाद्भुतमित्यद्भुतोपमा। अद्भुतत्वं च तथाभूतस्य पद्मस्याभा(वा)दिति।।

**यदीति।** (?)विभ्रान्तलोचनं भ्रूविलाससहितं परिभ्रान्तनेत्रम्।।२४।।

---

**शशीत्युत्प्रेक्ष्य तन्वङ्गि! त्वन्मुखं त्वन्मुखाशया।**
**इन्दुमप्यनुधावामीत्येषा मोहोपमा स्मृता॥२५॥**

## रत्नश्री

तन्वङ्गीति प्रियामन्त्रणम्। अयमसौ शशी चन्द्र इति तव मुखमुत्प्रेक्ष्य अध्यवसाय चन्द्रबुद्ध्यानुधावामि। न केवलमेषा भ्रान्तिः। किं तु त्वन्मुखाशया तवाननमिदमिति त्वद्वदनबुद्ध्या इन्दुमप्यनुधावामीति अनुगच्छामि। अयमपरो विपर्यासः। इत्येवं मोहेन भ्रान्त्या चन्द्रमुखयोरुपमानोपमेयभावप्रतीतिरिति। एषा इयमीदृशी मोहोपमाख्यायत इति॥

## हृदयङ्गमा

मोहोपमां निरूपयति, शशीति।–हे तन्वङ्गि! कृशाङ्गि! तव मुखं शशीति उत्प्रेक्ष्य सम्भाव्य, भ्रान्त्या अभिन्नं बुद्ध्या इत्यर्थः, तव मुखाशया वदनदर्शनस्पृहया, इन्दुमपि अनुधावामि, इत्यत्र, मोहोपमा स्मृता, कविभिरिति शेषः, मोहो भ्रमज्ञानं, तेन सादृश्यप्रतीतेरियं मोहोपमा इत्यभिप्रायः। अत्र हि मोहेन इन्दोर्मुखत्वेन ज्ञानम् इति बोध्यम्। (तथा चोक्तं, –"प्रतियोगिनमारोप्य तदभेदेन कीर्त्तनम्। उपमेयस्य यन्मोहोपमाऽसौ भ्रान्तिमद्वचः॥" इति। दर्पणकारस्तु एना भ्रान्तिमदलङ्कारमाह; यथा,–"साम्यादतस्मिंस्तुद्बुद्धिर्भ्रान्तिमान् प्रतिभोत्थिता" इति। साम्यञ्चात्र व्यङ्ग्यम्)॥२५॥

## प्रभा

मोहोपमां दर्शयति–**शशीति।** हे तन्वङ्गि कृशाङ्गि। तव मुखं

शशी इत्युत्प्रेक्ष्य सादृश्यादभिन्नं परिकल्प्य भ्रान्तिविषयीकृत्येर्थः। अनन्तरं त्वद्विरहे शशिनं दृष्ट्वा। त्वन्मुखाशया तव वदनस्पृहया त्वन्मुखमिदमेवेति बुद्ध्या इन्दुमपि अनुधावामि तद्दर्शनबद्धरतिर्भवामि। इत्येषा इयं मोहोपमा स्मृता। कविभिरिति शेषः। मोहो भ्रान्तिः सादृश्येन इन्दौ मुखभ्रान्तिस्तेन उपमा मोहोपमेति। तदुक्तमाग्नेये–

प्रतियोगिनमारोप्य तदभेदेन कीर्तनम्।
उपमेयस्य यन्मोहोपमासौ भ्रान्तिमद्वचः।। इति।

अत्र साम्यं व्यङ्ग्यम्। शशी इन्दुरिति प्रक्रमभङ्गोपि पूर्ववन्न दोषायेति बोद्धव्यम्। अर्वाचीनानां मतेत्र भ्रान्तिमानलंकारः। तदुक्तं अप्पय्यदीक्षितेन–

कविसंमतसादृश्याद्विषये पिहितात्मनि।
आरोप्यमाणानुभवो यत्र स भ्रान्तिमान् मतः।।
(चि. मी. ६४-६५ पत्रयोः) इति।

अत्राप्पय्यदीक्षितोक्तानि उदाहरणानि मनोहराणीति प्रदर्श्यन्ते–

कपाले मार्जारः पय इति कराँल्लेढि शशिन-
स्तरुच्छिद्रप्रोतान् बिसमिति करी संकलयति।
रतान्ते तल्पस्थान् हरति वनिताप्यंशुकमिति
प्रभामत्तश्चन्द्रो जगदिदमहो विप्लवयति।।

क्वचिद् भ्रान्तेरुत्तरोत्तरं पल्लवेन चमत्कारः–

बल्लालक्षोणिपाल त्वदहितनगरे संचरन्ती किराती
कीर्णान्यादाय रत्नान्युरुतरखदिराङ्गारशङ्काकुलाङ्गी।

कृत्वा श्रीखण्डखण्डं तदुपरि मुकुलीभूतनेत्रा धमन्ती
श्वासामोदानुधावन्मधुकरनिकरैर्धूमशङ्कां तनोति।।

क्वचिद् भिन्नकर्तृकोत्तरोत्तरभ्रान्तिनिबन्धनेन चमत्कारः। यथा–

शिञ्जानैर्मञ्जरीति स्तनकलशयुगं चुम्बितं चञ्चरीकै-
स्तत्त्रासोल्लासलीलाः किसलयमनसा पाणयः कीरदष्टाः।
तल्लोपायालपन्त्यः पिकनिनदधिया ताडिताः काकलोकै-
रित्थं चौलेन्द्रसिंह त्वदरिमृगदृशां नाप्यरण्यं शरण्यम्।।

इति।।२५।।

## विवृति

मोहोपमामाह–

इति। यदेतत् त्वन्मुखं तदेव शशीति मत्वा त्वन्मुखाशया त्वदाननस्पृहया इन्दुमप्यनुधावामीत्येषा मोहोपमा। मोहश्च मुखचन्द्रमसोर्विवेकानवगतेः।।२५।।

**किं पद्ममन्तर्भ्रान्तालि किं ते लोलेक्षणं मुखम्।**
**मम दोलायते चित्तमितीयं संशयोपमा॥२६॥**

## रत्नश्री

अन्तर्भ्रान्तौ अली भ्रमरौ यस्मिन् तदीदृशं पद्मं किमिदम्। लोले चले ईक्षणे लोचने यस्मिन् तादृशं वा तवेदं मुखम्। इति मम चित्तं मनो दोलायते दोलेवाचरति। एवं पक्षद्वयपरिग्रहात् संशेत इत्यर्थः। इतीयमीदृशी संशयावेशेन पद्ममुखेनौपम्यावगमात् संशयोपमा प्रतीयत इति॥

## हृदयङ्गमा

संशयोपमां निरूपयति, किमिति।—अन्तर्भ्रान्तौ अली यस्य तत् पद्मं किम्? लोले चञ्चले, ईक्षणे नेत्रे यस्मिन् तत् ते तव, मुखं किम्? मम चित्तम् इति इत्थं, दोलायते संशेते, इयं संशयोपमा संशयस्य औपम्यपर्य्यवसायित्वात्। (अत्र चञ्चलनयनवदानने अन्तर्भ्रान्तभ्रमरवत् पद्मस्य सन्देहस्तु प्रकृतसन्देहाभावेऽपि भ्रान्तालित्वलोलेक्षणत्वयोः सादृश्यप्रतीत्या कविप्रतिभोत्थित एव। अत एवात्र नवीनाः पृथगेव सन्देहालङ्कारमिच्छन्ति; उक्तञ्च विश्वनाथेन, यथा,—"सन्देहः प्रकृतेऽन्यस्य संशयः प्रतिभोत्थितः" इति। अत्रापि साम्यं व्यञ्जनया गम्यते)॥२६॥

## प्रभा

संशयोपमामाह—**किमिति**। अन्तः भ्रान्तौ अली यस्यैतादृशम्। किमेतत् पद्मम्। अथवेदं ते तव लोले चञ्चले ईक्षणे नयने यस्मिन्

एतादृशं किं मुखम् इत्येवं विरुद्धनानार्थावगाहि मम चेतो दोलायते संशयं प्राप्नोति। इयं संशयोपमा। एकस्मिन् धर्मिणि विरुद्धनानार्थावमर्शः संशयः। अस्य च सादृश्यपर्यवसायित्वादुपमा-भेदे संग्रहः। अत्र भ्रान्तालित्वविलोलेक्षणत्वयोर्बिम्बानुबिम्बिता। तया च सादृश्यविकासः। अर्वाचीनास्तु इमां संदेहालंकारकारणमिति स्वीकुर्वन्ति। तदुक्तं कविराजेन–सादृश्यमूला भासमानविरोधका समबला नानाकोट्यवगाहिनी धी रमणीया संदेहालंकृतिरिति। उदाहरति च–

अधिरोप्य हरस्य हन्त चापं परितापं प्रशमय्य बान्धवानाम्।
परिणेष्यति वा न वा युवायं निरपायं मिथिलाधिनाथपुत्रीम्।।

(२५६ पत्रे)

इति।।२६।।

## विवृति

किं पद्ममन्तर्भ्रान्तालि अन्तर्भ्रान्तोऽलिः भ्रमरो यस्य तदन्तर्भ्रान्तालि। किं ते लोलेक्षणं मुखं लोले तरले ईक्षणे चक्षुषी यस्य तल्लोलेक्षणं किं वा त्वदीयं मुखमिदमिति मम डोलायते चित्तम्। अन्तर्भ्रान्तालिनः पद्मस्य लोले(क्षणस्य मुखस्य) च समानधर्मत्वात् 'समानानेकधर्मोपपत्तेश्च संशयः' इति संशय इति संशयोपमा।।२६।।

---

**न पद्मस्येन्दुनिग्राह्यस्येन्दुलज्जाकरी द्युतिः।**
**अतस्त्वन्मुखमेवेदमित्यसौ निर्णयपमा।।२७।।**

## रत्नश्री

पद्मस्य द्युतिः कान्तिः इन्दोर्लज्जाकरी न भवति। नेन्दुं ह्लेपयतीत्यर्थः। किं विशिष्टस्य इन्दुना निग्राह्यस्य अभिभवनीयस्य। तदुदये सङ्कोचात्। इदमत्र कारणम्-यदि तु पद्ममिदमभविष्यत्, नेन्दुमह्लेपयिष्यत्। ह्लेपयति च। अतोवसीयते तव मुखमेवेदं तस्यैव तादृशत्वात् न पद्ममिति। असावियमेवंविधा निर्णयोपमा विज्ञायते मुखमिदं न पद्ममिति निश्चयमुखेनोपमावगमादिति।।

## हृदयङ्गमा

निर्णयोपमां निरूपयति, नेति।—इन्दुना निग्राह्यस्य तिरस्करणीयस्य, निगृहीतस्य इत्यर्थः, पद्मस्य इन्दुलज्जाकरी इन्दोः चन्द्रस्य, लज्जाकरौ लज्जाजननी, चन्द्रापेक्षया मनोज्ञा इत्यर्थः, द्युतिः कान्तिः, न नास्ति इत्यर्थः, इन्दुपराजितः कथमिन्दुं पराजयितुं शन्कुयादिति भावः, अतः इदं तव मुखमेव, न पद्मं, तव मुखस्यैव इन्दुपराजेतृत्वात् इति भावः। असौ निर्णयोपमा उपमेयस्य निर्णयेन सादृश्यावगमात् तदाख्येयमुपमेत्यर्थः ; मुखं वा पद्मं वा इत्यादिसंशयात् परं निश्चयस्य सम्भवात् संशयोत्तरनिर्णयः एवायमलङ्कारो बोद्धव्यः। (उक्तञ्च अग्निपुराणे,—"उपमेयस्य संशय्य निश्चयान्निश्चयोपमा" इति। इहापि नवोनैरुक्तः निश्चयालङ्कारो भवितुमर्हति। निर्णयस्यसंशयोत्तरकालिकत्वात् मुखं

पद्मं वा इति संशयानन्तरं मुखमेवेति निर्णयत्वात् निर्णयस्यैवालङ्कारत्वात्। उक्तञ्च विश्वनाथेन,- "अन्यन्निषिध्य प्रकृतस्थापनं निश्चयः पुनः" इति)।।२७।।

## प्रभा

निर्णयोपमां वक्ति–**न पद्मस्येति।** इन्दुनिग्राह्यस्य चन्द्रनिगृहीतस्य चन्द्राभिभाव्यस्य पद्मस्य। इन्दुलज्जाकरी अपकर्षत्वेन संकोचमापादयित्री द्युतिः कान्तिः। न। निगृहीतस्य निग्राहकत्वाभावादिति भावः। अत इदम् इन्दुनिग्राहकत्वेन पुरोभासमानं वस्तु त्वन्मुखमेव तस्यैव तत्सामर्थ्यात्। एवशब्देन न पद्मंमिति पद्मस्य व्युदास इत्यसौ निर्णयोपमा भवति। उपमेयस्य निर्णयभङ्ग्या सादृश्यप्रकाशनादिति भावः। संशयानन्तरमेव निर्णयस्योद्भवात्। अत्रेदं पद्मं वा मुखं वेति प्रथमं संशयः परिकल्पनीयः। संशयोत्तरस्यैव निर्णस्य निर्णयालंकारत्वमुक्तमग्निपुराणे यथा–उपमेयस्य संशय्य निश्चयान निश्चयोपमा। (३४४. १८) इति। निश्चयोपमा निर्णयोपमा इति पर्यायौ। उदाहरणान्तरं यथा–

किं तावत् सरसि सरोजमेतदारा-
दाहोस्विन्मुखमवाभासते तरुण्याः।
संशय्य क्षणमिति निश्चिकाय कश्चि-
द्बिब्बोकैर्बकसहवासिनां परोक्षैः।। इति।
विश्वनाथादय एनां निश्चयालंकृतिमाहुः।।२७।।

## विवृति

निर्णयोपमामाह--

इन्दुना सङ्कोचं नीयमानस्य पद्मस्य इन्दुलज्जाकरणशीला न कान्तिरस्ति। त्वन्मुखमेवेन्दुं स्वकान्त्या लज्जयति। अतस्त्वन्मुखमेवेदं न पद्ममिति निर्णयोपमा।।

नेति। निर्णयो निश्चयः।।२७।।

---

**शिशिरांशुप्रतिद्वन्द्वि श्रीमत् सुरभिगन्धि च।**
**अम्भोजमिव ते वक्त्रमिति श्लेषोपमा स्मृता॥२८॥**

## रत्नश्री

तव वक्त्रमम्भोजमिव शिशिरांशोश्चन्द्रस्य प्रति[45a]द्वन्द्वि प्रत्यनीकं मुखस्य तत्समानकान्तित्वात्। अम्भोजस्य च तदुदये सङ्कोचभजनात्। शब्दश्लेषः। श्रीमत् कान्तियुक्तं मुखमम्भोजं च श्रीर्देवता तत्र वसतीति श्रुतेः। अयमपि शब्दश्लेषः। उभयोरपि कान्तियोगादर्थश्लेषो वा। सुरभिरिष्टो गन्धोऽस्येति सुरभिगन्धि द्वयमपीत्यर्थश्लेषः। चकारः समुच्चये। इत्येवं श्लेषपरिग्रहणे चन्द्रवक्त्रयोरुपमाप्रयोगात् श्लेषोपमैवेदृशी मतेति।

## हृदयङ्गमा

श्लेषोपमां निरूपयति, शिशिरेति।–ते वक्त्रं वदनम्, अम्भाजमिव शिशिरांशुप्रतिस्पर्द्धि शिशिरांशुः चन्द्रः, प्रतिस्पर्द्धी विरोधी यस्य तत्, श्रीमत् सुश्रीकं, तथा सुरभिगन्धि च, (विशेषणत्रयम् उभयत्र समानम्) अथवा वक्रपक्षे,–शिशिरांशुप्रतिस्पर्द्धिनी या श्रीः शोभा तद्वत्, इत्यत्र, श्लेषोपमा स्मृता, कविभिरिति शेषः, श्लेषेण उपमानोपमेयगततत्तत्साधर्म्यस्य द्योतनात् इयं श्लेषोपमेति भावः। (अत्र श्लेषवैचित्रास्याप्रधानत्वात् सादृश्यवैचित्रास्य च मुख्यत्वात् विद्यमानेऽपि श्लेषे न तत्त्वने व्यपदेशः,. किन्तु श्लेषोपमैव; श्लेषश्च अत्र अर्थश्लेष एव, प्रतिस्पर्द्धादिशब्दानां परिवृत्तावपि श्लेषत्वाखण्डनात्, अलङ्कारादीनां शब्दार्थगतत्वव्यवस्थितौ हि

शब्दपरिवृत्तिसहत्वासहत्वाभ्यां नियमनात्। शब्दपरिवर्त्तनासहायां समानोपमायामस्य शब्दगतत्वमित्यवधेयम्)॥२८॥

## प्रभा

श्लेषोपमां दर्शयति **शिशिरांश्विति।** ते वक्त्रम् अम्भोजमिव शिशिरांशुप्रतिस्पर्धि शिशिरांशुश्चन्द्रस्तस्य प्रतिस्पर्धि प्रतिद्वन्द्वि। अम्भोजपक्षे शिशिरांशुः प्रतिस्पर्धी यस्येति बहुव्रीहिः। श्रीमत् सुश्रीकम्। प्रशंसायां मतुप्। सुरभिगन्धि सुरभिघ्राणतर्पको गन्धो यस्य तत्। इति विशेषणत्रयं श्लेषेणोभयत्र संबन्धं लभते। अत इयं श्लेषोपमा स्मृता। केचित्तु वक्त्रपक्षे शिशिरांशुप्रतिद्वन्द्विश्रीमद् इत्येकं पदं परिकल्प्य शिशुरांशुप्रतिद्वन्द्विनी या श्रीस्तद्विशिष्टम् इत्यर्थं प्रकाशयन्ति। पूर्वपद्धत्या अभङ्गश्लेषो भवति। अनया तु सभङ्गश्लेषो भवतीति ज्ञेयम्। श्लेषेण उपमा उपमानोपमेयगतसाधर्म्यं द्योत्यते यत्र सा श्लेषोपमेति निरुक्तिः। श्लेषश्चात्र अर्थश्लेषः। शब्दश्लेषस्य वक्ष्यमाणसमानोपमाविषयत्वादिति अनुपदमेव स्फुटीभविष्यति। श्लेषस्य शब्दार्थवृत्तित्वं शब्दपरिवृत्त्यसहत्वसहत्वाभ्यां ज्ञेयम्। अत्र श्लेषस्य विद्यमानत्वेपि न श्लेषालंकारः। सादृश्यवैचित्र्ये श्लेषवैचित्र्यस्य निलीनत्वात्। यत्र यद्वैचित्र्यं प्रधानतयाविर्भवति तत्रैव तदलंकारव्यवहारः। एतेनात्र अलंकारान्तरस्य श्लेषस्य सुद्भावेपि न तत्त्वेन व्यपदेशः। श्लेषवैचित्र्यस्य प्रधाने सादृश्यवैचित्र्ये निलीनतया व्यपदेशकत्वाभावात्। प्राधान्येन व्यपदेशा भवन्ति इत्युक्तेः। इति केषांचिदुक्तिरपि एतदभिप्रायिकैवेति बोद्धव्यम्। अत्र श्लेषानुप्राणिता उपमा ज्ञेया॥२८॥

## विवृति

श्लेषोपमामाह–

पद्मं चन्द्रश्च द्वौ द्वौ च (चन्द्रप्रतिद्वन्द्वि; अथवा चन्द्रविद्वेषि) लक्ष्मीधाम सुरभिमकरन्दम्। मुखमपि शिशिरांशुप्रतिस्पर्धि (श्रीमत् शो) भावात् (वत्) सुरभिगन्धि सुरभिगन्धिनिश्वासमिति।।

**शिशिरेति।** अम्भोजपक्षे–शिशिरांशुः प्रतिद्वन्द्वी बाधकः यस्य इति शिशिरांशुप्रतिद्वन्द्वि; श्रीमत् लक्ष्मीनिवासभूतम्। वक्त्रपक्षे–शिशिरांशोः प्रतिद्वन्द्वि चन्द्रसमानम्; श्रीमत् कान्तिमत्। सुरभिगन्धि इति उभयत्र समानम्।।२८।।

---

**सरूपशब्दवाच्यत्वात् सा समानोपमा यथा।**
**बालेवोद्यानमालेयं सालकाननशोभिनी॥२९॥**

---

## रत्नश्री

इयमुद्यानमाला प्रमदवनराजिर्बालेव स्त्रीव। कथं? सालकाननशोभिनी। बाला तावत् सहालकेन केशसन्निवेशविशेषेण वर्तते यत् सालकमाननं तेन शोभते सालकाननशोभिनी। उद्यानमालापि सलानां वृक्षविशेषाणां काननेन वनेन शोभते। एवंरूपा या सा तादृशी समानोपमा समाख्यायते। कुतः सरूपेण सदृशेन स्वरूपतो नार्थतः तस्य भेदात्, यथोक्तमनन्तरम्। शब्देन सालकाननशोभिनीत्येवंविधेन वाच्यत्वात्, प्रकाश्यत्वात् तस्या इति गम्यते। यथेति निदर्शने। ननु श्लेषोपमैवेयं, सालकाननशोभिनीति शब्दश्लेषात्। सा च पूर्वमुक्ता, तत्किमनया? को वा तयोर्भेदः? उच्यते। पूर्वं श्लेषाप्रयोगेऽप्युपमा गम्यते। अम्भोजमिव ते वक्त्रमिति श्लेषानुवेधादृते व्यापदिश्यते। इह तु श्लेषानुत्प्रेक्षायामुपमैव नावसीयते। बालेवोद्यानमालेति। श्लेषाभिधान एव केवलमवगम्यते सालकाननशोभिनीति। अतस्तादृशेन शब्देनेयमुच्यते। अत एवाह-सरूपशब्दवाच्यत्वादिति। ततः समानोपमैवेयमाख्यायते, न श्लेषोपमेत्यलं प्रपञ्चेन॥

## हृदयङ्गमा

समानोपमां लक्ष्यति, सरूपेति।-सरूपशब्दैः समानरूपैः, अर्थभेदाद्भिन्नैरपि अभिन्नप्रयत्नोच्चार्य्यत्वेन अभिन्नवत्

प्रतीयमानतत्तद्वर्णात्मकस्वरूपैः शब्दैरित्यर्थः, वाच्यत्वात् साधर्म्यस्य प्रतिपाद्यत्वात्, सा प्रसिद्धा, समानोपमा। यथाशब्दः उदाहरणप्रदर्शनार्थः। इयम् उद्यानमाला उपवनराजिः, बाला कामिनीव, सालकाननशोभिनी सालानां वृक्षभेदानां, काननेन वनेन, समूहेन इत्यर्थः, शोभते इति तथोक्ता, अन्यत्र,–सालकम् अलकालङ्कृतं, यत् आननं तेन शोभते इति। (अत्र साधारणधर्मस्य सालकाननशोभित्वस्य शब्दश्लेषेण द्योतनात् शब्दश्लेशमूलैवेयं, दोषगुणालङ्काराणां शब्दार्थगतत्वव्यवस्थितौ शब्दपरिवृत्तिसहत्वासहत्वयोर्मूलत्वेन निर्द्धारणात्। ननु गुणक्रियासाम्यस्यैव उपमाप्रयोजकता युक्ता, तत्र साधर्म्यस्य तात्त्विकत्वात्; शब्दसाम्यस्य तु न तथा इत्यपि न वाच्यं, गुणक्रियासाम्यवत् शब्दसाम्यस्याप्युपमाप्रयोजकत्वात्; तथा चोक्तं रुद्रटेन,–"स्फुटमर्थालङ्कारावेतौ उपमासमुच्चयौ किन्तु आश्रित्य शब्दमात्रं सामान्यमिहापि सम्भवतः" इति। इह श्लेषस्य साम्य-प्रयोजकत्वात् साम्यस्य च श्लेषानिर्वाहात् उपमाया एवाङ्गित्वेन व्यपदेशः युक्तः। विश्वनाथेनापि "सकलकलं पुरम्" इत्यादौ तथैव व्यवस्थापितम्; यथोक्तम्,–"अत्र श्लेषस्यैव साम्यनिर्वाहकता न तु साम्यस्य श्लेषनिर्वाहकता, श्लेषबन्धतः प्रथमं साम्यस्यासम्भवात्, इत्युपमाया एवाङ्गित्वेन व्यपदेशो ज्यायान् "प्रधानेन हि व्यपदेशा भवन्ति" इति न्यायात्"। "सालकानन" इत्यत्र "सर्जकानन" इति परिवृत्तौ न श्लेषः, पूर्वत्र "शिशिरांशु" इत्यत्र "शीतगु" इति परिवृत्तौ अपि न क्षतिरिति सुधीभिः विभाव्यम्)।।२९।।

## प्रभा

समानोपमां निरूपयति–**सरूपेति**। सरूपं समानं भिन्नार्थमपि एकवर्णत्वेनाभिन्नं रूपं यस्य तादृशशब्देन वाच्यत्वात् प्रतिपाद्यत्वात्। समानधर्मस्येति शेषः। सा प्रसिद्धा। समानोपमा मता शिष्टानामिति शेषः। तथा च यत्र श्लिष्टशब्देन साधारणधर्मोपस्थितिः सा समानोपमा। उदाहरति–**बालेति**। इयमुद्यानमाला वनपङ्क्तिः। बालेव वधूरिव। सालकाननशोभिनी सलानां वृक्षाणां काननं वनं तेन शोभिनी। वधूपक्षे अलकैश्चूर्णकुन्तलैः। सहितं सालकम् एवं यदाननं मुखं तेन शोभिनी। अत्र भिन्नयोरपि उपमानोपमेयधर्मयोः समानशब्दवाच्यत्वात् साधारण्यम्। अत्र वृक्षकाननेति परिवृत्तौ न श्लेषः, अतः शब्दश्लेषेयमुपमा।।२९।।

## विवृति

सन्दानोपमामाह–

समानं रूपं ये(षां ते सरूपाः) ते च ते शब्दाश्च तैर्वाच्यत्वात्। तस्या उदाहरणम्–

बाला तावत्, सहालकैर्वर्तत इति (सालकं; तच्च)तदाननं च सालकाननं तेन शोभत इत्येवं शीलं(ला)। उद्यानमाला च सालाः सालद्रुमाः तेषां काननं तेन शोभत इति श्ले(षोपमाया) मर्थ(त): सारूप्यं, सन्दानोपमायां शब्दाम(ब्दतो ना)र्थत इत्युभयोर्भेदः।।

**सरूपेति**। सरूपशब्दवाच्यत्वात्–तादृशशब्दस्य अनेकद्रव्य–

योगेन। सालकाननशोभिनी–उद्यानमाला सालानां काननेन शोभते; बाला सालकेन आननेन शोभते।।

**सरूपेति।** सरूपः समानरूपः ; सरूपश्चासौ शब्दश्च सरूपशब्दः ; सरूपशब्दवाच्यत्वात् समानशब्दाभिधेयत्वात्। सालकाननशोभिनी– सालो नाम कश्चित् वृक्षविशेषः ; सालानां काननं सालकाननम्। अन्यत्र सालकाननम् अलकसहितं मुखम्।।२९।।

---

**पद्मं बहुरजश्चन्द्रः क्षयी ताभ्यां तवाननम्।**
**समानमपि सोत्सेकमिति निन्दोपमा मता॥३०॥**

## रत्नश्री

बहूनि रजांसि पांसवो यस्मिन् इति। चन्द्रः क्षयी क्षयोऽपचयोस्येति। ताभ्यामेवंभूताभ्यां पद्मचन्द्राभ्यां कान्त्यादिना समानं तुल्यमपि सत्तवाननं सोत्सेकमुत्कर्षयुक्तं प्रतिविशिष्टं वर्तते। रजःशब्दस्य दोषेऽपि वृत्तेः। बहुरजस्त्वस्य शब्दलक्षणेन दोषरूपस्य क्षयित्वस्य च तत्राभावात्, एवंविधा निन्दोपमा मता स्मृता। कथञ्चिन्निन्दितेन पद्मा[45b]दिनोपमावस्तुन आननस्य विवक्षितोत्कर्षत्वात्॥

## हृदयङ्गमा

निन्दोपमां लक्षयति, पद्ममिति।–पद्मं बहुरजः परागपूर्णं रजोगुणबहुलञ्च, चन्द्रश्च क्षयी कृष्णपक्षे क्षयशीलः, क्षयरोगी च, अतः तव आननं समानमपि गुणान्तरेण तुल्यमपि, ताभ्यां पद्मचन्द्राभ्यां, (ताभ्यामिति पञ्चम्यन्तम्) सोत्सेकं समधिकोत्कर्षशालि, इति एवंस्वरूपा, उपमाननिन्दापूर्वक-सादृश्यप्रत्ययात्मिकेत्यर्थः, निन्दोपमा स्मृता उपमाननिन्दया साम्यस्य कीर्त्तनात् निन्दोपमेति व्यपदेश इति भावः। (साम्यमात्रपर्य्यवसायित्वे तात्पर्य्यादस्या व्यतिरेकात् भेदः, व्यतिरेके तु भेदे एव तात्पर्यमिति बोध्यम्)॥३०॥

## प्रभा

निन्दोपमां लक्षयति–**पद्ममिति।** पद्मं बहुरजः परागधूलिधूसरम्। चन्द्रश्च क्षयी क्षयिष्णुः। अर्थात् कृष्णपक्षे। तवाननं तु निर्मलत्वात् परागशून्यं सदा शोभापरिपूर्णत्वाच्च न क्षयिष्णु। अतः ताभ्यां पद्मचन्द्राभ्याम् समानमपि तवाननं सोत्सेकं दोषशून्यत्वेन उत्कर्षशालीति निन्दोपमा। उपमानस्य निन्दया साम्यस्य कीर्तनान् निन्दोपमा। अत्र केंचित् रजः क्षयशब्दाभ्यां रजोगुणक्षयरोगरूपार्थान्तरं श्लेषेणाङ्गीकृत्य तदेव दोषत्वेन कल्पयन्ति। तथा ताभ्यामिति पञ्चम्यन्तं स्वीकृत्य तत् सोत्सेकमित्यनेन संबध्य सोत्सेकशब्दस्य अधिकम इत्यर्थं दर्शयन्ति। अत्र साम्यमात्रपर्यवसायित्वात् तत्रैव कवेरभिनिवेशात् प्रतीयमानेपि भेदे तस्य प्राधान्याभावान्न व्यतिरेकः। प्राधान्येन भेदचमत्कृता एव तस्य निश्चितत्वात्।।३०।।

## विवृति

निन्दोपमामाह–

रजः क्षयश्चेति दोषौ तद्वद् द्वाभ्यां (तद्वद्भ्यां)पद्मचन्द्राभ्यां समस्य त्वन्मु स्वस्योत्सेको न युक्त इति केनापि कामिना चन्द्रनिन्दाव्याजेन कान्तामुखं तत्सममाप(पा)द्यत इति निन्दोपमा।।

**पद्ममिति।** रजः मनसो दोषविशेषः परागश्च। रजः क्षयिशब्दाभ्यां निन्दा प्रतीयते। त्वन्मुखस्य स दोषो नास्ति। अतः ताभ्यां समानमपि तव मुखं सोत्सेकं सगर्वं भवति। तस्मान्निन्दा।।३०।।

---

**ब्रह्मणोऽप्युद्भवः पद्मश्चन्द्रः शम्भुशिरोद्धृतः।**
**तौ तुल्यौ त्वन्मुखेनेति सा प्रशंसोपमेष्यते॥३१॥**

---

## रत्नश्री

यो विश्वं सृजति तस्यापि ब्रह्मणः स्त्रस्टुरुद्भवत्यस्मादित्युद्भवः पद्म इत्यतिशये अपिशब्दः। नारायणनाभिनलिनयोनिः पितामह [इति] श्रुतेः। चन्द्रः शम्भोः शङ्करस्य शिरसा मौलिना धृतः। तावेवं श्लाघनीयौ पद्मचन्द्रौ तव मुखेन तुल्यौ कान्त्यापि साधर्म्येण ताभ्यां तस्योपमितेस्तेन तुल्यौ भवतः। एवंविधा या सा प्रशंसोपमेष्यते, यथोक्तविशेषयोगेन प्रशंसास्पदाभ्यां पद्मचन्द्राभ्यामाननस्योपमानादिति॥

## हृदयङ्गमा

प्रशंसोपमां निरूपयति, ब्रह्मण इति।—पद्मः ब्रह्मणोऽपि उद्भवः उद्भवत्यस्मादित्युद्भवः उत्पत्तिस्थानं, नारायणस्य नाभिकमलजातत्वात् इति भावः, तथा चन्द्रः शम्भुशिरोधृतः शिवेन मूर्द्धा गृहीतः, तौ पद्मचन्द्रौ, त्वन्मुखेन तुल्यौ सदृशौ, इति प्रस्तुतमुखस्य प्रशंसातिशयात् हेतोरित्यर्थः, सा प्रशंसोपमा उच्यते, जगत्स्रष्टुरपि विधातुरुद्भवत्वेन पद्मस्य तथा जगतां शङ्करेणापि शङ्करेण शिरसा न त्वङ्गान्तरेण धृतत्वाच्च चन्द्रस्य महती प्रशंसा प्रतीयते, प्रशसिताभ्याञ्च ताभ्यां सादृश्याभिधानात् इति भावः। (अत्र उपमेयतया प्रसिद्धस्यापि मुखस्य उपमानत्वकल्पनात् विपर्य्यासोपमा च; तदुभयोः समावेशात् सङ्करः। विपर्य्यासोपमायाम्

उपमानोपमेययोः प्रशंसा नास्ति प्रशंसोपमायां तदस्तीत्यनयोर्भेदः। नव्यास्तु उपमेयतया प्रसिद्धस्य मुखस्य उपमानत्वकल्पनेन केवलमेव प्रतीपालङ्कारमुभयत्रापीच्छन्ति; यदुक्तं,– ''प्रसिद्धस्योपमानस्योपमेयत्वप्रकल्पनम्। निष्फलत्वाभिधानं वा प्रतीपमिति कथ्यते।।'' इति। पद्म इति पुंस्त्वनिर्देशेन अप्रयुक्ततादोषश्चेति बोध्यम्।।३१।।

## प्रभा

प्रशंसोपमां दशर्यति–**ब्रह्मण इति।** पद्मः कमलम्। वा पुंसि पद्मं नलिनम् इत्यमरकोशात् पद्मशब्दस्य पुंस्त्वम्। पद्ममिति पाठेप्रयुक्तत्वदोषोपि न। ब्रह्मणोपि जगत्स्त्रष्टुरपि। उद्भवः उत्पत्तिस्थानम्। तस्य अरविन्दनाभनाभ्यरविन्दजातत्वादिति भावः। तथा चन्द्रः शंभुशिरोधृतः शँकरस्य शशिखंडमौलित्वादिति भावः। एतदृशौ महामहिमशालिनौ तौं त्वन्मुखेन तुल्या इति विपर्यासोपमया मुखस्य गुणातिशयवर्णनाद् इयं प्रशंसोपमा इत्युच्यते। अयमाशयः। पद्मचन्द्रौ तावन्महामहिमगुणशालिभ्यां कमलासनशशिशेखराभ्याम् आश्रिता इत्यनुपमगुणशालिनौ। तौ त्वन्मुखेनापि तुल्याविति अहो तेषां गुणराशिसंपत्तिरिति तौ अधिकगुणेनोपमानभूतेन मुखेन प्रशंसितौ। तेन च मुखस्य गुणातिशयो व्यक्तो भवति। इयं विपर्यासोपमानुप्राणिता प्रशंसोपमा ज्ञेया। अत्र प्रशंसायाः प्राधान्यात् तद्वैचित्र्यकुक्षिलीनं विपर्यासोपमावैचित्र्यम्। तेन न विपर्यासोपमेति ज्ञेयम्।।३१।।

## विवृति

प्रशंसोपमामाह–

उद्भवत्यस्मादित्युद्भवः। पद्मः सकलभुवननिर्माणकारणस्य भगवतो ब्रह्मणोऽपि जन्मभूमिः। चन्द्रः शम्भुशिरोधृतः, धूर्जटिना जटाजूटे चूडामणीकृतश्चन्द्रः। तौ पद्मचन्द्रौ त्वन्मुखेन तुल्यौ इति सा प्रशंसोपमोच्यते॥३१॥

---

**चन्द्रेण त्वन्मुखं तुल्यमित्याचिख्यासु मे मनः।**
**स गुणो वास्तु दोषो वेत्याचिख्यासोपमा मता॥३२॥**

## रत्नश्री

तव मुखं चन्द्रेण तुल्यमित्येवमाख्यातुमिच्छति मम मनः कर्तृ। ननु चन्द्रः क्षयादिदूषितः, मुखं त्वखण्डमण्डलं तत्किमेवमुच्यत इति चेत्-सत्यं यदाह-स इत्यादि। सोऽयं चन्द्रमुखयोस्तुल्यतावादः गुणो वास्तु [उचितो] वा भवतु, दोषो वास्तु अनुचितो वा भ[वतु]। नेदृशं विमर्शमपेक्षते मे मनः। केवलमभिधातुमभिलषतीति। एवमाचिख्यासामुखेन, सादृश्यप्रकाशनादाचिख्यासोपमेतीदृशी मतेष्टेति। निन्दोपमाद्युदाहरणेन चानेन

यदुक्तं त्रिप्रकारत्वं तस्याः कैश्चिन्महात्मभिः।
निन्दाप्रशंसाचिख्यासाभेदात् तत्राभिधीयते॥
सामान्यगुणनिर्देशात् त्रयमप्युदितं ननु।
मालोपमादि तत्सर्वं न ज्यायान् विस्तरो वृथा॥
[काव्यालङ्कार २.३७-३८]

इति मतान्तरं निरस्तम्। एवं हि-

समानवस्तुन्यासेन प्रतिवस्तूमपेष्यते।
यथेवानभिधानेऽपि गुणसाम्यप्रतीतितः॥
[काव्यलङ्कारे २.३४]

इत्यादिना प्रतिवस्तूपमादिरपि कथं न वृथा स्यात्, सामान्यगुणनिर्देशेनैव गतार्थत्वात्? अर्थप्रपञ्चार्थमेतदिष्यत्ते [चेत्,] तदिहापि समानमिति यत्किञ्चिदेतत्॥

## हृदयङ्गमा

आचिख्यासोपमां लक्षयति, चन्द्रेणेति।—त्वन्मुखं चन्द्रेण तुल्यम् इति आचिख्यासु आख्यातुमिच्छु, मे मनः ; स आख्यानाभिलाषः, गुणो वा दोषो वा अस्तु इति अस्मात्, आख्यानाभिलाषप्रकाशनात् इत्यर्थः, इमाम् आचिख्यासोपमां विदुः। (आख्यानकामनाविषयत्वेन मुखस्य चन्द्रेण उपमितत्वेऽपि 'गुणो वा दोषो वा' इति सारल्येन स्वाभिलाषप्रकटनम् अधिकचमत्कारित्वं द्योतयतीति बोध्यम्)।।३२।।

## प्रभा

आचिख्यासोपमां व्याख्याति—**चन्द्रेणेति।** मे मनश्चन्द्रेण त्वन्मुखं तुल्यम् इति आचिख्यासु विवक्षु वर्तते। स आख्यानाभिलाषः। गुणो वा दोषो वा अस्तु इत्याचिख्यासोपमां विदुः। पण्डिता इति शेषः। अत्र गुणो वा दोषो वास्तु इत्यनेन आख्यानाभिलाषस्य समुद्रेको दर्शितो भवति। तेन च मुखस्य उपमेयस्य चारुतातिशयो व्यञ्जितो भवति। अत आचिख्यासया उपमेयचारुत्वपोषणादियमाचिख्यासोपमेति भावः। केचित्तु गुणो वा दोषो वास्तु इत्यनेन हृद्गतभावप्रकटनया सारल्यद्योतनाच्चा-रुत्वातिशय इति मन्यन्ते।।३२।।

## विवृति

स गुणो वाऽस्तु चन्द्रः शम्भुशिरोधृतः तेन तुल्यम्; दोषो (वा) क्षयी चन्द्रः तेन समं त्वन्मुखमित्या(चि)ख्यासोपमा। आख्यातुमिच्छयोपमानत्वात्।।३२।।

**शतपत्रं शरच्चन्द्रस्तवाननमिति त्रयम्।**
**परस्परविरोधोति सा विरोधोपमा मता।।३३।।**

---

## रत्नश्री

शतपत्रं पद्मं शरदि चन्द्रः तवाननमित्येतद् वस्तुत्रयं त्रयोऽवयवा अस्येतिं। परस्परेणान्योन्येन सह परस्परस्य वा विरोधि प्रतिद्वन्द्वि समानगुणत्वात्, कान्त्यादिविशेषणयोगात्। इत्येवंविधा या सा विरोधोद्भावनेन साधर्म्यवर्णनाद् विरोधोपमा मतेति।।

## हृदयङ्गमा

विरोधोपमां निरूपयति, शतपत्रमिति।—शतपत्रं पद्मं, शरच्चन्द्रः शारदीयचन्द्रः, तव आननञ्च एतत् त्रयं परस्परविरोधि अन्योऽन्यस्पर्द्धि, शतपत्रे शोभिते चन्द्रस्य मालिन्यं, चन्द्रे च शोभिते शतपत्रस्य मालिन्यं प्रसिद्धं, तवानने शोभिते च द्वयोरेव मालिन्यं स्यादिति पद्मचन्द्राभ्यां मुखस्य मनोज्ञत्वाद्येकधर्म्मवत्त्वरूपस्य विरोधस्य सादृश्यपर्य्यवसानात् इति एवंरूपा, सा प्रसिद्धा, विरोधोपमा मता।।३३।।

## प्रभा

विरोधोपमां दर्शयति—**शतपत्रमिति**। शतपत्रं कुशेशयम्। शरच्चन्द्रः शारदीयशर्वरीशः त्वदाननं भवदीयाननम् च एतत् त्रयम्। परस्परविरोधि अन्योन्यस्पर्धि। शतपत्रस्य विकासे दिवा चन्द्रस्य मालिन्यम् चन्द्रोदये रात्रौ शतपत्रस्य संकोच इति ते परस्परविरुद्धे।

तयोरुभयोस्तवाननेन सह विरुद्धत्वं त्वन्मुखसौरभ्याह्लादकत्वादि-गुणमत्सरित्वादिति ज्ञेयम्। अस्य विरोधस्य साम्यपर्यवसायित्वादियं विरोधोपमा॥३३॥

## विवृति

परस्परविरोधि परस्परस्पर्धीति सा विरोधोपमा मता। विरोधशब्दे(न) सादृश्योपम(श्यरूपोपमाऽ)भिधानात्॥३३॥

---

**न जातु शक्तिरिन्दोस्ते मुखेन प्रतिगर्जितुम्।**
**कलङ्किनो जड़स्येति प्रतिषेधोपमैव सा॥३४॥**

---

## रत्नश्री

तव मुखेन सह प्रतिगर्जितुं स्पर्द्धां कर्तुमिन्दोः। न जातु न क[46a]दाचिदपि शक्तिः सामर्थ्यमस्ति। कलङ्किनो जड़स्य कलङ्कित्वात् जड़त्वाच्चेत्यर्थः। कलङ्को मृगलाञ्छनलक्षणो दोषः। जाड्यं शैत्यमकौशलं चेति शब्दच्छलेन दोषोक्तिः। मुखं तु निष्कलङ्कं विदग्धं चेति। कथमनेन [स]दृशं इति निषेधद्वारेण साधर्म्यावगमात्। प्रतिषेधोपमैव सा या ईदृशीति॥

## हृदयङ्गमा

प्रतिषेधोपमामाह, नेति।—कलङ्किनः तथा जड़स्य, इन्दोः चन्द्रस्य, ते तव, मुखेन जातु कदाचित्, प्रतिगर्जितुं प्रतिस्पर्द्धितुं, सदृशीभवितुम् इत्यर्थः, शक्तिः सामर्थ्यं, नास्ति, इति एवंरूपा, कलङ्कित्वजड़त्वहेतोरुपमानप्रतिषेधात्मिका इत्यर्थः, सा प्रतिषेधोपमा सादृश्यप्रतिषेधेन अधिकवैचित्र्यप्रकटनात् इति भावः। (अत्र कलङ्किनो जड़स्य इति विशेषणाभ्यामुपमानस्य निन्दाऽवगमेऽपि प्रतिषेधस्यैव वैचित्र्यप्रतिपादकत्वात् न निन्दोपमा, यत्र तु प्रतिषेधो नास्ति, तत्र निन्दोपमा, प्रतिषेधे च प्रतिषेधोपमा इत्यनयोर्भेदः। अत्र नवीनालङ्कारिकाणां मते,—"जयतीन्दुं कलङ्किनम्" इत्यादिवत् उपमानादुपमेयस्याधिक्यवर्णनात् व्यतिरेकालङ्कारः; तथा चोक्तं विश्वनाथेन,—"आधिक्यमुपमेयस्योपमानान्यूनताऽथवा। व्यतिरेकः—॥" इति)॥३४॥

## प्रभा

प्रतिषेधोपमां निर्दिशति–**न जात्विति**। इन्दोस्ते मुखेन सह। न जातु न कदाचिदपि। प्रतिगर्जितुं प्रतिस्पर्धितुम्। शक्तिरस्तीति भावः। उक्तमर्थं विशेषणाभ्यां संपादयति। कलङ्किनः कलङ्कदूषितस्य। तथा जडस्य शीतलस्य मूर्खस्येति च ध्वनिः। तथा च एतादृशस्य चन्द्रस्य निष्कलङ्किना अजडेन च ते मुखेन स्पर्धितुं का शक्तिरस्ति। अत्र सादृश्यप्रतिषेधेन उपयेगुणस्योत्कर्षो वर्णितो भवतीति प्रतिषेधोपमा। पूर्वोक्तनिन्दोपमायां प्रतिषेधो नास्तीति तस्या भेदः। नात्र परिकरशङ्का कर्तव्या। कविनानेन अगणितत्वात्। विशेषणद्वयानुपादाने इदं–'मही महावराहेण लोहितादुद्धृतोदधेः' इतिवन्नेयार्थदोषग्रस्तं भवेत्। अतस्तद्दोषपरिहाराय विशेषण-स्यावश्यकत्वं ज्ञेयम्। नवीनमते तु अपुष्टतादोषपरिहारार्थं तयोरावश्यकत्वं ज्ञेयम्। अपि चात्र औपम्यवर्णनस्यैव प्राधान्यात् प्रतिषेधोपमैव स्वीकार्या इत्यलम्।।३४।।

## विवृति

न च कदाचित् सामर्थ्यं चन्द्रमसः त्वन्मुखेन सह प्रतिगर्जितुं स्पर्धां कर्तुम्। कथंभूतस्य कलङ्किनो जडस्य च। न त्वन्मुखं संकलङ्कं नापि जडत्व(जड) मित्यतो न समान वि(इति)प्रतिषेधोपमा।।३४।।

---

**मृगेक्षणाङ्कं ते वक्त्रं मृगेणैवाङ्कितः शशी।**
**तथापि सम एवासौ नोत्कर्षीति चटूपमा॥३५॥**

---

## रत्नश्री

तन्वि! तव वक्त्रं मृगस्येक्षणमेकदेशोऽत्यन्तसाम्येनाभेद-विवक्षया अङ्कश्चिह्नं यस्य तत्तथा। शशी तु मृगेणैव सकलेनाङ्कितो लक्षितः ततश्चाधिक्यं शशिनः प्राप्तं तथापि नाधिकः। नोत्कर्षी। किं तु सम एव मुखेनासौ शशी। 'इत्येवं चटुना प्रियालापप्रकारेणेदृशेन सादृश्यप्रकाशनात् चटूपमेदृशी द्रष्टव्येति॥

## हृदयङ्गमा

चटूपमां निरूपयति, मृगेक्षणेति।–ते वक्रं मृगस्य ईक्षणाभ्यां नयनाभ्याम्, अवयवविशेषाभ्याम् इति भावः, अङ्कः चिह्नं यत्र तादृशं, शशी तु मृगेण सर्वावयवसम्पन्नेनेति भावः, अङ्कितः, तथाऽपि अधिकसामग्रीसत्त्वेऽपि, असौ सम एव, तव मुखेनेति शेषः, न उत्कर्षी नाधिकवैचित्र्यजनकः, इति चटुः प्रियोक्तिः, तद्घटितत्वात् चटूपमा। (अत्र सत्यपि उत्कर्षकारणे न उत्कर्ष इति प्रतिपादनात् विशेषोक्तिः। एवंविध[illegible]नाया एव चटूपमात्वाङ्गीकारात् अस्या विशेषोक्तिमूलत्वमवश्यमेव वक्तव्यम्, अन्यथा सादृश्यमात्रप्रतीतौ चटूपमा इत्युक्ते सर्वत्रैवोपमाभेदेषु चाटूक्तिसद्भावाच्चटूपमा स्यादिति ध्येयम्)॥३५॥

## प्रभा

चटूपमां वर्णयति–**मृगेक्षणाङ्कमिति**। मृगस्य ईक्षणेन सदृशम् ईक्षणम् मृगेक्षणं तदेव अङ्कं चिह्नं यस्य तन्मृगेक्षणाङ्कम्।

मृगनयनसदृशनयनशोभितमित्यर्थः। शशी चन्द्रः। मृगेणैव अङ्कितो भूषितः। तथापि वक्त्रं मृगस्य कयाचिदपि एकावयवक्रियया अथवा एकेनावयवेन युक्तम्। शशी तादृशावयवसमुदाय-विशिष्टशरीरेण मृगेण युक्तः। अतस्तत्साधनसंपत्तिरधिका। एवं स्थितेपि असौ शशी। सम एव वदनेन समान एव। एवशब्देनाधिक्यव्यवच्छेदः। नोत्कर्षीति एवकारव्यवच्छेद्यमेव स्फुटतयाभिहितम्। अयमाशयः। अधिकसाधनवता अधिकोत्कर्षेण भाव्यम्। परं तादृशविशेषसाधनसंपत्तिमानेपि शशी न मुखतो विशेषशोभाशाली इति शशिनः समीकरणेन मुखस्य सौन्दर्यपरिपोषो दर्शितः। एतादृशी वर्णनशैली सुमधुरा इति चटूपमा। चटुः प्रियोक्तिस्तत्परा उपमा औपम्यवर्णनम्। अस्त्री चाटु चटु श्लाघा प्रेम्णा मिथ्या विकल्पनम्। इति कोशः अत्रोत्कर्षकारणे सत्यपि नोत्कर्ष इति विशेषोक्तिः। तस्या लक्षणमग्रेः-

गुणजातिक्रियादीनां यत् तु वैकल्यदर्शनम्।
विशेषदर्शनायैव सा विशेषोक्तिरिष्यते।। (२.३२३)

इति ग्रन्थकृतैव दर्शितम्। विशेषोक्तिमूला एवेयं चटूपमा। अन्यथा सर्वत्रोपमायां चटूक्तिसंभवात् सर्वत्रेयमेव स्यात् इति प्रेमचन्द्रशर्माणः।।३५।।

## विवृति

चा(च)टूपमामाह-

मृगेक्षणाङ्कं ते वक्त्रं; मृग्या ईक्षणे मृगस्ये(गे)क्षणे मृगेक्षणादेषु तत्पुरुषे पुंवद्भावात्। अथवा मृगस्येक्षणे मृगेक्षणे मृग इति मृगत्वजातिपरिग्रहात् शब्देनमृग मृगमृग्योर्ग्रहणम्। मृगेक्षणे इव

(ईक्षणे) मृगेक्षणे ताभ्यामङ्क्यत इति मृगेक्षणाङ्कम् एकस्येक्षणशब्दस्य गम्यमानत्वान्निवृत्तिः मृगलोचनादिवत् मृगलोचनसदृशनयनमित्यर्थः। मृगेणैवाङ्कितश्शशी। शशी पुनर्हरिणेनैवाङ्कितः। एणाङ्क इति तस्य (प्र)सिद्धत्वात्। मृग इति यद्यपि शशवराहादौ सामस्त्येन रूढस्तथाप्यत्र मृगेक्षणाङ्कं ते वक्त्रमित्यादिसशब्द(सन्दर्भ) सामर्थ्यादेणसारङ्गयोर्वर्तते। ..... (त)दीक्षणानामेव नयनोपमानत्वात्। तथापि सम एवासौ सकलमृगशरीराङ्कितोऽपि त्वन्मुखेन सम एव नोत्कर्षी नाधिक इति चाटूपमा कश्चित्कामुकः कान्ताचाटूनि कर्तुभभ्यधात्।।३५।।

**न पद्मं मुखमेवेदं न भृङ्गौ चक्षुषी इमे।**
**इति विस्पष्टसादृश्यात् तत्त्वाख्यानोपमैव सा॥३६॥**

---

## रत्नश्री

पद्ममुखयोर्भृङ्गचक्षुषोश्च विस्पष्टं परिस्फुटं यत्सादृश्यं कान्तिचञ्चलत्वादिलक्षणं, तस्मादभेदशङ्कापूर्वकमेवंविधमुच्यते। न पद्ममेतत् किं तु मुखमेवेदम्। एतौ चात्र [न] भृङ्गौ, किं तर्हि? चक्षुषी इमे। इत्येवंरूपा या सा तत्त्वाख्यानोपमा ख्याता। पद्मादीनामविपरीतस्य रूपस्य परिदीपनेन साम्यावसायात्।

निर्णयोपमाया अस्याश्च को भेद? उभयत्रापि तत्त्वनिश्चयाविशेषात्। यद्यपि तत्त्वनिश्चयस्तुल्यः, तथापि संशयच्छेदेन निश्चयः, इह तु विपर्यासनिरासेनेति महान् भेदः। अन्यत्राप्येवं क्वचित् कथञ्चित् अपेक्षाविशेषाद् व्याख्येयो भेद इति॥

## हृदयङ्गमा

तत्त्वाख्यानोपमां लक्षयति, नेति।—इदं पद्मं न, मुखमेव, भृङ्गौ भ्रमरौ न, इमे चक्षुषी नेत्रे; (अत्यन्तसदृशे हि वस्तुनि भ्रन्तिर्जनानां नैसर्गिकीति मुखे पद्मत्वेन भ्रान्तं प्रत्युक्तिरियं, मुखमेव इत्यादिना च भ्रान्तिनिरास इति बोध्यम्) इति इत्थं, विस्पष्टसादृश्यात् विशेषेण सादृश्यस्य स्पष्टत्वात्, भ्रान्तिनिरासेन सुव्यक्तत्वात् इत्यर्थः, सा प्रसिद्धेत्यर्थः, तत्त्वाख्यानोपमा भ्रमनिरासेन तत्त्वस्य कथनं तत्त्वाख्यानं तेन प्रयुक्ता उपमा तत्त्वाख्यानोपमा। (निर्णयोपमायां तत्त्वाख्यानस्य संशयपूर्वकत्वम्, इह तु भ्रान्तिपूर्वकत्वम्

इत्यनयोर्भेदः। नव्यास्तु अत्रापि अन्यनिरासेन प्रकृतस्थापनरूपं निश्चयालङ्कारमाचक्षते इत्यवधेयम्)।।३६।।

## प्रभा

तत्त्वाख्यानोपमां दर्शयति–न **पद्ममिति।** इदं पद्मं न किंतु मुखमेव। इमौ भृङ्गौ न किंतु चक्षुषी एव। इत्येवं निषेधप्रकारेण विस्पष्टसादृश्यात् सादृश्यस्य स्पष्टीकरणात्। सदृशे भ्रान्तिर्भवति। अत्र च भ्रान्तेरपनयनात् सा पूर्वमासीद् इति निष्पन्नम्। सा च सादृश्यमूला इति सादृश्यस्य प्रकटीकरणात् तत्त्वाख्यानोपमा इयं ज्ञेया। भ्रमनिरासाय भ्रमविषयस्य तत्त्वस्य यथार्थस्वरूपाविष्करणं तत्त्वाख्यानम्। तन्मूलमस्या अतस्तत्त्वाख्यानोपमा। निर्णयोपमायां संशयपूर्वकं तत्त्वाख्यानम्। अत्र तु भ्रान्तिपूर्वकमित्युभयोर्भेदः।।३६।।

## विवृति

तत्वाख्यानोपमामाह–

नेति। संशय्य प्रमाणेन निश्चितत्वात् तत्त्वाख्यानोपमा।।३६।।

---

**चन्द्रारविन्दयोः कक्ष्यामतिक्रम्य मुखं तव।**
**आत्मनैवाभवत् तुल्यमित्यसाधारणोपमा॥३७॥**

## रत्नश्री

चन्द्रस्यारविन्दस्य च कक्ष्यां पदवीं तुल्यताम् अतिक्रम्य अवधूय तयोरवकर्षात्। आत्मना स्वरूपेणैव तुल्यम् अभवत्, अनन्यसामान्यगुणयोगात्। इत्येवंरूपासाधारणताभिधानद्वारेण सादृश्यप्रतीतेः असाधारणोपमा निगद्यत इति॥

## हृदयङ्गमा

असाधारणोपमां लक्षयति, चन्द्रेति।—तव मुखं चन्द्रारविन्दयोः कान्तिं शोभाम्, अतिक्रम्य आत्मनैव तुल्यम् उपमानतया प्रसिद्धयोश्चन्द्रारविन्दयोः शोभातिक्रमेण उपमानान्तरासम्भवात् स्वमात्रसदृशमित्यर्थः, अभवत्, इति असाधारणोपमा स्वभिन्नोपमानासद्भावात् सादृश्यस्य स्वमात्रगतत्वेन असाधारणत्वात् इयम् असाधारणोपमा नाम इत्यभिप्रायः। (दर्पणकारस्तु भिन्नयोरुपमानोपमेययोः साम्ये तूपमाम्, अनन्यसदृशत्वप्रतिपादनार्थमेकस्योपमानोपमेयभावविवक्षया साम्यप्रतिपादनेऽनन्वयाख्यमलङ्कारमाह; यथा,—"उपमानोपमेयत्वमेकस्यैव त्वनन्वयः" इति। भोजराजस्तु,—तव मुखमीदृशं नान्यत् तत्सदृशमिति एकस्यापि वस्तुनो भेदमुपकल्पा उपमानोपयमेभाव-विवक्षया प्रतीयमानसादृश्यमौपम्येनाभिहितमिति अनन्वयोपमामाह; उदाहृतञ्च तत्र—"त्वन्मुखं त्वन्मुखमिव त्वद्दृशौ त्वद्दृशाविव। त्वन्मूर्त्तिरिव मूर्त्तिस्ते त्वमिव त्वं कृशोदरि!॥" इति। न च चन्द्र इव मुखम् इत्यादौ मुखे चन्द्रगतधर्म्माप्रतीतिः, चन्द्र इव चन्द्रः इत्यत्र तु

अन्यस्मिश्चन्द्रनिष्ठसादृश्यप्रतियोगित्वाभावो बुध्यते, न तु चन्द्रगत- धर्म्मवत्त्वं, तस्य साधारणधर्म्मज्ञानकाले एव सिद्धत्वादिति वाच्यम्; एतत्कालिकश्चन्द्रः तत्कालिकचन्द्रसदृश इति बोधात् चन्द्रगत धर्म्मप्रतीतौ बाधाभावात् तस्योपमात्वमिष्टमेव। चन्द्रश्चन्द्रवृत्तिधर्म्मवान् इति बोधोऽपि अनुभवसिद्ध एव। एतावता हि एवंविधस्थले उक्तरीत्या भेदारोपेणोपमा इत्यभिप्रायो लभ्यते। वस्तुतस्तु एतादृग्भेदकरणमगतिकगतिरिति तेन तदङ्गीकरणं न समीचीनम्; तथा च भाष्यकृतः,–"अगतिका हि इयं गतिर्यत् काल्पनिकं भेदाश्रयणम्" इति। वाचस्पतिमिश्रैरप्युक्तं भामत्यां,–"तेन तस्योपमेयत्वं रामरावणयुद्धवत्। अगत्यां भेदमारोप्य गतौ सत्यां न युज्यते।।" तदपि तत्कल्पतरौ व्याख्यातं,–"ह्यस्तनाद्यतनत्वादिना युद्धे भेदारोपः क्रियते "गगनं गगनाकारं सागरः सागरोपमः। रामरावणयोर्युद्धं रामरावणयोरिव।।" इति)।।३७।।

## प्रभा

असाधारणोपमामाह–**चन्द्रेति**। तव मुखं चन्द्रारविन्दयोः कान्ति शोभाम् अतिक्रम्य स्वकान्त्या विजित्य आत्मनैव स्वेनैव तुल्यमभवद् इति असाधारणोपमा। चन्द्रपद्मे एव मुखस्योपमानतया प्रसिद्धे तयोरतिक्रमे तु अन्योपमानस्य विरहात् स्वस्मिन्नेव उपमानोपमेयभावो विश्रान्तः। तेन च औपम्यस्यासाधारणत्वं निष्पन्नम्। अत इयम् असाधारणोपमा। न च एकस्यैवोपमानोपेमयत्वं कथमिति वाच्यम्। आहार्यभेदेन भिन्नत्वात्। आहार्यत्वं नाम बाधकालिकेच्छाजन्यं ज्ञानम्। अत्र बाधशब्देन बाधकं ज्ञानमपेक्ष्यते। तच्च मुखं चन्द्र इत्यत्र मुखं चन्द्रो न इति बाधज्ञानं

तात्कालिकी या मुखे चन्द्रत्वज्ञानं मे जायतामिति इच्छा तज्जन्यं यत् ज्ञानं मुखं चन्द्रः इति तदाहार्यम्।।३७।।

## विवृति

असाधारणोपमामाह–

चन्द्रारविन्दयोः कक्ष्यां समतामतिक्रम्य मुखं तवात्मनैवाभवत् तुल्यं, न त्वपरस्य वस्तुनः, तत्समस्योपमानभूतस्याभावादित्य-साधारणोपमा।

गगनं गगनाकारं सागरस्सागरोपमः।

इत्यादि चासाधारणोपमाया उदाहरणं द्रष्टव्यम्।।

**चन्द्रेति।** कक्ष्यां तुल्यताम्। आत्मना स्वयमेव तुल्यम् इत्यसाधारणोपमा इयम्।।३७।।

---

**सर्वपद्मप्रभासारः समाहृत इव क्वचित्।**
**त्वदाननं विभातीति तामभूतोपमां विदुः॥३८॥**

## रत्नश्री

क्वचित् एकत्रस्थाने समाहृतः प्रचितः सर्वेषां पद्मानां प्रभास्वभावः सारो हृदयमिव तवाननं विभातीत्येवं भूता या तामभूतोपमां विदुः स्मरन्ति तद्विदः। अभूतेनासता क्वचित् समाहृतेन सर्वपद्मप्रभासारेण आननस्योपमितेरिति॥

## हृदयङ्गमा

अभूतोपमां निरूपयति, सर्वेति।–त्वदाननं तव मुखं, क्वचित् कुत्रचित् स्थाने, समाहृतः सङ्गृह्य रक्षितः, वेधसा इति शेषः, सर्वेषां पद्मानां प्रभासारः कान्तिपुञ्जः इव, विभाति, इति उक्तरूपां, तां सर्वपद्मप्रभासारसमाहरणस्य तत्त्वतः अभूतत्वात् सम्भावनया औपम्यस्य क़ीर्त्तनाच्च तादृशीम्, अभूतोपमां विदुः। (दर्पणकारस्तु विधिकर्त्तृकसमाहृतपद्मप्रभासारस्य वस्तुतोऽसम्भवात् उपमानत्वं न सम्भवति, प्रसिद्धस्यैवोपमानताऽङ्गीकारात्, ततश्चेवशब्दस्य सम्भावनार्थकत्वात् इमाम् उत्प्रेक्षालङ्कारमाह; यथा,–"भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना" इति। यत्र तूपमानतावच्छेदकविशिष्टमुपमानमप्रसिद्धं तत्रोत्प्रेक्षैव इति बहवः। तदुक्तं चक्रवर्त्तिना,–"यदाऽयमुपमानांशो लोकतः सिद्धिमृच्छति। तदोपमैव येनेवशब्दः सादृश्यवाचकः॥ यदा पुनरयं लोकादसिद्धः कविकल्पितः। तदोत्प्रेक्षैव येनेवशब्दः सम्भावनापरः॥" इति।

प्राञ्चस्तु प्रकृते अप्रकृतस्य धर्मिणः सम्भावनमुत्प्रेक्षा, धर्म्मस्य सम्भावनया द्वयोः साम्यप्रतीतिरुपमेत्यनयोः भेदं कल्पयन्ति)।।३८।।

## प्रभा

अभूतोपमामाह—**सर्वेति।** क्वचिदेकत्रस्थाने। विधात्रा समाहृतः संगृहीतः सर्वपद्मप्रभासारः सर्वेषां पद्मानां प्रभायाः सारः कान्तिपुञ्ज इव त्वदाननं विभाति। इति एवंप्रकारां तां प्रसिद्धाम् अभूतोपमाम् उपमेयस्य वर्णनाय संभावनया कल्पितस्य उपमानस्य वस्तुतोभूतत्वात् तादृशेनाभूतेनोपमानेन औपम्यस्य वर्णनमभूतोपमा इति समाख्यानिरूपणम्। नात्र इवशब्दः संभावनार्थकः। अपि तु साधर्म्यवाचकः। तेन समाहृत इत्यस्य संभावनया समाहरणेपि उत्प्रेक्षावाचकाभावत् केवलसंभावनाचमत्कृत्यपेक्षया तादृशसंभावनानिष्पन्नोपमानसादृश्यवर्णनचमत्कृतेः प्राधान्यादत्र उपमैव ज्ञेया। केचित्तु इवशब्दं समाहृतशब्देन संयुज्य संभावनायाः प्राधान्यादत्रोत्प्रेक्षां वदन्ति। प्रस्तुते अप्रस्तुतस्य धर्मिणो यत्र संभावना तत्रोत्प्रेक्षा। अत्र तु प्रस्तुते अप्रस्तुतधर्मस्य सभांवना। तथा च प्रस्तुताप्रस्तुतयोः प्रतीतिर्न तत्रोपमा इति प्राचामाशयं विवृण्वन्ति। परं पूर्वोक्तप्रक्रियया संभावनाया उत्थितिरेव नात्रेति सुधीभिर्विचारणीयम्। वस्तुतोविद्यमानस्य केवलं कविप्रतिभया निष्पाद्यमानस्य धर्मिणोः यत्र वर्णनं तत्राभूतोपमा। स्वयं विद्यमानस्य धर्मिणो यत्रान्यधर्मिणां संमेलनकल्पनया साम्यवैचित्र्यवर्णनं तत्राद्भुतोपमा इत्युभयोर्भेदः।।३८।।

## विवृति

अभूतोपमामाह–

सकलपद्मप्रभासारस्यैकत्र समाहरणासम्भवात्, अभूतेनार्थेनोपमीयत इत्यभूतोपमा।।

**सर्वेति।** सकलकमलप्रभासारस्य आश्रयं विना समुच्चितस्य क्वचिदपि अभावात् अभूतोपमा; अद्भुतोपमायां तु सिद्धस्य धर्मिणो धर्म्यन्तरावयवैर्योगः अद्भुतः ; इति भेदः।।३८।।

---

**चन्द्रबिम्बादिव विषं चन्दनादिव पावकः।**
**परुषा वागितो वक्त्रादित्यसम्भावितोपमा॥३९॥**

---

## रत्नश्री

मञ्जुभाषिणि! इतः तव वक्त्रात् एकान्तमधुरात् वाक भारती परुषा निष्ठुरा निष्क्रामति चन्द्रबिम्बात् अमृतमयात् विषमिव चन्दनाच्च एकान्तशिशिरात् पावकः अग्निरिव। नैतत्संभाव्यत इति असम्भावनाभिप्रायेण सारूप्यनिरूपणात् असम्भावितोपमैवेदृशी दृश्यति॥

## हृदयङ्गमा

असम्भावितोपमां निरूपयति, चन्द्रेति।–इतः अस्मात्, वक्रात् परुषा वाक् चन्द्रविम्बात् विषमिव, चन्दनात् पावक इव, इति अत्र, चन्द्रचन्दनाभ्यां विषपावकयोरुत्पत्तेरिव तव मुखात् परुषवागुत्पत्तेरसम्भावितत्वात् असम्भावितोपमा। (न च वाच्यं चन्द्रप्रभवविषादेरप्रसिद्धत्वादत्रोपमैव न सम्भवति, प्रसिद्धस्यैवोपमानत्वाङ्गीकारादिति, चन्द्रप्रभवविषादेरत्र वागुपमाया अविवक्षितत्वात्। यथा चन्द्रविम्बात् विषमसम्भावितं, तथा त्वन्मुखात् परुषा वाक् इत्युपमायाः स्वीकारे नाव्याप्तिरित्यवधेयम्। एवञ्च साधारणधर्म्मस्यासम्भावितत्वे इयमुपमा न तूपमानस्यासम्भावितत्वमित्येवार्थः; तथा च विषपरूषवचनयोरुपमायां चन्द्रचन्दनादेर्मुखस्य च विम्बप्रतिविम्बभावः)॥३९॥

## प्रभा

असंभावितोपमामाह–**चन्द्रबिम्बादिति।** इतः एतस्मात्। वक्त्राद् वदनात्। परुषा कठोरा। वाक्। चन्द्रबिम्बाद् विषमिव। चन्दनात् पावक इव निःसरेदिति शेषः। अत्र उपमानभूताभ्यां चन्द्रचन्दनाभ्यां विषपावकनिः सरणस्येव वदनात् परुषवाङ्निः सरणस्य असंभावितत्वादसंभावितोपमा।।३९।।

## विवृति

न खलु कदाचितु सुधासुतिमण्ढलात् विषसम्भवः चन्दनतरोरग्निसम्भवो न(वा?) भवतीत्यसम्भावितोपमा। शेषनृजु।।३९।।

---

**चन्दनोदकचन्द्रांशुचन्द्रकान्तादिशीतलः।**
**स्पर्शस्तवेत्यतिशयं प्रथयन्ती बहूपमा॥४०॥**

---

## रत्नश्री

वराङ्गि! तव स्पर्शः स्पृश्यतेऽसाविति चन्दनोदकं चन्द्रांशुः चन्द्रकान्तश्च मणिविशेषः। आदिग्रहणेन अन्यस्यापि हिमादेः शीतवस्तुनः परिग्रहः। तद्वत् शीतलः शिशिर इत्येवं बहुभिरुपमानात् बहूपमेयमीदृशी। नन्वेकेनापि शैत्यप्रतीतेः किं बहुभिरित्याह-अतिशंय प्रथयन्तीति। अतिशयं प्रियास्पर्शस्य शैत्यगतमुत्कर्षं कमपि प्रकाशयन्ती प्रवर्तते। ततो बहूपादानमीदृशं विवक्षितमिति बहूपमोपकल्प्यत इति॥

## हृदयङ्गमा

बहूपमां लक्षयति, चन्दनेति।—तव स्पर्शः चन्दनोदकचन्द्रांशुचन्द्रकान्तादिशीतलः [चन्दनोदकचन्द्रांशुचन्द्र-कान्ताः इति द्वन्द्वसमासः तत आदिपदेन बहुव्रीहिः ततश्च चन्द्रकान्तादिरिव शीतलः इति "उपमानानि सामान्यवचनैः" (२।१।५५ पा०) इति कर्म्मधारयः] ततश्च चन्दनवत् उदकवत् चन्द्रांशुवत् चन्द्रकान्तवत्, आदिपदेन एवंविधान्यपदार्थवत् शीतल इत्यर्थः, इति अतिशयम् अधिकशैत्यम् अधिकवैचित्र्यं वा, बोधयन्ती द्योतयन्ती, बहूपमा एकस्य उपमानबाहुल्यकीर्त्तनात् इयं बहूपमानाम। (बहुपदेन द्वयोरप्युपमानयोः सद्भावे न इयमुपमा वैचित्र्याणाम् अबाहुल्यात् इति बोध्यम्। दर्पणकारस्तु इमां मालोपमामाह; यथा,—"मालोपमा यदेकस्योपमानं बहु दृश्यते" इति)॥४०॥

## प्रभा

बहूपमां दर्शयति–**चन्दनेति**। चन्दनोदकं मलयाङ्गरागश्चन्द्रांशुः इन्दुकिरणं चन्द्रकान्तो मणिविशेष एतदादयो मृणालकदलीपत्रमुक्ताहारादयस्ते इव शीतलः सुखकरः। उपमानानि तानि इव सामान्यवचनैः इति कर्मधारयः। तव प्रकृतनायिकायाः। स्पर्शः। अस्ति इति शेषः। इति अतिशयम् उपमानान्तरेषु प्रसिद्धशैत्यादिगुणेभ्यः प्रस्तुते विशेषम्। बोधयन्ती प्रकटीकुर्वती। बहूपमा एतन्नाम्ना व्यवहृता भवति। एकस्योपमेयस्य बहूपमाननिबन्धनेन साम्योत्कर्षविधायित्री इति बहूपमेत्यर्थः। यथा बहूनां मधुररसानां संमेलने चारुत्वातिशयस्तथा बहूपमानदर्शनेन उपमेयधर्मस्य चारुत्वातिशय इति केवलोपमाया अस्या भेदः। अर्वाचीनास्तु एनां मालोपमामाहुः।।४०।।

## विवृति

चन्दनोदकादि(भिः) बहुभिः शीतस्पर्शस्योपमीयमानत्वात् वहूपमोच्यते।।

**चन्दनेति**। बहुभिः उपमितत्वात् बहूपमा।।४०।।

**इन्दुबिम्बादिवोत्कीर्णं पद्मगर्भादिवोद्धृतम्।**
**तव तन्वङ्गि! वदनमित्यसौ विक्रियोपमा।।४१।।**

## रत्नश्री

तन्वङ्गि! तव वदनम् इन्दुबिम्बादुत्कीर्णम् निर्मायोत्क्षिप्तमिव, पद्मगर्भात् अम्भोरुहकुहरात् उद्धृतमिव, सृष्टिद्वारेण उत्कीर्णमिव कान्तिसर्वस्वमयत्वात्। इत्येवंरूपा या असौ तादृशी विक्रियोपमा इष्यते। चन्द्रादिविकारविशेषपरिग्रहेण उपमानोपमेयभावोद्भावनादिति।।

## हृदयङ्गमा

विक्रियोपमां लक्षयति, चन्द्रेति।–हे तन्वङ्गि! तव वदनं चन्द्रविम्बात् उत्कीर्णमिव, अथवा पद्मगर्भात् उद्धृतमिव, इति उक्तोदाहरणरूपा, असौ विक्रियोपमा चन्द्रविम्बपद्मगर्भौ उपमानभूतौ प्रकृती, तदुत्कीर्णत्वोद्धृतत्वधर्म्मयोगादुपमेयभूतं वदनञ्च विकृतिः, ततश्च उपमानविकृतत्वेन साम्यावगतेरियिं विक्रियोपमानाम। (उक्तञ्च,–''उपमेयस्य यत्र स्यादुपमानविकारता। प्रकृतेर्विकृतेः साम्यात् तामाहुर्विक्रियोपमाम्।।'' इति। अन्यच्च,– ''उपमानविकारेण तुलना विक्रियोपमा'' इत्याग्नेये। अत्र च उत्कीर्णत्वोद्धृतत्वयोः धर्म्मयोः उत्प्रेक्षणात् धर्मिणोश्च साम्यप्रतीतेरुपमैव, न तु उत्प्रेक्षा, तस्यां धर्मिगतत्वेन कीर्त्तनात् इति बोध्यम्)।।४१।।

## प्रभा

विक्रियोपमामाह–**चन्द्रबिम्बादिति**। हे तन्वङ्गि। तव वदनम्।

चन्द्रबिम्बादुत्कीर्णमिव उट्टङ्कितमिव। पद्मगर्भात् पद्ममध्याद् उद्धृतमिव। इत्यसौ विक्रियोपमा। अत्रोपमानभूतौ इन्दुबिम्बपद्मगर्भौ प्रकृती वदनं विकृतिः। प्रकृतिविकृत्योः साम्यमस्ति इति विक्रियया उपमानविकारभूतोपमेयवर्णनेन उपमा। अतो विक्रियोपमा। तथा चोक्तम् अग्निपुराणे—उपमानविकारेण तुलना विक्रियोपमा। (३४४.१५) इति अन्यत्रापि—

उपमेयस्य यत्र स्यादुपमानविकारता।
प्रकृतेर्विकृतेः साम्यात् तामाहुर्विक्रिययोपमाम्।। इति।

अत्रापि पूर्ववदुपमानवैचित्र्यविलीनमुत्प्रेक्षासाम्यमतो नोत्प्रेक्षा इति ज्ञेयम्।।४१।।

## विवृति

उत्किरणोद्धरणयोश्चन्द्रपद्माविकारत्वात्(?) विक्रियोपमोच्यते।।

**चन्द्रेति।** उपमानस्य वस्तुनः विकारत्वेन उपमेयस्य वस्तुनः प्रकाशनं कृतम्; अतो विक्रियोपमा।।४१।।

**पूष्ण्यातप इवाह्नीव पूषा व्योम्नीव वासरः।**
**विक्रमस्त्वय्यधाल्लक्ष्मीमिति मालोपमा मता॥४२॥**

## रत्नश्री

पूष्णि सूर्यातपः प्रकाशविशेषो यथा लक्ष्मीमधात्, स च पूषा वासरे यथा, सोऽपि वासरो यथा व्योम्नि आकाशे लक्ष्मीमधादिति प्रकृतं, तथा त्वयि राजनि विक्रमः शौर्यं लक्ष्मीं श्रियमधात् अकृत। इत्येवमुपमावस्तूनां पौर्वापर्येण घटनात् मालोपमायाः क्रमः प्रकारोऽयमीदृशः प्रतिपत्तव्य इति॥

## हृदयङ्गमा

मालोपमां निरूपयति, पूष्णीति।—पूष्णि सूर्य्ये, आतप इव, अह्नि दिवसे, पूषा सूर्य्य इव, व्योम्नि आकाशे, वासरः दिवसः इव, विक्रमः त्वयि लक्ष्मीम् अधात्, इति एवंरूपा, मालोपमा मालायां यथा एकेन पुष्पेण अपरस्य पुष्पस्य योगः, तथा अत्रापि सूर्य्यस्य दिवसेन दिवसस्य च आकाशेन इत्येवमेकस्यापरेण तस्याप्यपरेण परस्परसम्बन्धात् मालोपमा नाम। (एवंविधवैचित्र्यो एव अस्याः सत्त्वात्, बहूपमायाञ्च केवलमुपमानबाहुल्यात् अनयोर्भेदः। दर्पणकारस्तु बहूपमावदिहापि मालोपमां मन्यते। उपमानबहुत्वे उभयत्रापि मालोपमात्वे एवं विन्यासवैचित्र्यं न सम्भवतीति प्राचां पृथगलङ्कारकरणाभिप्रायः)।।४२।।

## प्रभा

मालोपमामाह—**पूष्ण्यातप इति।** आतप इव प्रकाशो पूष्णि सूर्ये। पूषा यथा अह्नि दिवसे। वासरः दिवसो यथा व्योम्नि आकाशे।

तथा विक्रमः पराक्रमः। त्वयि लक्ष्मीम्। अधात् निहितवान्। इति एवंप्रकारा। मालोपमा मालायां यथा ग्रथितस्य एकस्य कुसुमस्य अपरेण तस्यापि अपरेण इति परिस्थितस्य कुसुमस्य संश्लेषो भवति तथा पूर्वपूर्ववाक्यस्थिताधिकरणपदार्थस्योत्तरोत्तर-वाक्यस्थोपमानत्वनिवेशनेन संबन्धाद् इयं मालोपमा। मता आलंकारिकसंमता। अयमेव रचनावैचित्र्यविशेषो बहूपमातः अस्या भेदकः। बहूपमायां केवलमुपमाबाहुल्यम्। अस्यां तु पूर्ववाक्यस्थपदस्य उत्तरत्र संबन्ध एवमुपमाबाहुल्यम्। नव्यास्तु प्रकारद्वयेपि मालोपमामेव मन्यन्ते। तद् रचनावैचित्र्यविशेषाज्ञान-विजृम्भितमिति प्रेमचन्द्रशर्माणः।।४२।।

## विवृति

मालोपमामाह–

पूष्णि आदित्ये आतप इव, अह्नि दिवसे पूषेव आदित्य इव, व्योम्नि आकाशे वासरो दिवस इव, विक्रमस्त्वयि लक्ष्मीं शोभामधादिति मालोपमाक्रमः। एवंविधोऽन्यो मालालङ्कारो भवतीत्यर्थः।।

**पूष्णीति।** पूष्णि यथा आतपः लक्ष्मीमधात् तद्वत्।।४२।।

---

**वाक्यार्थेनैव वाक्यार्थः कोऽपि यद्युपमीयते।**
**एकानेकेवशब्दत्वे सा वाक्यार्थोपमा द्विधा॥४३॥**

## रत्नश्री

वाक्यस्यार्थः क्रियकारकसम्बन्धविशेषः। तेनैव पदार्थमात्रेण वाक्यार्थ उक्तलक्षणः कोऽपि विवक्षितः कश्चित् यद्युपमीयते सदृशः कथ्यते, सा तादृशी वाक्यार्थोपमा मता। सा च द्विधा भिद्यते। कथम्? एकोऽनेकश्च इवशब्दः सादृश्यसूचको यत्र तद्भावस्तत्त्वं तस्मिन्। कारणात्तस्मादिति गम्यते॥

## हृदयङ्गमा

वाक्यार्थोपमां लक्षयति, वाक्यार्थेनेति।–वाक्यं पदसमुदायः, तस्यार्थः वाक्यार्थः शाब्दबोधघटकपदार्थसमूह इत्यर्थः, तेन अप्रस्तुतवाक्यार्थेन इत्यर्थः, कोऽपि अपरः प्राकरणिकः, वाक्यार्थः यदि उपमीयते सदृशीक्रियते, सा वाक्यार्थोपमा वाक्यार्थयोरुपमानोपमेयत्वकीर्त्तनात् इति भावः। (अत्रैवं बोध्यं,–प्रस्तुताप्रस्तुतवाक्यार्थयोर्यदि साङ्गेनोपमानभूतेनाङ्गिना साङ्गस्य उपमेयभूतस्याङ्गिनः साम्यं स्यात् तदैव वाक्यार्थोपमा न तु वाक्यार्थमात्रसाम्ये, तथात्वे वैचित्राभावात्; "यथाऽऽकाशे विधुर्भाति तथा भूमौ तवाननम्" इत्यादौ वाक्यर्थसाम्ये वैचित्राभावात् वाक्यार्थोपमा न स्यादिति)। सा द्विधा एकानेकेवशब्दत्वात् क्वचिदेकेवशब्दघटिता , क्वचिच्च अनेकेवशब्दघटिता; यत्र एकैकस्याङ्गस्याङ्गिनो वा एकैकस्मिन् सादृश्यस्यान्वयबोधे तात्पर्यं तत्रानेकेवशब्दः, यत्र तु विशिष्टयोरुपमानोपमेययोः बोधानन्तरं समालोचनया

विशेषणानामपि सादृश्यबोधः तत्र एकेवशब्दप्रयोग इति बोध्यम्।।४३।।

## प्रभा

वाक्यार्थोपमां लक्षयति **वाक्यार्थेनेति**। वाक्यर्थेनैव वाक्यार्थो विशेषणविशेष्यतामापन्न उद्देश्यविधेयभावप्रधान एकतिङ्घटितः पदसमूहस्तेन। एवकारेण पदार्थोपमानिवृत्तिः। कोपि वाक्यार्थस्तादृश एव कश्चित् प्रस्तुतवाक्यार्थो यदि उपमीयते तर्हि सा वाक्यार्थोपमा भवति। वाक्यार्थयोरुपमानोपमेयभावेन साम्यस्य वर्णनात् सा वाक्यार्थोपमा इति व्यवह्रियते। सा च एकानेकेवशब्दत्वाद् एकानेकेवशब्दोपादानात्। द्विधा द्विप्रकारा। अयमाशयः। यदा वाक्यस्थितप्रतिपदार्थसाम्यावबोधनेच्छा तदा प्रत्युपमानं पुरत इवशब्दप्रयोगस्यावश्यकत्वाद् अनेकेवशब्दप्रयोगः। यदा तु प्रधानपदार्थान्वयबोधोत्तरं पश्चात् पर्यालोचनया अवान्तरपदार्थानां साम्यं प्रतीतिपदवीमारोहति तदा प्रधानोपमानपुरत एव इवशब्दप्रयोगेण एकेनैव सकलार्थसिद्धिरिति एकेवशब्दप्रयोगः। एकादृशसाङ्गोपमायां प्रायः कवय इवशब्दं प्रयुञ्जते इति लक्षणे इवशब्दोपादानम्। अत्र अप्रस्तुतेन अवयवविशिष्टावयविना प्रस्तुतस्य अवयवविशिष्टावयविनः साम्यवर्णनमपेक्षितं भवति। अयमेव वाक्यार्थोपमायां वैचित्र्यातिशयः। अन्यथा–यथा व्योम्नि विधुर्भाति तथा भूम्यां मुखं तव। इत्यत्रापि वाक्यार्थोपमा स्यात्। भवतु नाम सा किं नश्छिन्नमिति चेन्न। पदार्थोपमाया अस्या वैचित्र्यविशेषाभावात्। वैचित्र्यविशेषस्यैव अलंकारान्तर-विधायकत्वात्।।४३।।

## विवृति

वाक्यार्थोपमामाह–

'साख्यातं(तः?) साव्ययश्चैव सविशेषं(षः) सकारकम्(कः?)। अनेकपदसन्दोह(हो?) रूपमेकतिसाभिधेय-मिति (वाक्यमित्यभिधीयते' इति?) वाक्यं परिगृह्यते। तस्यार्थो वाक्यार्थः। तेन वाक्यार्थेनैव वाक्यार्थः कोऽपि यद्युपमीयते। एतदुक्तं भवति। वाक्यार्थ एव यद्युपमानं भवति तथा वाक्यार्थ एव चोपमेयः तदा सा वाक्यार्थोपमा। सा च द्विधा द्विप्रकारा। कथं पुनर्द्वैविध्यमित्याह एकानेकेवशब्दत्वात्। एकश्चानेकश्च एकानेकौ एकानेकाविवशब्दौ यस्यां सा एकानैकेवशब्दा तस्या भावः एकानेकेवशब्दत्वं तस्मात्।।४३।।

---

**त्वदाननमधीराक्षमाविर्दशनदीधिति।**
**भ्रमद्भृङ्गमिवालक्ष्यकेसरं भाति पङ्कजम्॥४४॥**

---

## रत्नश्री

त्वदा[47a]ननम् अधीरे लोले अक्षिणी यत्र। आविर्भूता दशनदीधितयो दन्तकान्तयो यस्मिन् तदीदृशं भातीति। एवं तावद् वाक्यमुपमेयभूतम्। किमिवेत्याह–भ्रमन्तौ भ्रमरौ यस्मिन्नालक्ष्याणि [ईषत]प्रकटानि केसराणि यत्र तादृशं पङ्कजमिवेति द्वितीयं वाक्यमुपमाभूतमियमेकेवशब्दा वाक्यार्थोपमा बोद्धव्येति॥

अनेकेवशब्दान्निदर्शयन्नाह–

## हृदयङ्गमा

एकेवशब्दां वाक्यार्थोपमाम् उदाहरति, त्वदिति।–अधीरे चञ्चले, अक्षिणी यत्र तत्, आविः आविर्भवन्त्यः, दशनानां दीधितयो यत्र तादृशं, तव आननं भ्रमन्तौ भृङ्गौ यत्र तत्, तथा आलक्ष्या ईषल्लक्ष्याः, केसराः किञ्जल्काः यस्य तादृशं, पङ्कजमिव भाति। (अत्र भृङ्गकेसररूपाङ्गवता उपमानभूतपङ्कजेनाङ्गिना नयनदशनकिरणरूपाङ्गवतः अङ्गिनः उपमेयभूतस्याननस्य साम्यं, तच्च वाक्यार्थगतमिति वाक्यार्थोपमा; तत्र च प्रथममुपमानोपमेययोरेव सादृश्यमवगमयत् पर्य्यालोचनया अधीराक्षं भ्रमद्भृङ्गमिव, दशनदीधिति आलक्ष्यकेसरमिव इत्यादिबोधादेकेवशब्दप्रयोगः पूर्वार्द्धवाक्यं परार्द्धेन एकेवशब्दघटितेन वाक्येन प्रयुक्तमिति वाक्यार्थोपमा इति बोध्यम्)॥४४॥

## प्रभा

एकेवशब्दघटितां वाक्यार्थोपमामुदाहरति–**त्वदाननमिति।** अधीरे चकितचञ्चले अक्षिणी नयने यस्मिंस्तद् अधीराक्षम्। आविः आविर्भवन्त्यो दशनानां रदानां दीधितयः किरणानि यस्मिंस्तद् आविर्दशनदीधिति। एतादृशं तवाननम्। भ्रमन्तौ संचरन्तौ भृङ्गौ यत्र तद् भ्रमद्भृङ्गम्। आ ईषत् लक्ष्याः केसराः किञ्जल्का यत्र तादृशम्। पङ्कजमिव भाति। अत्र सावयवस्य आननस्य सावयवेन पद्मेन साम्यम् उपमानोपमेयात्मकवाक्यद्वयेन वर्णितम्। एवं वाक्यार्थगतत्वात् वाक्योपमेयम्। अत्र विशिष्टयोरेवोपमानोपमेयत्वप्रतीतिरिष्टा इत्येकेवशब्दप्रयोगः। विशिष्टयोः पद्ममुखयोः साम्यबोधानन्तरं पर्यालोचनया अवयवानां विशेषणानां साम्यप्रतीतिर्बुद्ध्यारूढा भवति। अत्र उपमानोत्तरत' इव शब्दप्रयोगविरहाद् उपमानोत्तरत एव इवशब्दः प्रयोक्तव्य इति नियमं प्राचीना न मन्वत इति भाति।।४४।।

## विवृति

वाक्यार्थोपमालक्षणमभिधायोदाहरणाभ्यां स्पष्टयितुमेकशब्दं तदुदाहरति–

'त्वदाननमधीराक्षमाविर्दशनदीधिति' इति वाक्यम्। तस्यार्थः। त्वदाननं त्वन्मुखं; किं भूतम्। अधीरे चपले अक्षिणो यत्र तदधीराक्षम्। आविर्भवन्ती दशनदीधितिर्दन्तदीप्तिर्यस्य तदाचिर्दशनदीधिति। अयमस्य वाक्य(स्य)ार्थः– 'भ्रमद्भृङ्गमिवालक्ष्यकेसरं भाति पङ्कजम्' इत्यनेन वाक्यार्थेनैवापमीयते। भ्रमन्तौ भृङ्गौ भ्रमरौ यत्र तद्भ्रमद्भृङ्गं आलक्ष्याणि केसराणि यत्र तदालक्ष्यकेसरं भाति। भाति पङ्गजं भ्रमद्भृङ्गमिवेत्येक एवेवकार उपमाद्योतक इत्येकेवकारा वाक्यार्थोपमा व्याख्याता।।४४।।

---

**नलिन्या इव तन्वङ्ग्यास्तस्याः पद्ममिवाननम्।**
**मया मधुव्रतेनेव पायं पायमरम्यत॥४५॥**

---

## रत्नश्री

तस्यास्तन्वङ्ग्याः कस्याश्चिदिष्टाया आननं पायं पायम् अभीक्ष्णं पीत्वा निषेव्य मया अरम्यताक्रीडितमिति उपमेयार्थमेकं वाक्यं तावन्नलिन्या इव पद्ममिव मधुव्रतेनेवेति द्वितीयमुपमारूपं वाक्यमियमनेकेवशब्दा वाक्यार्थोपमा ज्ञातव्येति॥

## हृदयङ्गमा

अनेकेवशब्दाम् उदाहरति, नलिन्या इति।–नलिन्या इव तस्याः तन्वङ्ग्याः पद्ममिव आननं मधुव्रतेनेव मया पायं पायं पुनः पुनः पीत्वा, अरम्यत। (अत्र नलिन्या इव तन्वङ्ग्याः पद्ममिवाननं मधुव्रतेनेव मयेति त्रिभिरिवशब्दैः नलिन्यादिभिः साम्यं शाब्दबोधविषयीभूतं सत् वैचित्र्यं जनयतीति अनेकेवशब्दा वाक्यार्थोपमा इति बोध्यम्)॥४५॥

## प्रभा

अनेकेवशब्दप्रयोगघटितां वाक्योपमां दर्शयति–**नलिन्या इति** नलिन्या नलिनानि कमलानि सन्ति अस्या इति नलिनी पद्मलता तस्या इव। तन्वङ्ग्याः पद्ममिव आननम्। मधुव्रतेन भ्रमरेण इव मया पायं पायं पीत्वा पीत्वा अरम्यत। भावे लङ्। मधुव्रतेनेव मया इति प्रधानोपमानोपमेयौ। नलिनीतन्वङ्गीपद्ममुखादयोङ्गभूताः। तत्र प्रत्युपमानम् इवशब्दप्रयोगः। तेन च अङ्गाङ्गिनोः साम्यं शाब्दबोधविषयीभवत् चमत्कारातिशयं जनयति। अत्र

साम्यबोधोङ्गवाक्यानां शाब्दः। पूर्वोदाहरणे तु अङ्गिनः शाब्द इतरेषां तु उन्नयनोद्भव इति भेदः।।४५।।

## विवृति

अनेकेवकारामुदाहरति–

नलिन्या इव तन्वङ्ग्यास्तस्याः पद्ममिवाननमिति वाक्यार्थः मया मधुव्रतेनेववायमरम्यतेतीत्यनेन वाक्यार्थेनोपमीयते (?)। नलिनीव या तन्वङ्गी तस्याः पद्ममिव यत्कांन्तिमद्विकासि सुगन्धि चाननम् (तत्) मया मधुव्रतनेव पायंपायं पीत्वा (पीत्वाऽ) रम्यत। यथा नलिन्याः भ्रमरः पद्मं पीत्वा पीत्वा रमते तथा मया कान्ताया मुखं पीत्वा (पीत्वाऽ) रम्यतेति नलिन्या इवेत्येक वस्तु(इ)वकारः पद्ममिवेति द्वितीयः इत्यनेकेवकारा वाक्यार्थोपमा।।

वाक्येति। केनापि वाक्यार्थेन कोऽपि वाक्यार्थो यदि उपमीयते सा वाक्यार्थोपमा। सा उपमा, एकानेकेवशब्दत्वात् इवशब्दस्य एकत्वात् अनेकत्वाच्च, द्विधा द्विप्रकारा भवति। एकेन इवशब्देन उदाहरणम्–त्वदिति। अनेकेवशब्दोदाहरणम्–नलिन्या इति। पायंपायं पीत्वा पीत्वा।।४५।।

---

**वस्तु किञ्चिदुपन्यस्य न्यसनात्तत्सधर्मणः।**
**साम्यप्रतीतिरस्तीति प्रतिवस्तूपमा यथा॥४६॥**

---

## रत्नश्री

किञ्चिद् विवक्षितं पुरुषादि वस्तु उपक्षिप्य उपन्यस्य तेनोपन्यस्तेन वस्तुना सधर्मणस्तुल्यस्य वस्तुनोऽन्यस्य न्यसनात् अभिधानाद्धेतोः साम्यस्य तयोर्द्वयोः सादृश्यस्य प्रतीतिः अवसायोऽस्ति इति हेतोः प्रतिवस्तूपमा ईदृशी इष्यते, प्रतिवस्तुना तथाविधेन अर्थान्तरेण प्रस्तुतस्य वस्तुनस्तुल्यताप्रतिपत्तेः। यथेत्युदाहरति॥

## हृदयङ्गमा

प्रतिवस्तूपमां निरूपयति, वस्त्विति।–किञ्चित् वस्तु किमपि प्रकृतं वाक्यार्थम्, उपन्यस्य तस्य सधर्म्मणः समानधर्म्मस्य, एकधर्म्मवतः कस्यचित् अप्रकृतस्य वाक्यार्थस्य इत्यर्थः, न्यसनात् प्रकृतस्य समर्थनाय उपादानात्, साम्यप्रतीतिः सादृश्यवाचकपदाप्रयोगेऽपि व्यञ्जनया सादृश्यावबोधः, अस्ति भवति, इति हेतोः, प्रतिवस्तुनः अप्रस्तुतवाक्यार्थस्य सादृश्यप्रतीतेरियं प्रतिवस्तूपमा इत्यन्वयः। [ततश्च उपमेयस्य वाक्येन प्रतिपादने उपमानस्यापि वाक्यान्तरेण प्रतिपादनम् एकस्यैव धर्म्मस्य भिन्नवाचकतया निर्देशपुरःसरं भवति चेत् तदा प्रतिवस्तूपमेति लक्षणम्। अत एव वाक्यार्थोपमाया अस्याः भेदः। दर्पणकारस्तु इमाम् अलङ्कारान्तरमाह; यथा,–''प्रतिवस्तूपमा सा

स्यात् वाक्ययोर्गम्यसाम्ययोः। एकोऽपि धर्मः सामान्यो यत्र निर्दिश्यते पृथक्।।'' इति। स्वमते तु सादृश्यबोधादुपमात्वप्राप्त्या अलङ्कारान्तरत्वाङ्गीकारमनर्थकमेवेति उपमैव। वामनेनापि उक्तं,-''प्रतिवस्तुप्रभृतिरुपमाप्रपञ्चः'' (का० सू० वृ० ४अधि० ३अ० १सू०) इति]। यथेति वक्ष्यमाणोदाहरणप्रदर्शनार्थम्]।।४६।।

## प्रभा

प्रतिवस्तूपमालक्षणं विधत्ते-**वस्तु किंचिदिति।** किंचिदपि किमपि। प्रकृतं वस्तु। उपन्यस्य प्रथमं प्रतिपाद्य। तत्सधर्मणस्तस्य प्रकृतस्य सधर्मण समानधर्मस्य अप्रस्तुतस्य न्यसनात् प्रस्तुतवस्तुसमर्थनाय वाक्यान्तरेण प्रतिपादनात्। साम्यप्रतीति- रिवादिशब्दप्रयोगाभावेपि व्यञ्जनया सादृश्यावबोधो भवतीति प्रतिवस्तु प्रतिवाक्यार्थम् उपमा समानधर्मो यस्यां सा प्रतिवस्तूपमा भवति। सधर्मण इतिपदेन अप्रस्तुतवाक्येपि धर्मोपादानमवश्यमिति सूचितम्। तदुक्तं काव्यप्रकाशे-प्रतिवस्तूपमा तु सा। सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः (७६९ पत्रे) इति। वाक्ययोरेकसामान्ये प्रतिवस्तूपमा मता इत्यप्पय्यदीक्षितः। व्याख्याति च यत्रोपमानोपमेयवाक्ययोरेकः समानो धर्मः पृथक् निर्दिश्यते सा प्रतिवस्तूपमा इति। पृथङ्निर्देशनं कथितपदस्य दुष्टत्वाभिधानाद् भिन्नवाचकेन ज्ञेयम्। साम्यप्रतीतिरस्तीतीत्यनेन उपमाजीवातुसाम्यस्यात्र प्राधान्येन भानाद् उपमाविशेष एव अस्या अन्तर्भाव उचितः। वैचित्र्यान्तराभावान् नालंकारान्तरं युक्तम् इति ध्वन्यते। अनेन प्रतिवस्तूपमायां अलंकारान्तरविधानम् न क्षोदक्षममिति बोद्धव्यम्। यथा इत्युदाहरणोपन्यासाय।।४६।।

## विवृति

प्रतिवस्तूपमालक्षणमाह–

वस्तु किंचिदुपन्यस्य पूर्वं, ततस्तु (तत्स)धर्मणः तेन पूर्वोपन्यस्तेन वस्तुना समानो धर्मो यस्य धर्मिणः तस्य तत्सधर्मणो वस्तुनः यत् न्यसनं सा प्रतिवस्तूपमा नामालंकृतिः। कुतः। साम्यप्रतीतिरस्तीति। पूर्वापरयोरुपन्यस्तयोर्वस्तुनोः साम्यप्रतीति-स्सादृश्यबुद्धिरस्तीति हेतोः। इतिशब्दो हेत्वर्थे वर्तते। यथा हन्ती(ति) पलायते, वर्षतीति धावति। यथेत्युदाहरणे।।४६।।

---

**नैकोऽपि त्वादृशोऽद्यापि जायमानेषु राजसु।**
**ननु द्वितीयो नास्त्येव पारिजातस्य पादपः॥४७॥**

## रत्नश्री

जगति चिरमारभ्य जायमानेषु राजसु मध्ये त्वादृशः त्वमिव गुणवान् एकोऽपि राजा, प्रागेवानेकः। अद्यापि न विद्यते न केवलं प्राक्, इत्येवं तावद् वस्तूपन्यस्तमेतत्। नन्वित्यादिना प्रतिवस्तूपन्यासः। नन्वित्यनुमतौ। पारिजातस्य दिव्यवृक्षविशेषस्य द्वितीयः समानः पादपो नास्त्येव। यथा पारिजात एको वृक्षजातिषूत्तमः तथा त्वं राजस्विति द्वयोः साम्यप्रतीतिरस्तीति योज्यम्॥

## हृदयङ्गमा

उदाहरणं दर्शयति, नेति।—जायमानेषु राजसु मध्ये अद्यापि त्वादृशः तव सदृशः, एकोऽपि न नास्ति, ननु भोः!, पारिजातस्य पादपः पारिजातवृक्ष इत्यर्थः, (अत्र राहोः शिर इत्यादिवदभेदे भेदविवक्षया षष्ठी) द्वितीयो नास्त्येव। (अत्र सदृशो नास्ति द्वितीयो नास्तीति साधारणधर्म एक एव पुनरुक्तिभिया शब्दान्तरेण उपन्यस्तः। दर्पणकारेण अस्या वैधर्म्येणापि उदाहरणं दर्शितम्; यथा,—"चकोर्य्य एव चतुराश्चन्द्रिकापानकर्मणि। विनाऽवन्तीर्न निपुणाः सुदृशो रतनर्मणि॥" अत्र चातुर्य्यनैपुण्याभ्यामपि वाक्यद्वयस्य साम्यप्रतीतिरस्तीति बोध्यम्)॥४७॥

## प्रभा

प्रतिवस्तूपमामुदाहरति–**नैकोपीति।** जायमानेषु उत्पाद्यमानेषु। इदमुपलक्षणं जातेष्वपि। तेन अद्यापीतिवचनं सुसंगतं भवति। तथा च जातेषु जायमानेषु राजसु अद्यापि अद्ययावत्कालपर्यन्तम्। एकोपि त्वादृशो नास्ति। ननु इति निश्चये। परिजातस्य राहोः शिर इतिवद् भेदविवक्षया षष्ठी। पारिजातवृक्षस्य द्वितीयो नास्त्येव। एक एव समुल्लसतीत्यर्थः। पारिजातस्य द्वितीयः पादपो नास्ति इति वान्वयः। अत्र सदृशो नास्ति द्वितीयो नास्ति इति एक एव समानो धर्मः शब्दान्तरेण वाक्यद्वये निर्दिष्ट इति प्रतिवस्तूपमा। साम्यं चात्र गम्यम् इयं वैधर्म्येणापि भवति यथा–

विद्वानेव हि जानाति विद्वज्जनपरिश्रमम्।
न हि वन्ध्या विजानाति गुर्वीं प्रसववेदनाम्।।

इति। यथा वा–

यदि सन्ति गुणाः पुंसां विकसन्त्येव ते स्वयम्।
न हि कस्तूरिकामोदः शपथेन विभाव्यते।।

इति।।४७।।

## विवृति

नैकोऽपि त्वादृशोद्यापि जायमानेषु राजसु। आसतां तावत् बहवः एकोपि त्वादृशस्त्वत्समो राजा जायमानेषु राजसु। नेति प्रतिषेधे। असतीतिवाक्यशेषः। इति पूर्वमुपन्यस्तं वस्तु। तत्सधर्मणो वस्तुनो न्यसनम्–'ननु द्वितीयो नास्त्येव पारिजातस्य पादपः'। न(नु?) द्वितीयो नास्ति तथा त्वत्समोऽन्यो राजापि.... .... स्या

(ना?)स्तीति पारिजातपादपेनोपमीयमानत्वात् प्रतिवस्तूपमालङ्कारः॥

वस्त्विति। 'राजीवमिव ते वक्त्रम्' इति वस्तूपमा पदार्थोपमा। इयं तु प्रतिवस्तूपमा वाक्यार्थोपमा इति भेदः॥

वस्त्विति। तत्सधर्मणः उपन्यस्तवस्तुसधर्मणो वस्तुन इति यावत्। तस्य न्यसनेन साम्यप्रतीतिर्भवतीति सदृशवस्तुन्यासादुत्पन्ना सेयं प्रतिवस्तूपमा। असौ तु वक्ष्यमाणात् अर्थान्तरन्यासाभिधानात् अलङ्कारात् भिन्ना। प्रतिवस्तूपमायां समानधर्माणामेव न्यसनम्; अर्थान्तरन्यासे तु प्रस्तुतार्थसाधनस्य सदृशस्य वा विसदृशस्य वा न्यसनम्; इति भेदः। उदाहरणम्—नैकोऽपीति। ननुशब्दः प्रसिद्धौ॥४७॥

---

**अधिकेन समीकृत्य हीनमेकक्रियाविधौ।**
**यद् ब्रुवन्ति स्मृता सेयं तुल्ययोगोपमा यथा॥४८॥**

## रत्नश्री

अधिकेन केनचित् जात्यादिना हीनं किञ्चिदेकस्याः क्रियाया विधौ सम्पादने समीकृत्य समानीकृत्य ब्रुवन्ति प्रयुञ्जते कवयो यत्। सामान्योक्तिरियं यदिति। यद्वेदृशं वचनं किं तत्? सेयमीदृशी तुल्ययोगोपमा स्मृतेति विशेषः। एकक्रियासम्बद्धस्य द्वयोः साधारणत्वात् तद्द्वारेण उपमा तुल्ययोगोपमा। यथेत्युदाहरति॥

## हृदयङ्गमा

तुल्ययोगोपमां लक्षयति, अधिकेनेति।–एकक्रियाविधौ एकजातीयक्रियाविधाने, हीनं न्यूनं वस्तु, अधिकेन अधिकगुणेन, समीकृत्य सदृशीकृत्य, अत्र पूर्वकालविहितस्य क्त्वाप्रत्ययस्य समकालार्थकत्वात् सदृशीकुर्वन्नित्यर्थः, यत् ब्रुवन्ति कवयो यत् वर्णयन्ति इत्यर्थः, सा इयं तुल्ययोगोपमा क्रियायामधिकहीनगुणयोः तुल्यसम्बन्धात् तुल्ययोगोपमा इति समाख्या, स्मृता; तथा च एकजातीयक्रियया प्रस्तुताप्रस्तुतयोः साम्यकीर्त्तनं तुल्ययोगोपमा इति लक्षणम्। यथेति उदाहरणप्रदर्शनार्थम्। (दर्पणकारस्तु इमामलङ्कारान्तरं दीपकमाह; यथा,–"अप्रस्तुतप्रस्तुतयोर्दीपकन्तु निगद्यते" इति)॥४८॥

## प्रभा

इदानीं तुल्ययोगोपमां लक्षयति–**अधिकेनेति**। एकक्रियाविधौ एक- जातीयक्रियाया अनुष्ठाने। हीनं न्यूनगुणं वस्तु। अधिकेंन गुणाधिकवस्तुना समीकृत्य समानं विधाय। यत् सप्तम्यर्थकमव्ययमेतत्। यत्र चमत्कृतौ। ब्रुवन्ति वैचित्र्येण कथयन्ति सेयं तुल्ययोगोपमा। हीनाधिकयोस्तुल्यत्वेन यो योगः संबन्धस्तेन संबन्धेन औपम्यं यत्र सा तुल्ययोगोपमा इति स्मृता। तथा च एकजातीयक्रियया प्रस्तुताप्रस्तुतयोर्हीनाधिकयोः साम्यकीर्तनं तुल्ययोगोपमा इति फलितम्। प्रकृतानामप्रकृतानां वा एकधर्मसंबन्धरूपा अर्वाचीनैरुक्ता तुल्ययोगिता तु भिन्नैव स्वरूपभेदात्। तथा अग्रे वक्ष्यमाणा–

विवक्षितगुणोत्कृष्टैर्यत् समीकृत्य कस्यचित्।
कीर्तनं स्तुतिनिन्दार्थं सा मता तुल्ययोगिता।। (२.२३०)

इयमपि भिन्नैव। अस्यां तुल्ययोगितायां सर्वस्य समकक्षतया वर्णनस्यापेक्षितया न तत्रोपमानोपमेयभावस्यापेक्षा। तेन च न साम्यं वाच्यं व्यङ्ग्यं वात्र समुद्भवति। पर्यालोचनया पर्यवसाने तद् यथाकथंचित् प्रतीतिपदवीमारोहति। तुल्ययोगोपमायां तु प्रकृताप्रकृतत्वेनोपमानोपमेयभावस्य विवक्षितत्वादत्र साम्यं वाच्यमर्यादया व्यङ्ग्यमर्यादया वा शब्दादेव प्रतीतं भवति इत्युभयोर्भेदः। तथैव च स्तुतिनिन्दार्थं तुल्ययोगिताप्रवृत्तिः केवलसमत्वापादनाय च तुल्ययोगोपमाप्रवृत्तिरिति

प्रवृत्तिनिमित्तभेदेनापि उभयोर्भेद इति बोद्धव्यम्। यथेत्युदाहरणोपन्यासाय।।४८।।

## विवृति

तुल्ययोगोपमालक्षणमाह–

अधिकेन समीकृत्य अधिकेन वस्तुना सह समीकृत्य उद्दिश्य हीनमेक क्रियाविधौ एककार्यकरणं प्रति यद्बुवन्त्याचार्याः स्मृता सेयं तुल्ययोगोपमा। यथेत्युदाहरणे।।४८।।

---

**दिवो जागर्ति रक्षायै पुलोमारिर्भवान् भुवः।**
**असुरास्तेन हन्यन्ते सावलेपास्त्वया नृपाः।।४९।।**

## रत्नश्री

पुलोमारिः देवराजः प्रमादनिद्राविगमात् जा[47b]गर्ति कार्येष्ववधत्ते। किमर्थम्? दिवः स्वर्गलोकस्य रक्षायै परिपालनार्थम्। भुवः पृथिव्या रक्षायै भवान् विवक्षितः कश्चिन्नरेश्वरो जागर्तीत्युत्प्रेक्ष्यम्। तेन पुलोमारिणा सावलेपा दृप्ता असुरा हन्यन्ते, त्वया च नृपाः सावलेपा हन्यन्ते। अत्र देवराजस्य अधिकस्य नृपस्य च कस्यचित् तदपेक्षया जात्यादिना हीनस्य रक्षाद्येकक्रियायोगस्तुल्य इति तद्द्वारेण तयोः साम्यावगतेस्तुल्ययोगोपमा ईदृशी द्रष्टव्येति।।

## हृदयङ्गमा

तुल्ययोगोपमामुदाहरति, दिव इति।–पुलोमारिः इन्द्रः, दिवः स्वर्गस्य, रक्षायै, भवान् भुवः पृथिव्याः, रक्षायै जागर्त्ति, तेन इन्द्रेण, असुरा हन्यन्ते, त्वया सावलेपाः गर्विताः, नृपाः हन्यन्ते। अत्र हीनस्य प्रस्तुतस्य राज्ञः गुणाधिकेन इन्द्रेण एकजातीयक्रियाकरणेन समीकरणात् तुल्योगोपमा इति।।४९।।

## प्रभा

तुल्योगोपमामुदाहरति–**दिवो जागर्तीति**। पुलोमारिः इन्द्र। इन्द्रेण श्वशुरः पुलोमा निहतः। तदुक्तं हरिवंशे–

कृत्वा संबन्धकं चापि विश्वसेच्छत्रुणा न हि।
पुलोमानं जघानाजौ जामाता सन् शत क्रतुः।। इति।।

दिवः स्वर्गस्य। रक्षायै जागर्ति अवहितो भवति। भवान् भुवो रक्षायै जागर्ति। तेन पुलोमारिणा असुरा हन्यन्ते। त्वया सावलेपा उद्धता नृपा हन्यन्ते अत्र हीनस्य प्रस्तुतस्य राज्ञो गुणाधिकेन महेन्द्रेण सह एकजातीयक्रियाविधानेन तुल्यताप्रतिपादनात् तुल्ययोगोपमा। अत्र साधर्म्यं व्यङ्ग्यम्।।४९।।

## विवृति

दिवः स्वर्गस्य रक्षायै रक्षणार्थं पुलोमारिरिन्द्रः जागर्ति। भवानपि भुवः पृथिव्या रक्षायै जागर्ति। असुरा दानवाः तेन पुलोमारिणा हन्यन्ते। त्वयापि सावलेपाः सदर्पा नृपा वैरिणो हन्यन्ते। अधिकेन पुलोमारिणा सह समीकृत्य नृपतेस्साम्यमापद्यत इति(?) दिवोरक्षणभूरक्षणजागरणं प्रति तथा असुरहननं सदर्पनृपहननं एकक्रियाविधिं प्रति(?) नृपतेः पुलोमारिणा इन्द्रेण समतापादनात्तुल्ययोगोपमा।।

अधिकेनेति। एकक्रियाविधौ–अत्र हननक्रियायां–हीनाधिकौ समाहृतौ। अतः तुल्ययोगोपमयेम्। उदाहरणम्–दिव इति। जागर्ति निद्राक्षयं करोति। पुलोमारिः इन्द्रः। सावलेपाः सगर्वाः।।४९।।

---

**कान्त्या चन्द्रमसं धाम्ना सूर्यं धैर्येण चार्णवम्।**
**राजन्ननुकरोषीति सैषा हेतूपमा स्मृता॥५०॥**

---

## रत्नश्री

राजन्नित्यामन्त्रणम्। कान्त्या सौम्यतया चन्द्रमसम् अनुकरोषि। तेन तुल्योऽसीत्यर्थः। धाम्ना तेजसा सूर्यमनुकरोषि। धैर्येण स्थित्वा अर्णवं सागरमनुकरोषि। एवंविधा या सैषा तादृशी हेतूपमा स्मृता तज्ज्ञैः। कान्त्यादिहेतूपन्यासेन साम्यप्रतीतेरिति॥

कथमत्र व्यवस्था? किमवश्यमुपमानोपमेययोरेकलिङ्गत्वम्, अभिन्नवचनता च? अन्यथापीत्यत्राह–

## हृदयङ्गमा

हेतूपमाम् उदाहरति, कान्त्येति।–हे राजन्! कान्त्या शरीरशोभया, चन्द्रमसं, धाम्ना तेजसा, सूर्य्यं, धैर्य्येण धीरतया, अर्णवम् अनुकरोसि तुलयसि। अत्र राज्ञः चन्द्रादिभिः सादृश्यस्य कान्त्यादिहेतुकत्वात् एषा हेतूपमा इति॥५०॥

## प्रभा

हेतूपमां उदाहरणेन दर्शयति–**कान्त्येति**। निगदेनेवार्थो भवति। अत्र चन्द्रादिभिः समं नृपगतसादृश्यस्य कान्त्यादयो हेतवो निर्दिष्टाः। अतो हेतूपमा॥५०॥

## विवृति

"कान्त्या चन्द्रमसं धाम्ना सूर्यं धैर्येण चार्णवं, राजन्ननुकरोषीति सैषा हेतूपमा स्मृता"। कान्तिधामधैर्याणि चन्द्रसूर्यमनुष्याणां अनुकरणे राज्ञो हेतव इति हेतूपमा।।

**कान्त्येति।** कान्त्या धाम्ना धैर्येण इति औपम्यहेतुनिर्देशात् हेतूपमा।।५०।।

---

**न लिङ्गवचने भिन्ने न हीनाधिकतापि वा।**
**उपमादूषणायालं यत्रोद्वेगो न धीमताम्॥५१॥**

---

## रत्नश्री

लिङ्गमिदं प्रसिद्धमङ्गसन्निवेशादिलक्षणं स्त्रीत्वादि। वचनमेकवचनादि। ते द्वे भिन्ने विजातीये। हीनतोपमावस्तुनो जात्यादिना अधिकतापि वा। सर्वमेतत् उपमायां दूषणाय विरोधार्थं नालं न समर्थमित्युत्सर्गः। तत्रापवादमाह–यत्रेत्यादि। यत्र क्वचिद् विषये धीमतां कवीनामुद्वेगोऽप्रीतिरसम्मतिर्न भवति तादृशि प्रहते प्रयोगमार्गे नायं दोषः। यस्त्वप्रहतोऽशिष्टो विषयः तत्रायं दोष इत्यर्थादुक्तं भवति। तं च दर्शयिष्यतीति॥

तदुदाहरति–

## हृदयङ्गमा

इत्थमुपमां तद्भेदांश्च निरूप्य प्रसङ्गतस्तद्गतान् दोषान् विवक्षुः तेषाञ्च कदाचित् अदूषकत्वमाह, नेति।–यत्र धीमतां सामाजिकानाम्, उद्वेगः प्रतीतिविघातः, न, भवतीति शेषः, तादृशे भिन्ने पृथग्भूते, लिङ्गवचने तथा हीनाधिकता हीनपदत्वम् अधिकपदत्वं वा, उपमादूषणाय न अलं न प्रभवन्तीत्यर्थः। (दोषाश्च प्राचीनैरुक्ताः ; यथा,–"हीनाधिकत्वं वचनलिङ्गभेदो विपर्य्ययः। असादृश्यासम्भवौ च दोषाः सप्तोपमागताः॥" इति। हीनाधिकता च उपमानस्य उपमेयापेक्षया इति बोध्यम्। लिङ्गवचनव्यत्यासे साधर्म्यस्य उभयान्वयाभावेन साम्यस्य सम्यगप्रतीतिः, हीनतायाम् उपमानस्य अपकृष्टत्वावबोधात्

प्रस्तुतस्य उपमेयस्य अनुत्कर्षः, अधिकतायाञ्च महतोपमानेन क्षुद्रोपमेयस्य सादृश्यमुपहसनीयमेव, एतान्यत्र दूषकतावीजानि, यत्र तु एतानिकारणानि न सन्ति तत्र एतेषां न दोषावहत्वमिति; तथा हि उपमानोपमेयोभयगतधर्म्मस्योभयान्वयबाधाभावे लिङ्गवचनभेदानां हीनताऽधिकतयोर्नैकान्तिकत्वे च हीनताऽधिकतानां दोषाभाव इति निष्कर्षः। केचित्तु कालपुरुषविध्यादिभेदानपि उपमादोषानाहुः, उदाहरन्ति च क्रमेण; यथा,–"अतिथिं नाम काकुत्स्थात् पुत्रमाप कुमुद्वती। पश्चिमादयामिनीयामात् प्रसादमिव चेतना।।" अत्र चेतनायामाप्नोतीत्यन्वेति न त्वापेति भूतकालः। "प्रत्यग्रमज्जनविशेषविविक्तमूर्त्तिः कौसुम्भरागरुचिरस्फुरदंशुकामा। विभ्राजसे मकरकेतनमर्च्चयन्ती बालप्रबालविटपिप्रभवा लतेव।।" अत्र वासवदत्तायां विभ्राजसे इति मध्यमपुरुषोऽन्वेति लतायान्तु विभ्राजते इति। "गङ्गेव प्रवहतु ते सदैव कीर्त्तिः" इत्यत्र कीर्त्तौ विध्यर्थः सम्भवति न तु गङ्गायां, सिद्धत्वात्। एवं "पुत्रं लभस्वात्मगुणानुरूपं भवन्तमीड्यं भवतः पितेव।" अपि च "चिरं जीवतु ते सूनुर्मार्कण्डयमुनिर्यथा" इति। अत्र मार्कण्डेयमुनिर्यथा जीवतीति प्रयोज्यम्। एते दोषाश्च प्रायशः कविभिरगणिता इति बोध्यम्)।।५१।।

## प्रभा

एवं विविधभेदसहितामुपमां विस्तरतो निरूप्य प्रसङ्गतस्तद्गतान् दोषान् विवक्षुरादौ प्राचीनोक्तं निरपवादं दोषस्वरूपं खण्डयति–**नेति**। भामहो हि उपमाया इत्थं दोषानाह।

हीनतासंभवो लिङ्गवचोभेदो विपर्ययः।
उपमानाधिकत्वं च तेनासदृशतापि च।।

त एते उपमादोषाः सप्त मेधाविनोदिताः। (२.३९-४०) इति।

अत्र विपर्ययोसादृश्यम् असंभवश्चेति त्रयो दोषा यथाकथंचित् सादृश्यं यत्रोद्भूतं प्रतीयते इत्युपमालक्षणे सादृश्यस्य उद्भूतविशेषणत्वेनैव निरस्ता भवन्तीति न विचारणीयाः। उर्वरितदोषचतुष्टयस्य उद्वेगतानुद्वेगते विमृश्येते। यत्र धीमतां सहृदयानाम्। उद्वेगः प्रतीतिविघातजन्यसंत्रासो न भवति। तादृशस्थले भिन्न उपमानोपमेयदयोः पृथग्भूते लिङ्गवचने। तथा हीनाधिकता उपमानस्य न्यूनत्वम् अधिकत्वं च। उपमादूषणाय नालम् समर्थानि न भवन्ति। एवं च धीमतामुद्वेग एव दोषस्य कारणम्। तदुक्तमाग्नेये-विभक्तिसंख्यालिङ्गानां यत्रोद्वेगो हि धीमताम् (३४७.२९) इति। स चोद्वेगो विशेषणविशेष्यादिपदानां परस्परसंबन्धक्लेशरूपो विगीतवर्णने समुद्भवति। यदि केनापि विशेषकारणेन स न प्रादुर्भवेत् तर्हि तत्र नास्ति उपमादीनां दुष्टत्वम्। प्रायो भिन्नलिङ्गवचनयोरुपमानोपमेययोरेकतरलिङ्गवचनानुगतेन समानधर्मेण तदन्येन भिन्नलिङ्गवचनविशिष्टेन संबन्धो दुष्करो भवति। अत एतादृशी उपमा उद्वेगकरी। तथा उपमानस्य हीनतायां उपमेयस्यानुत्कर्षाद् अधिकतायां च तत्सापेक्षतया उपमेयस्यात्यन्तनिकृष्टत्वेन वैरस्येनोद्वेगो भवति। एतच्चाग्रे उदाहरणे स्फुटीभविष्यति।।५९।।

## विवृति

लिङ्गं स्त्री (पुं) नपुंसकं, वचनं एकद्विबहुत्वादि(वाचि?) लिङ्गं च वचनं न लिङ्गवचने भिन्ने विसदृशे उपमादूषणाय नालं, न समर्थे उपमां दूषयितुम्। तथा न न्यूनाधिकताऽपि वा उपमानोपमेययोः लिङ्गवचनभेदो न्यूनाधिकता च न दोष इत्यर्थः।

किं सर्वत्र लिङ्गवचनभेदो न्यूनाधिकता च नोपमादूषणायालमित्याह–यत्रोद्वेगो न धीमताम्। यत्र लिङ्गवचनभेदे न्यूनाधिकतायां चोपमानोपमेययोर्धीमन्तो नोद्विजन्ते। तत्र(न) दोष इति। अर्थात् यतो धीमन्त उद्विजन्ते, तत्र लिङ्गवचनभेदो न्यूनाधिकता चोपमादूषणायालमिव(मेव?)॥

उपमानोपमेययोः लिङ्गभेदो वचनभेदश्च न दोषाय इत्याह–नेति॥

उपमानोपमेययोः लिङ्गवचनादिषु भिन्नेषु हीनाधिकतायां सत्यामपि तत् न दूषणाय भवतीत्याह–नेति। उपमादूषणाय लिङ्गभेदो वचनभेदश्च समर्थो न भवति। यस्मिन् लिङ्गभेदे वचनभेदे विदुषाम् उद्वेगो न स्यात् मनोव्यथा न स्यात्। तथा हीनत्वं अधिकत्वञ्च विदुषां यत्र उद्वेगाय न, तत् उपमादूषणाय न भवति। ननु 'अधिकेन समाहृत्य' इत्यादिना तुल्ययोगोपमालक्षणमुक्तम्। तस्याश्च हीनाधिकोपमायाश्च को विशेषः इति चेत् उच्यते। तत्र तुल्ययोगितायां हीनम् अधिकेनैव योजयति। सा च योजना भिन्नार्थैः हीनाधिकैः यथा कथञ्चित् दृश्यमानोपमैः एकस्यां क्रियायामेव समाहृत्य उपयोगः, इति तुल्यक्रियायमेव उपयोगात् तुल्ययोगोपमा मता। अत्र तु अभिन्नार्थैः हीनाधिकैः साक्षाद्दर्शितोपमानशब्दैरुपमीयत इत्यदोषः। तुल्ययोगोपमायां प्रयोगोऽपि अस्ति–'दुदोह गां स यज्ञाय सस्याय मघवा दिवम्। सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम्'॥५१॥

**स्त्रीव गच्छति षण्डोऽयं वक्त्येषा स्त्री पुमानिव।**
**प्राणा इव प्रियोऽयं मे विद्या धनमिवार्जिता॥५२॥**

---

## रत्नश्री

अयं षण्डः षण्डकः स्त्रीव गच्छति तच्चेष्टानुवृत्तेः। ऐषा स्त्री पुमानिव पुरुष इव वक्ति तादृशप्रागल्भ्ययोगात्। अत्र लिङ्गनानात्वमुपमानोपमेययोः। अयं विवक्षितः कश्चिन्मम प्रिय इष्टः प्राणा इव। विद्या व्याकरणादयः अर्जिता धनमिवेति वचनभेदः। एवंविधे समुचिते विषये लिङ्गवचनभेदो नोपमां दूषयति। प्रत्युत रसावह इति॥

हीनाधिकतामुदाहरन्नाह–

## हृदयङ्गमा

लिङ्गवचनभेदस्य अदूषकत्वं दर्शयति, स्त्रीति।–अयं षण्डः स्त्रीव गच्छति, एषा स्त्री पुमानिव वक्ति। (अत्र क्रियाद्वयप्रतिपाद्यस्य साधाराणधर्मद्वयस्य उभयत्रान्वयात् उपमानोपमेययोः लिङ्गभेदेऽपि न दोषः)। अयं जनः, मे प्राणा इव प्रियः, (अत्र प्राणपदस्य समूहवाचकत्वेन नियतबहुवचनान्तत्वात् तादृशापरपदस्याप्रसिद्धत्वाच्च प्राणा यथा प्रियाः तथा अयं प्रिय इति वचनविपरिणामेनान्वयः कर्त्तव्य एव इति न दोषः)। तथा विद्या धनमिव आर्जता। [अत्र धनपदं नियतल्कोवलिङ्गमिति लिङ्गविपरिणामेन धनं यथा अर्जितं तथा विद्या अर्जिता इत्यन्वयः कर्त्तव्यः। अत एव धीमतामनुद्वेगकरत्वान्न दोषः। ततश्च यत्र साधारणधर्मरूपायाः क्रियाया उपमेयोपमानयोरन्वयो निर्बाधः, तत्र

लिङ्गवचनभेदेऽपि धीमतामनुद्वेगः, तथा यत्र नियतलिङ्गवचनपदैः सादृश्यं विधेयं, तत्र व्यत्ययेनान्वयसिद्धौ च नोद्वेगः। यथा "चन्द्र इव मखं" "मधुरः सुधावदधरः" इत्यादि। पुंनपुंसकयोरुपमानोपमेययोर्लिङ्गभेदस्तु प्रायशो न दोषभाग्भवति; उक्तञ्च वामनेन,–"इष्टः पुंनपुंसकयोः प्रायेण" (का० सू० वृ० ४अधि० २अ० १३सू०) इति। तथा सामासाभिहितायामपि लिङ्गभेदस्यादूषकत्वञ्च तेनैवोक्तं,–"लोकिक्यां समासाभिहिताया-मुपमाप्रपञ्चे च" (का० सू० वृ० ४अधि० २अ० १४सू०) इति। उदाहृतञ्च तत्रैव,–"समासाभिहितायां यथा,–भुजलता नोत्पलसदृशी" इति। एवञ्च यत्र लिङ्गभेदे विशेषणमुभयान्वयक्षमं तत्र न दोषः इति निष्कर्षः। एवमुभयत्र अन्वययोग्यक्रियया वचनभेदेऽपि न दोषः, यत्र च तद्भेदेऽपि उपमानान्वययोग्यं साधारणधर्म्माभिधायि पदं तत्र न दोषः। यदुक्तं काव्यडाकिन्यां,–"श्लेषमर्थादयो यत्र पदं सामर्थ्यवाचकम्। उभयान्वयि यत्रापि नास्य दोषस्य संस्थितिः।।" इति। उदाहृतञ्च वचनभेदे, यथा,–"तद्वेशोऽसदृशोऽन्याभिः स्त्रीभिर्मधुरताभृतः। दधते स्म परां शोभां तदीया विभ्रमा इव।।" अत्र वेशविभ्रमशब्दौ एकवचनबहुवचनान्तौ, तत्रासदृश इति सदृशशब्दस्यैकवचनान्तं सदृश्–शब्दस्य बहुवचनान्तं पदम्। "समानः सदृशः सदृक्" इत्यमरः। भृत इति क्तप्रत्ययान्तस्यैकवचनान्तं क्विप्प्रत्ययान्तस्य बहुवचनान्तम्; तथा दधते इति "दध धारणे" इति भौवादिकस्यैकवचनान्तं, "डु धा ञ धारणे" इति जुहोत्यादिपठितस्य बहुवचनान्तं रूपम्, इत्युभयत्राप्यन्वय-बोधसम्भवान्न दोषः। लिङ्गभेदेऽपि यथोपमाप्रपञ्चे,– "शुद्धान्तदुर्ल्लभमिदं–" इत्यादि, अत्राश्रमवासिजन

वनलतयोर्लिङ्गभेदः। वचनभेदश्च न दोषाय। एवमन्यान्यपि महाकविप्रयुक्तानि सन्तीति अवधेयम्]।।५२।।

## प्रभा

तत्र लिङ्गवचनभेदस्य निर्दोषत्वं दर्शयति–**स्त्रीवेति।** अत्र षण्ढः स्त्रीव गच्छति। एषा स्त्री पुमानिव वक्ति। इति वाक्यद्वये गमनवचनक्रिया या एव साधारणधर्मत्वात् तस्य च भिन्नलिङ्गयोरुपमानोपमेययोरक्लेशेनैवान्वयान्न भिन्नलिङ्गदोषः। अयं जनः। मे प्राणा इव प्रियः। तथा मया विद्या धनमिव अर्जिता संपादिता। इत्यत्र च प्राणशब्दो नित्यबहुवचनान्तो धनशब्दश्च नित्यनपुंसकः। नानयोः पर्यायशब्दाः प्रकृतोचितलिङ्गवचनाः। अतोगतिकगत्या यथा प्राणाः प्रियास्तथायं मे प्रियो यथा च धनमर्जितं तथा विद्या अर्जिता इति लिङ्गविपरिणामेन अन्वयः संपाद्य एव। अत्र च नोद्वेगः सहृदयानाम् अन्यगतेरभावात्.अतोत्र नोपमादोषः। अनयैव दिशा चन्द्र इव मुखम् सुधावदधर इत्यादिस्थले प्रतीतिमान्थर्याभावान्नोपमा दुष्टा इति ज्ञेयम्।।५२।।

## विवृति

तत्र धीमद्भिरभिमतं लिङ्गवचनभेदमुदाहरति–

अभिमतन्युनाधिकभावमुदाहरति–

'स्त्रीव गच्छति.... .... पुमानिव' इति लिङ्गभेदः। 'प्राणा इव प्रियोऽयं मे' इति वचनभेदः। विद्या धनमिवार्जिताः विद्या आन्वीक्षक्यादय इति उभयभेदः।।

यत्र लिङ्गभदेवचनभेदयोः अदूषणत्वं तत् दर्शयति–स्त्रीति। षण्डः स्त्रीवत्, स्त्री पुमानिव, विद्या धनमिव, इति लिङ्गभेदः। प्राणा इव प्रियोऽयम् इति वचनभेदः। 'असवो जीवितं प्राणाः' इति प्राणशब्दस्य नित्यबहुवचनान्तत्वात्, स्त्र्यादीनां नियतलिङ्गत्वाच्च, विदुषां अनुद्वेगकराः प्रयोगाः। हीनाधिकतायाः अदूषणत्वं दर्शयति–भवानिति। महीपाल भवानिव देवराजो विराजते। राज्ञो मनुष्यस्यापि लोकपालत्वात् न हीनोपमात्वम्। अत एव हेतोः अंशुभतो देवत्वात् अधिकोपमात्वमपि न दोषाय।।५२।।

---

**भवानिव महीपाल! देवराजो विराजते।**
**अलमंशुमतः कक्षामारोढुं तेजसा नृपः॥५३॥**

## रत्नश्री

महीपालेत्यामन्त्रणम्। भवानिव देवराजो विराजत इति। हीनेनाधिक[48a] उपमीयते। अयं नृपो विवक्षितः कश्चित्। अंशुमतः सूर्यस्य कक्षां पदवीं समताम् आरोढुमलं शक्तः। तेजसा हेतुनेति। अधिकेन हीन उपमितः। अत्यन्तभद्रतामेकान्ततेजस्वितां च प्रतीतामाश्रित्य अयमेवंविधः प्रयोगः। तथा भावनायां शोभत इत्यवसेयम्॥

तदीदृशं सर्वं सुन्दरमिति दर्शयति–

## हृदयङ्गमा

हीनतायामधिकतायाञ्च सहृदयानामनुद्वेगकरत्वं दर्शयति, भवानिति।–हे महीपाल! देवराजः भवानिव विराजते, [अत्र इवान्तपदमुपमानमिति नियमेन भवत्पदवाच्यस्योपमानत्वं, ततश्च उपमानभूतस्य राज्ञः मनुष्यत्वात् देवराजापेक्षया न्यूनत्वं स्वतः सिद्धमपि राज्ञः लोकपालांशसम्भूततया न अत्यन्तं वैरस्यम् आवहतीति न दोषः। राज्ञश्च लोकपालांशसम्भूतत्वे प्रमाणं यथा,–''अष्टानां लोकपालानां वपुर्धारयते नृपः'' इति। अत्र हीनत्वाधिकत्वे च जाति-प्रमाण-धर्म्मगतत्वेन प्रत्येकं त्रिविधे वेदितव्ये। उक्तञ्च वामनेन,–''जातिप्रमाणधर्म्मन्यूनतोपमानस्य

हीनत्वम्'' (का० सू० वृ० ४अधि० २अ० ९सू०) इति। ''तेनाधिकत्वं व्याख्यातम्'' (का० सू० वृ० ४अधि० २अ० ११सू०) इति च। तत्र जातिन्यूनत्वं यथोदाहृत,–''चाण्डालैरिव युष्माभिः साहसं परमं कृतम्।'' प्रमाणन्यूनत्वं यथा,–''वह्निस्फुलिङ्ग इव भानुरयं चकास्ति'' इति। धर्म्मन्यूनत्वं यथा,–''सूर्य्यांशुसम्मीलितलोचनेषु दीनेषु पद्मानिलनिर्म्मलेषु। साध्वाः स्वगेहेष्विव भर्त्तृहीनाः केका विनेशुः शिखिनां मुखेषु।।'' इति। एतानि च दोषाणामुदाहरणानि। दोषाभावत्वञ्चात्रोदाहृतमेव; अपि च,–''उत्सङ्गितकुरङ्गोऽयमृक्षमण्डलमध्यगः। विधुर्व्याघ्र इवाभाति हन्तुं विरहदुर्बलान्।।'' इति। अत्र श्लिष्टविशेषणेन निकृष्टस्यापि व्याघ्रस्य उपमानत्वं न दोषायेति। तथा ''चाण्डालश्च दरिद्रश्च द्वावेव सदृशौ मम। चाण्डालस्य न गृह्णाति दरिद्रो न प्रयच्छति।।'' अत्र निन्दायामेव तात्पर्य्ये उपमानस्य जातिन्यूनत्वं न दोषाय]। पूर्वार्द्धेन हीनत्वमुदाहृत्याधिकत्वमुदाहरति, अलमिति।–नृपः तेजसा अंशुमतः सूर्य्यस्य, कक्षां सादृश्यमिति यावत्, आरोढ़म् अलं समर्थः। अत्र मनुष्यविशेषस्य नृपस्य उपमानम् अंशुमान्, देवत्वादसौ जात्या अधिक इति। एवमन्यत्रापि द्रष्टव्यम्।।५३।।

## प्रभा

उपमानस्य हीनाधिकत्वयोर्निर्दोषतां दर्शयति–**भवानिति।** हे महीपाल राजन्। भवान् इव। देवराजः महेन्द्रो विराजते। अत्र नृपतेर्मर्त्यधर्मत्वात् प्रकृतदेवतास्वरूपाद्देवराजादपकृष्टत्वं स्पष्टमेव।

तथापि राज्ञां लोकपालांशसंभवत्वेन केषांचिद्देवराजसदृशपराक्रम-शालित्वेन च नेदं वैरस्यमावहति। राज्ञां लोकपालांशत्वमाह मनुः–अष्टानां लोकपालानां वपुर्धारयते नृपः (५.९६) इति। अन्यत्रापि–

इन्द्रात् प्रभुत्वं तपनात् प्रतापं क्रोधं यमाद्वैश्रवणाच्च वित्तम्।
आह्लादकत्वं च निशाधिनाथादादाय राज्ञः क्रियते शरीरम्।।

इति।

इयं च विपर्यासोपमा। अस्यां च पर्यायेणोपमेयस्यैव वर्णनं भवति। तेन चात्र न पर्यवसाने हीनतादोषः समुद्भवतीति अरुचिं प्रदर्श्य केचित्–

उत्सङ्गितकुरङ्गोयमृक्षमण्डलमध्यगः।
विधुर्व्याघ्र इवाभाति हन्तुं विरहदुर्बलान्।।

इति पद्यमुदाहरन्ति। अत्र श्लिष्टविशेषणाभ्यां प्रतीयमानं निकृष्टस्यापि व्याघ्रस्योपमानत्वं न दोषाय भवति। प्रत्युत विरहिनिषूदनक्रौर्यसूचनाय तदतीवोपयुक्तमिति कथयन्ति। तेजसा नृपः अंशुमतः सूर्यस्य। कक्षां साम्यम्–

पापे कक्षा त्विभरज्ज्वां काञ्च्यां हेमप्रकोष्ठके।
भित्तौ साम्ये रथभागेन्तरीये पश्चिमाचले।।

इति हेमचन्द्रः। आरोढुं आक्रमितुम्। अलं पर्याप्तः। अत्र जात्याधिकोंशुमान् उपमानीकृतः। परं पूर्वोक्तदिशा नृपस्य तदंशत्वान्नोद्वेगकरं तद् इति ज्ञेयम्।।५३।।

## विवृति

उदाहरणानि–स्त्रीति। षण्डः नपुंसकः; भिन्नलिङ्गस्य उदाहरणभेतत्। प्राणा इव प्रियः इति भिन्नवचनस्योदाहरणमेतत्। विद्याः धनमिव अर्जिताः इति भिन्नवचनभिन्नलिङ्गयोः उदाहरणम्। तत्र विद्याः श्रुतिस्मृतीतिहाससाङ्ख्ययोगन्यायवैशेषिकमीमांसा-गणितगान्धर्वचिकित्साधनुर्वेदपुराणज्यौतिषशब्दशास्त्रकृषिवार्ताशिल्पम् इति अष्टादश। ताः सर्वा विद्याः धनमिव अर्जिताः इत्यर्थः॥५३॥

---

**इत्येवमादेः सौभाग्यं न जहात्येव जातुचित्।**
**अस्ति च क्वचिदुद्वेगः प्रयोगेः वाग्विदां यथा।।५४।।**

## रत्नश्री

इत्येवमनन्तरोक्तं लक्ष्यमादिर्यस्यान्यस्यापि तज्जातीयस्य लक्ष्यजातस्य तद् [वर्णनं] न जातुचित् न कदाचिदपि सौभाग्यं शोभां जहाति त्यजत्येव। सदैव सुभगमीदृशमित्यर्थः। भिन्नलिङ्गवचनादि किञ्चिदुद्वेगकरं विपश्चितामिति कथयति क्वचित् प्रयोगे लक्ष्ये न सर्वत्र। उद्वेगो वैमुख्यमनादरः। अस्ति च न केवलं नास्ति। वाग्विदां शब्दहृदयज्ञानां कवीनाम्। यथेत्युदाहरति।।

## हृदयङ्गमा

प्रोक्तोदाहरणे दोषाभावत्वं प्रतिपादयति, इतीति।–इत्येवमादौ एवमादिप्रयोगे, जातुचित्, कदाचित् सौभाग्यम् उत्कर्षं, न जहाति न त्यजति एव, (अत उक्तं भोजराजेन,–"हीनं यत्रोपमानं स्यादुपमेयं गुणाधिकम्। हीनोपमं तदस्याहुः कवयः क्वाप्यदुष्टताम्।।" तथा "यत्रोपमानमुत्कृष्टमुपमेयं निकृष्यते। ज्ञेयं तदधिकौपम्यमस्यापि क्वाप्यदोषता।।" इति)। क्वचित् प्रयोगे तु वाग्विदां विदुषाम्, उद्वेगः प्रतीतिव्याघातः, अस्त्येव। यथेति उदाहरणार्थम्।।५४।।

## प्रभा

दोषस्य दोषाभावप्रस्तावमुपसंहरति–**इतीति**। इत्येवमादौ एतत्प्रभृतौ। वर्णनं जातुचित् कदाचिदपि। सौभाग्यं अनुद्वेगेन वैचित्र्यसौन्दर्यम्। न जहाति न त्यजति। तर्हि किं सर्वथा दोषा न

सन्त्येव इति चेन्न। क्वचित् प्रयोगे वाग्विदां सहृदयानाम्। उद्वेगः प्रतीतिमान्थर्येण वैचित्र्यव्याघातेन वा संत्रासोस्त्येव। यथा इति उदाहरणप्रस्तावाय।।५४।।

## विवृति

स्त्रीव गच्छति षण्डोयमित्यत आरभ्य तेजसा नृप इत्यन्तं न सौभाग्यं सौन्दर्यं जहाति त्यजति जातु कदाचित्। अस्ति च क्वचिदुद्वेगः प्रयोगं काव्यं वा विदां विदुषाम्। यथेत्युदाहरति। हंसीव धवलश्चन्द्रः इति लिङ्गभेदः। सरांसीवामलं नभः इति वचनभेदः। भर्तृभक्तो भटः श्वेव इति न्यूनता। खद्योतो भाति भानुवत् इत्यधिकता। ईदृशं हंसीव धवलश्चन्द्र इत्यादि वर्ज्यते परिह्रियते। सद्भिः कारणं त्वत्र चिन्त्यताम्। औचित्यानौचित्यलक्षणमूह्यताम्। शब्दराशेरनन्तत्वात् प्रत्येकं परिवर्जनकारणस्य कथयितुमशक्यत्वात् स्वयं सद्भिरूह्यताम्।।५४।।

---

**हंसीवः धवलश्चन्द्रः सरांसीवामलं नभः।**
**भर्तृभक्तो भटः श्वेव खद्योतो भाति भानुवत्॥५५॥**

## रत्नश्री

हंसीव धवलश्चन्द्र इति लिङ्गभेदः। सरांसीवामलं नभ इति वचनभेदः। भर्तृभक्तो भटः श्वेवेति हीनेन जात्यादिना अधिक उपमितः। खद्योतो ज्योतिरिङ्गणः भाति भानुवत् इत्यधिकेन हीन उपमीयत इति॥

एवंविधं हेयमिति दर्शयति–

## हृदयङ्गमा

उदाहरति, हंसीवेति।–चन्द्रः हंसीव धवलः, नभः सरासीव अमलं, भटः सैनिकः, श्वा इव भर्त्तृभक्तः स्वाम्यनुरक्तः, तथा खद्योतः भानुवत् भाति। अत्र यथाक्रमम् उपमानानां लिङ्गभेदः वचनभेदः न्यूनत्वम् अधिकत्वञ्च सामाजिकानां वैरस्यमावहतीति एतेषां दूषकत्वं नैयायिकमिति भावः॥५५॥

## प्रभा

दुष्टोपमामुदाहरति–**हंसीवेति**। चन्द्रः हंसीव धवलः। नभः सरांसीव अमलम्। भटः वीरः। श्वा इव सारमेय इव स्वामिभक्तः भर्तृभक्तः। खद्योतो भानुवद् भाति इति। अत्र प्रथमोपमायां हंसीव चन्द्र इति लिङ्गभेदः। तेन धवलशब्दस्योभयत्र संबन्धे लिङ्गविपरिणामादिक्लेशः। द्वितीयोपमायाम् सरांसीव नभ इत्यत्र वचनभेदः। तेन अमलशब्दस्यान्वयानुपपत्तौ पूर्ववदेव

वचनविपरिणामो विधेयः। तृतीयोपमायां भटः श्वेव इत्यत्र शुनोत्यन्तापकृष्टजातित्वात् सहृदयानां तत्सादृश्येनोद्वेगो भवति इति जातिन्यूनता। चतुर्थोपमायां खद्योतो भानुवदित्यत्र खद्योतसूर्ययोर्महदन्तरेण तत्सादृश्यवर्णनं वैरस्याय भवति। इति अधिकतादोषः।।५५।।

## विवृति

इत्येवमादयो विदुषां अनुद्वेगकराः। उद्वेगकराः पुनः एते इत्याह–इतीति। तद्विदां काव्यगुणदोषविदाम्। हंसीति–हंसीवत् धवलः इति उपमायाःसमानलिङ्गस्य हंसशब्दस्य विद्यमानत्वात्, सरांसीव अमलं नम इति उपमेयसमानवचनस्य सर इति शब्दस्य विद्यमानत्वाच्च, लिङ्गवचनभेदौ उद्वेगकरौ। भर्तृभक्तो भटः श्वे इति हीनत्वात्, खद्योतो भाति भानुवत् इति अधिकत्वाच्च, वर्ज्यते। इति कारणम् ऊह्यम्।।५५।।

---

**इदृशं वर्ज्यते सद्भिः कारणं तत्र चिन्त्यताम्।**
**गुणदोषविचाराय स्वयमेव मनीषिभिः॥५६॥**

## रत्नश्री

ईदृशम् इत्थंभूतं सद्भिः कविभिरुचितविद्वद्भिः वर्ज्यते नाद्रियते। नियतं तावदेतत्। किं कारणमिति चेत्? अत्रेदृशस्य वर्जने कारणं तु निमित्तं पुनः किञ्चित् स्वयमेव चिन्त्यतां निरूप्यताम्। नात्रास्माकमभिनिवेशः। अयमाशयः। ईदृशमशिष्टेष्टमप्रतीतं न सौभाग्यभाजनम्। अतश्चोद्वेगकरत्वाद् वर्ज्यते। न च ते पर्यनुयोगमर्हन्ति, प्रमाणत्वात् सर्वथा तेषाम्। केवलं तत्प्रयोगमार्गः प्रकृतिसुभगोऽस्माभिरनुगम्यते। यदि पुनस्तैराद्रियेत, के वयं वर्जयितुम्? सुभगमेव तदेदृशं तल्लक्षणत्वादिह सौभाग्यस्येति। तथा च व[क्ष्य]ते शिष्टेष्टस्तु न दुष्यतीति [३.१४८]। इत्थं चैतदुद्वेजनीयम्।

चन्द्रो हंस इवाभाति नभः सर इवामलम्।
भटो बन्धुरिव स्निग्ध खद्योतो भाति दीपवत्॥

प्रतीतमीदृशं सदा तत्समुचित[मनु]द्वेजनीयमेव, तद्विपर्ययात्तु पूर्वकमरञ्जकम्। अनेन [48b] च सर्वेण–

हीनताऽसम्भवो लिङ्गवचोभेदौ विपर्ययः।
उपमानाधिकत्वं च तेनासदृशतापि च॥
त एत उपमादोषाः सप्त मेधाविनोदिताः।
[काव्यालङ्कारे २.३९-४०]

इति मतान्तरमनैकान्तीकृतम्।

यद्यप्युपमानोपमेयभूतं वस्तु चन्द्रमुखादिशब्दवाच्यम्, तथापि इवादिशब्दव्यतिरेकेण सादृश्यमभिव्यक्ति न यातीति तदभिव्यञ्जकान शब्दान् व्यवहार व्युत्पत्तये दर्शयन्नाह–

## हृदयङ्गमा

उपसंहरति, ईदृशमिति।–सद्भिः सुधीभिः, ईदृशं काव्यं, वर्ज्यते त्यज्यते, न प्रयुज्यते इत्यर्थः ; मनीषिभिः सहृदयैः, स्वयमेव तत्र वर्जने, गुणदोषविचाराय कारणं उद्वेगानुद्वेगरूपमित्यर्थः, चिन्त्यताम्।।५६।।

## प्रभा

दोषविवेचनमुपसंहरति–**ईदृशमिति।** सद्भिः काव्यशास्त्र-निष्णातैः। ईदृशम् वर्ज्यते। तत्र कारणं प्रतीतिमान्थर्य-वैरस्योत्पादनादिकं चिन्त्यताम् स्वयमेवोह्यताम्। स्पष्टत्वाद् ग्रन्थविस्तारभिया मया न सर्वं तन्निरूप्यते। एतेन मया दोषनिरीक्षणस्य पद्धतिर्दर्शिता। अनयान्येपि दोषा विपश्चिद्भिर्ज्ञेया इति सूचयन् स्वग्रन्थस्य न्यूनतां परिहरतीति ज्ञेयम्। अत्र मुद्रितपुस्तकेषु गुणदोषविचाराय स्वयमेव मनीषिभिः। इत्यर्धमधिकं दृश्यते। अर्थस्तु स्पष्ट एव। प्राचीनपुस्तकेषु तददर्शनात् पुनरुक्तप्रायत्वाच्च वयं तत् प्रक्षिप्तमिति शङ्कामहे। अस्मिन् दोषविचारे भामहवामनभोजराजानां लक्षणोदाहरणानि व्युत्पादका-नीति दर्शयामः। तत्र वामनः– हीनत्वाधिकत्वलिङ्गवचन-भेदासादृश्यासंभवास्तद्दोषाः। तत्र जातिप्रमाणधर्मन्यूनतोपमानस्य हीनत्वम्। तत्र जातिन्यूनत्वरूपं हीनत्वं यथा–चाण्डालैरिव

युष्माभिः साहसं परमं कृतम्। प्रमाणन्यूनत्वं यथा–वह्निस्फुलिङ्ग इव भानुरयं चकास्ति। उपमेयादुपमानस्य धर्मन्यूनत्वं यथा–

स मुनिर्लाञ्छितो मौञ्ज्या कृष्णाजिनपटं वहन्।
व्यराजन्नीलजीमूतभागाश्लिष्ट इवांशुमान्।।

अत्र मौञ्जीप्रतिवस्तु तडिन्नस्ति इत्युपमानहीनत्वम्। तत्र जात्याधिक्यं यथा–विशन्तु विष्टयः शीघ्रं रुद्रा इव महौजस इति। विष्टयः कर्मकराः। प्रमाणाधिक्यं यथा–

पातालमिव नाभिस्ते स्तनौ क्षितिधरोपमौ।
वेणीदण्डः पुनरयं कालिन्दीपातसंनिभः।। इति।

धर्माधिक्यं यथा–

सरश्मि चञ्चलं चक्रं दधद्देवो व्यराजत।
सवाडवाग्निः सावर्तः स्त्रोतसामिव नायकः।।
(४.२.८ इत्यादि) इति।

अत्र सवाडवाग्निरित्यस्य प्रतिवस्तुन उपमेये अभावाद्धर्माधिक्यमिति ज्ञेयम् इति। उपमानोपमेययोर्लिङ्गव्यत्यासो लिङ्गभेदः। यथा–सैन्यानि नद्य इव जग्मुरनर्गलानि इति। अत्र अरुचिबीजं तु अस्माभिः पूर्वं दर्शितमनुसंधेयम्। वचनभेदो यथा–पश्यामि लोचने तस्याः पुष्पं मधुलिहो यथा। इति। अप्रतीतगुणसादृश्यमसादृश्यम्। यथा–ग्रथ्नामि काव्यशशिनं विततार्थरश्मिम्। इति। काव्यस्य शशिना सह यत् सादृश्यं तदप्रतीतैरेव गुणैः प्रतीतैर्गुणैर्नास्ति तदिति भावः। अनुपपत्तिरसंभवो यथा–

चकास्ति वदनस्यान्तः। स्मितच्छायाविकासिनः।
उन्निद्रस्यारविन्दस्य मध्ये मुग्धेव चन्द्रिका।। इति।

अत्र चन्द्रिकायामरविन्दस्योन्निद्रत्वं सृष्टिक्रमविरुद्धमित्यनुपपत्तिः। भोजराजस्तु उपमाया भिन्नलिङ्गन्यूनाधिकत्वरूपदोषम् वाक्यदोषेषु परिगणयति। लक्षणपूर्वकमेवमुदाहरति च। यथा–

यत्रोपमा भिन्नलिङ्गा भिन्नलिङ्गं तदुच्यते।
भवेत् तद्भिन्नवचनं यद्भिन्नवचनोपमम्।। (१.२५ इत्यादि) इति।

तत्र भिन्नलिङ्गस्योदाहरणं यथा–

वापीव विमलं व्योम हंसीव धवलः शशी।
शशिलेखेव हंसोयं हंसालिरिव ते यशः।। इति।

भिन्नवचनस्य यथा–

सरांसीवामलं व्योम काशा इव सितः शशी।
शशीव धवला हंसा हंसीव धवला दिशः।। इति।

न्यूनोपममिह न्यूनमुपमानविशेषणैः। यथा–

संहतचक्रवाकयुगा विकसितकमला मृणालसंछन्ना।
वापी वधूरिव रोचनाविलिप्तस्तनी सुखयति।। इति।

अत्र नेत्रबाहूपमापदानां वधूविशेषणत्वेनानुक्तत्वादिदं न्यूनोपमम्। अधिकं यत् पुनस्तैः स्यात् तमाहुरधिकोपमम्। यथा–

अभिनवमनोहरविरचितवलयविभूषा विभाति नववधूः।
कुन्दलतेव समुत्फुल्लगुच्छपरिणीयमानभ्रमरगणः।। इति।

अत्र भ्रमरगणस्योपमानविशेषणस्याधिक्यादधिकोपमम्। वाक्यार्थदोषेपि पुनः–

हीनोपमं भवेच्चान्यदधिकोपममेव च।
असदृक्षोपमं चान्यदप्रसिद्धोपमं तथा।। (१.५१ इत्यादि)

इति चतुर उपमादोषान् परिगणयति। उदाहरति च लक्षणपूर्वकम्। यथा–हीनं यत्रोपमानं स्यात् तत्तु हीनोपमं स्मृतम्। यथा–

क्वचिदग्रे प्रसरता क्वचिदाप्लुत्य निघ्नता।
शुनेव सारङ्गकुलं त्वया भिन्नं द्विषत्कुलम्।। इति।

तदेव यस्मिन्नधिकं तद्भवेदधिकोपमम्। यथा–

अयं पद्मासनासीनश्चक्रवाको विराजते।
युगादौ भगवान् ब्रह्मा विनिर्मित्सुरिव प्रजाः।। इति।

यत्त्वतुल्योपमानं तद्वदन्त्यसदृशोपमम्। यथा–

नमत हरं रोषानलनिर्दग्धमुग्धमन्मथशरीरम्।
विस्तृतनितम्बनिर्गतगङ्गास्त्रोतसमिव हिमवन्तम्।। इति।

अत्र कोपानलनिर्दग्धमुग्धमन्मथशरीरस्य हरस्य नितम्बनिर्गत-स्त्रोतसा हिमवता सह असादृश्यादिदमसदृशोपमम्। अप्रसिद्धोपमानं यद् अप्रसिद्धोपमं हि तत्। यथा–

कुमुदमिव मुखं तस्या गौरिव महिषः शशीव काव्यमिदम्।
शरदिव विभाति तरुणी विकसितपुलकोत्करा सेयम्।। इति।

अत्र कुमुदमुखयोर्गोमाहिषयोः काव्यशशिनोः प्रतीयमाने शरत्तरुण्योश्च विधीयमाने सादृश्ये उपमानोपमेयस्याप्रसिद्धत्वादप्रसिद्धोपममिदम्। तत्र वाक्यगतोपमादोषस्यापवादमाह–

यद्भिन्नलिङ्गमित्युक्तं विभिन्नवचनं च यत्।
उपमादूषणं तन्न यत्रोद्वेगो न धीमताम्।। (१.१२० इत्यादि)

यथा–

अन्यदा भूषणं पुंसः शमो लज्जेव योषिताम्।
पराक्रमः परिभवे वैयात्यं सुरतेष्विव।।

अत्र पुंसो योषित इव शमो लज्जेव पराक्रमो वैयात्यमिव इति लिङ्गभेदः। परिभवे सुरतेष्विव इत्यत्र लिङ्गवचनभेदः। स चैषामेव परस्परमुपमानोपमेयभावविक्षायां पर्यायान्तराभावादन्यथाकर्तुं न शक्यते इति सहृदयानुद्वेजकत्वान्न दुष्यति इति दोषस्यापि गुणत्वम्। तदिदं द्वयोरप्येकमुदाहरणम्। भिन्नलिङ्गस्यैव यथा–

यस्य त्रिवर्गशून्यानि दिनान्यायान्ति यान्ति च।
स लोहकारभस्त्रेव श्वसन्नपि न जीवति।।

अत्र पूर्ववदेव पर्यायान्तराभावात् स लोहकारभस्त्रेव इति लिङ्गभेदस्य न दोषः। भिन्नवचनस्यैव यथा–

प्राज्यप्रभावः प्रभवो धर्मस्यास्तरजस्तमाः।
मुक्तात्मानः शिवं नेमिरन्येपि ददतां जिनाः।।

अत्र नेमिरन्येपि इति वचनभेददोषेपि ददताम् इति क्रियापदादेर्वचनश्लेषमाहात्म्याद्गुणत्वम्।

यत्रोपमानधर्माः स्युर्नोपमेयेन संमिताः।
तद्धीनोपममित्याहुस्तत् प्रसिद्धौ न दुष्यति।।

यथा–

स मारुताकम्पितपीतवासा बिभ्रत् सलीलं शशिभासमब्जम्।
यदुप्रवीरः प्रगृहीतशार्ङ्गः सेन्द्रायुधो मेघ इवाबभासे।।

अत्र सेन्द्रायुध इति कार्मुकस्योपादानं वासः शङ्खयोस्त्वनुपादानादूनोपमत्वम्। तत्रेन्दुविद्युतोरतिप्रसिद्धत्वाददोषत्वम्। यदाह–

सर्वं सर्वेण सारूप्यं नास्ति भावस्य कस्यचित्।
यथोपपत्तिकृतिभिरुपमानं प्रयुज्यते।।

अखण्डमण्डलः क्वेन्दुः क्व कान्ताननमद्युति।
यत् किंचित् कान्तिसाम्यात् तु शशिनैवोपमीयते।।

क्रमेणानेन कृतिभिरेष्टव्यमाधिकोपमम्।
विशेषस्तूपमेयाङ्गमनुमानात् प्रतीयते।। इति।

यथा–

स पीतवासाः प्रगृहीतशार्ङ्गो मनोज्ञभीमं वपुराप कृष्णः।
शतह्रदेन्द्रायुधवान् निशायां संसृज्यमानः शशिनेव मेघः।।

अत्र शशिनो ग्रहणादधिकोपमत्वेपि शङ्खचक्रगदाधरो विष्णुरिति प्रसिद्ध्या उपमेये शङ्खोनुमेयो भवति। अतोत्र न दोषः। एवं वाक्यदोषापवादं उक्त्वा वाक्यार्थदोषापवादमाह–

यत्रोपमानमुत्कृष्टमुपमेयं निकृष्यते।
ज्ञेयं तदधिकौपम्यमस्यापि क्वाप्यदोषता।

यथा–

कान्त्या चन्द्रमसं धाम्ना सूर्यं धैर्येण चार्णवम्।
राजन्ननुकरोषि त्वं सौभाग्येनापि मन्मथम्।।

अत्र अधिंकौपम्येपि राज्ञो लोकपालांशत्वेन शिष्टैरादृतत्वाद्गुणत्वम्।

उपमानस्य वैषम्याद्भवेदसदृशोपमम्।
तस्याभ्यनुज्ञामिच्छन्ति व्यतिरेकोपमादिषु।

यथा–

प्रहितः प्रधनाय माधवानहमाकारयितुं महीभृता।
न परेषु महौजसश्च्छलादपकुर्वन्ति मलिम्लुचा इव।।

मलिम्लुचा इति उपमानस्य असदृशत्वेपि व्यतिरेकोपपादकत्वाद्गुणत्वम्।

यस्योपमानं लोकेषु न प्रसिद्धं तदिष्यते।
अप्रसिद्धोपमं नाम तत् क्वचिन्नैव दुष्यति।।

यथा–

उद्गर्भहूणरमणीरमणोपमर्दभुग्नोन्नतस्तननिवेशनिभं हिमांशोः।
बिम्बं कठोरबिसकाण्डकडारगौरैर्विष्णोः पदं प्रथममग्रकरैर्व्यनक्ति।।

अस्यामप्रसिद्धोपमत्वेन दूषणत्वेपि द्वयोरपि प्रसिद्धाप्रसिद्धयोः शृङ्गाररसोद्दीपकत्वसाम्याद्गुणत्वम्। केचित्तु कालपुरुषलोडर्थादिभेदमपि दोषमाहुः। यथा–

तस्यापनोदाय फलप्रवृत्तावुपस्थितायामपि निर्व्यपेक्षः।
त्यक्ष्यामि वैदेहसुतां पुरस्तात् समुद्रनेमिं पितुराज्ञयेव।।

अत्र समुद्रनेमिमत्यजमित्यन्वेति न तु त्यक्ष्यामीति। पुरुषभेदो यथा–

शरीरमात्रेण नरेन्द्र तिष्ठन्नाभासि तीर्थप्रतिपादितर्द्धिः।
आरण्यकोपात्तफलप्रसूतिः स्तम्बेन नीवार इवावशिष्टः।।

अत्र नीवार आभाति इत्यन्वेति न तु आभासीति। विध्यादिभेदो यथा–

आशास्यमन्यत् पुनरुक्तभूतं श्रेयांसि सर्वाण्यधिजग्मुषस्ते।
पुत्रं लभस्वात्मगुणानुरूपं भवन्तमीड्यं भवतः पितेव।।

अत्र भवन्तमलभत इत्यन्वेति न तु लभस्वेति। इति चित्रमीमांसादिप्रबन्धेषु द्रष्टव्यम्।।५६।।

## विवृति

उदाहरति–हंसीति। हंसीव धवलः चन्द्रः इति भिन्नलिङ्गस्य उदाहरणम्। सरांसीव अमलं नभः इति भिन्नवचनस्योदाहरणम्। भर्तृभक्तो भटः श्वेव इति अधिको भटो हीनेन शुना उपमीयत इति हीनोदाहरणम्। खद्योतो भाति भानुवत इति हीनः खद्योतः अधिकेन भानुना उपमीयत इति अधिकोदाहरणम्। ईदृशमिति–ईदृशं विद्वद्भिः वर्ज्यते। तत्र कारणं चिन्त्यताम्–रसविदां स्वसंवेद्यमित्यर्थः।।५६।।

**इववद्वायथाशब्दाः समाननिभसन्निभाः।**
**तुल्यसंकाशनोकाशप्रकाशप्रतिरूपकाः॥५७॥**

---

## हृदयङ्गमा

उपमाप्रतीतिरभिधया लक्षणया व्यञ्जनया च भवतीति तस्या वाचकादीनि निरूपयति, इवेत्यादि।–इवादयः शब्दाः ''उपमायां सादृश्यसूचकाः प्रोक्ताः'' इति वक्ष्यमाणेनान्वयः। ''इव'' इत्यारभ्य ''शशाङ्कवदनादिषु'' इत्यन्ताः सादृश्यवाचकाः, स्पर्द्धादीनां सादृश्ये सङ्केताकरणात् ''स्पर्द्धते'' इत्यादयः लक्षकाः, तथा ''तस्य मुष्णाति सौभाग्यम्'' इत्यादयः व्यञ्जकाः। (यद्यपि वैयाकरणनये,–''इवादीनां द्योतकत्वमेव न वाचकत्वं, निपातत्वादुपसर्गवत्'' इत्यादिना इवादीनां वाचकत्वं नाङ्गीकृतं, तथाऽपि आलङ्कारिकैर्वाचकत्वमङ्गीकृतमिति बोध्यम्। इवशब्दस्य सादृश्ये शक्तिः, सादृश्यञ्च तद्भिन्नत्वे सति तद्गतधर्मवत्त्वं, ततश्च चन्द्र इव मुखम् इत्यत्र तादृशचन्द्रवृत्तिधर्म्मवन्मुखम् इति बोधः। साधारणधर्म्मस्य शाब्दत्वे तद्रूपेणैव स इवार्थः; तथा च चन्द्र इव मुखं रमणीयम् इत्यत्र चन्द्रप्रतियोगिकान्योऽन्याभावसमानाधिकरणं यच्चन्द्रवृत्तिरमणीयत्वं तदाश्रयो मुखमिति बोधः)। वदिति इवार्थे तुल्यार्थे च विहितो वति-प्रत्ययः। [तस्यानुशासनञ्च, ''तत्र तस्येव'' (५।१।११६ पा०) ''तेन तुल्यं क्रिया चेद्वति'' (५।१।११५ पा०) इति]। वा इति व शब्दस्याप्युपलक्षकः, ''व वा यथा तथैवैवम्'' इत्यमरे व शब्दस्यापि सादृश्यवाचकत्वात्। (तथा च ''शात्रवं व पपुर्यशः'' इति कालिदासः। ''कादम्बखण्डितदलानि व पङ्कजानि'' इति प्रचीनप्रयोगः]। समानादयः उपमान्ताः शब्दा

अपि सादृश्यवाचकाः इव सदृशाः एव। (अमरेणापि तथैवोक्तं, यथा,–"वाच्यलिङ्गः समस्तुल्यः सदृक्षः सदृशः सदृक्। साधारणः समानश्च स्युरुत्तरपदे त्वमी।। निभसङ्काशनीकाश-प्रतीकाशोपमादयः।।" इति; एतेन निभादयः शब्दा उत्तरपदस्था एव सदृशार्थाः, निभादीनान्तु नित्यसमासविषयत्वात् चन्द्रेण निभम् इति समासं विना प्रयोगस्यासाधुत्वञ्च कथितम्,– "अविग्रहोऽस्वपदविग्रहो नित्यसमासः" इति सिद्धान्तात्। ततश्च निभादयः शब्दाः समासान्तर्गता एव प्रयुज्यन्ते, उक्तञ्च क्षीरस्वामिना,–"चन्द्रेण निभ इति न भवति, समास एव उत्तरपदत्वस्य रूढ़ेः" इति)।।५७।।

## प्रभा

अभिधालक्षणाव्यञ्जनाभिरुपमाप्रतीतिर्भवति इति तस्या वाचकादीन् निर्दिशति–इवेति। इवादयः शब्दाः सादृश्यवाचकाः सन्ति। तत्र इवोदाहरणम्–हंसीव कृष्ण ते कीर्तिः स्वर्गङ्गामवगाहते।

वत् तत्र तस्येव इति सप्तम्यन्ताद्विहितः। तेन तुल्यं क्रिया चेद्वतिरिति तृतीयान्ताद्विहितश्च तद्धितप्रत्ययो ग्राह्यः। उभयोरुदाहरणे यथा–

गाम्भीर्यगरिमा तस्य सत्यं गङ्गाभुजङ्गवत्।
दुरालोकः स समरे निदाघाम्बररत्नवत्।।

वा यथा–

आशीविषो वा संक्रुद्धः सूर्यो वाभ्रविनिर्गतः।
भीमोन्तको वा समरे गदापाणिरदृश्यत।।

यथा यथा–

धन्यस्यानन्यसामान्यसौजन्योत्कर्षशालिनः।
करणीयं वचश्चेतः सत्यं तस्यामृतं यथा।।

समानं यथा–

व्रणमुखच्च्युतशोणितशीकरस्थगितशैलतटाभुभुजान्तरः।
अभिनवौषरासरागभृता बभौ जलधरेण समानमुमापतिः।।

समासे यथा–

भुजे भुजङ्गेन्द्रसमानसारे भूयः स भूमेर्धुरमाससञ्ज।

निभो यथा–

प्रबुद्धपुण्डरीकाक्षं बालातपनिभांशुकम्।
दिवसं शारदमिव प्रारम्भसुखदर्शनम्।।

संनिभो यथा–

भगवान् यज्ञपुरुषो जगर्जागेन्द्रसंनिभः।

तुल्यं यथा–

अवेहि मां किंकरमष्टमूर्तेः कुम्भोदरं नाम निकुम्भतुल्यम्।

संकाशो यथा–

विमाने सूर्यसंकाशे रघुराजो व्यराजत।

नीकाशो यथा–

आकाशनीकाशतटां तीरवानीरसंकुलाम्।
बभूव चरतां हर्षः पुण्यतीर्थां सरस्वतीम्।।

प्रकाशो यथा–

चन्द्रप्रकाशं वदनं कान्ताया भाति सुन्दरम्।

प्रतिरूपको यथा–

वाग्भिः सुधायाः प्रतिरूपकाभिस्तनोति मोदं हृदि मेनिशं या।।५७।।

---

**प्रतिपक्षप्रतिद्वन्द्विप्रत्यनीकविरोधिनः।**
**सदृक्सदृशसंवादिसजातीयानुवादिनः॥५८॥**

## हृदयङ्गमा

प्रतिपक्षेति।–प्रतिपक्षादयश्च सादृश्यार्था एव इति न व्याख्याताः॥५८॥

## प्रभा

**प्रतिपक्षेति।** प्रतिपक्षप्रतिद्वन्दिनौ यथा–

पङ्केरुहश्रीप्रत्तिपक्षभूतनेत्रप्रभाभिः स्पृहणीयशोभम्।
चन्द्रप्रतिद्वन्द्वि विभाति बालामुखं निशायां ललितोत्सवेषु॥

प्रत्यनीकविरोधिनौ यथा–

कामस्य प्रत्यनीकोयं त्वं रतेश्च विरोधिनी।
इति तौ विरहे नूनं भृशं पीडयतो युवाम्॥

सदृग् यथा–

न त्वया सदृगन्योस्ति त्रैलोक्येपि मनोरमः।

सदृशो यथा–

सुधेव वाणी वसुधेव मूर्तिः सुधाकरश्रीसदृशी च कीर्तिः।
पयोधिकल्पा मतिरासफेन्दोर्महीतलेन्यस्य न हीति मन्ये॥

संवादी यथा–

विभाति बालावदने स्मितश्रीः संवादिनी शारदचन्द्रिकायाः।

सजातीयानुवादिप्रतिबिम्बा यथा–

कृष्णागुरुसजातीयं पीयूषस्यानुवादिनम्।
चन्द्रस्य प्रतिबिम्बं सत्सङ्गं संतापहं श्रये।।५८।।

---





**प्रतिबिम्बप्रतिच्छन्दसरूपसमसम्मिताः।**
**सलक्षणसदृक्षाभसपक्षोपमितोपमाः॥५९॥**

---

## हृदयङ्गमा

प्रतिविम्बेति।–प्रतिरूपं विम्बं प्रतिविम्बं, सादृश्यमित्यर्थः, तथा प्रतिच्छन्दः प्रतिरूपः ; सर्वे सादृश्यार्थाः सादृश्यवाचकाश्च ज्ञेयाः॥५९॥

## प्रभा

**प्रतिबिम्बेति।** प्रतिबिम्बोदाहरणं तु पूर्वश्लोकटीकायां दर्शितमेव।

प्रतिच्छन्दसरूपसंमिता यथा–

जामदग्न्यप्रतिच्छन्दः सरूपो यः किरीटिनः।
संमितो रघुनाथस्य शिवराजो विराजते॥

समं यथा–

यथा लतायाः स्तबकानतायाः स्तनावनम्रे नितरां समासि।
तथा लतापल्लविनी सगर्वे शोणाधरायाः सदृशी तवापि॥

सलक्षणसदृक्षाभा यथा–

इन्दुसलक्षणवदनं सुधासदृक्षश्च मुखरसस्तस्याः।
ज्योत्स्नाभाः स्मितमधुरा नर्मालापास्तु कस्य सदृशास्ते॥

सपक्षो यथा–

दलद्द्राक्षानिर्यद्रसभरसपक्षा भणितयः।

उपमितोपमे यथा–

राक्षसोपमिता वाग्भिः खला दीनांस्तुदन्त्यलम्।
साधवस्तोषयन्त्येनांस्ताभिरेव सुरोपमाः।।

उदाहरणान्तरं यथा–

उभौ यदि व्योम्नि पृथक् प्रवाहौ आकाशगङ्गापयसः पतेताम्।
तदोपमीयेत तमालनीलमामुक्तमुक्तालतमस्य वक्षः।।५९।।

---

**कल्पदेशीयदेश्यादिः प्रख्यप्रतिनिधी अपि।**
**सवर्णतुलितौ शब्दौ ये च तुल्यार्थवाचिनः॥६०॥**

---

## हृदयङ्गमा

कल्पदेशीयदेश्येति।–[ईषदसमाप्तौ कल्पब्देश्यदेशीयरः'' (५।३।६७ पा०) इति सूत्रेण] जाताः तद्धितप्रत्ययाश्च सादृश्यार्थकत्वेन उपमावाचकेषु अन्तर्भवन्ति, ईषदसमाप्तेरपि सादृश्ये पर्य्यवसानात्; [तदुक्तं कैयटेन,–''गुड़ इव ईषदसमाप्ता द्राक्षा गुड़कल्पाः, यद्यप्यत्रोपमानग्रहणं नोपात्तं, तथाऽपि सामर्थ्यादुपमानोपमेयभावः'' इति। कल्पदेशीयदेश्यादिः इत्यादिपदेन सदृशार्थकप्रत्ययमात्रस्य ग्रहणम्; तेन च ''स्थूलादिभ्यः प्रकारवचने कन्'' (५।४।३ पा०) इति विहितस्य कन्प्रत्ययस्य सादृश्यबोधकत्व, प्रकारशब्दस्य सादृश्यार्थकत्वात्, तथा ''चञ्चद्वृहतोरुपसङ्ख्यानम्'' (वा०) इति वार्त्तिकविहितः कन्प्रत्ययश्च सादृश्यार्थकः। ''इवे प्रतिकृतौ'' (५।३।९६ पा०) इति कन् च सादृश्यार्थ एव, तथा ''उपमानादाचारे'' (३।१।१० पा०) ''अधिकरणाच्च'' (वा०) इत्येताभ्यां विहतस्य क्यच्प्रत्ययस्य ''कर्त्तुः क्यङ् सलोपश्च'' (३।१।११ पा०) इत्यनेन विहितक्यङ्प्रत्ययस्य च सादृश्यबोधकत्वम्; तथा ''उपमाने कर्म्मणि च'' (३।४।४५ पा०) इति विहितस्य णमुल्प्रत्ययस्य च उपमावाचकत्वं सिद्धम्; तेन च ''पौरं सुतीयति जनं समरान्तरेऽसावन्तःपुरीयति विचित्रचरित्रचञ्चुः। नारीयते समरसीम्नि कृपाणपाणेरालोक्य यस्य लसितानि सपत्नसेना॥'' इत्यादौ नवीनैरुदाहृते उपमात्वं समञ्जसम्। एवं

णमुल्प्रत्ययेऽप्युदाहृतं,–"स पुनः पार्थसञ्चारं सञ्चरत्यवनीपतिः" इति। यत्तु केचिदाहुः,–"वत्यादयः इवार्थे विहिताः क्यङादयस्त्वाचारे इति वैषम्यम् इति, तदपि अकिञ्चित्करं, न हि क्यङादयः आचारमात्रार्थाः किन्तु सदृशाचारार्थाः इति तदपि परास्तं, सदृशाचारस्य क्यङाद्यर्थकत्वकल्पने प्रमाणाभावात्। अत्र न्यायपञ्चाननादीनां समाधानं,–"क्यङादीनामुपमानपरता-नियमव्युत्पत्त्या तेषां श्रवणमात्रेणौपम्यस्य तद्वाचकस्येवादेर्वा आक्षेपलभ्यत्वात्" इति]। अन्यूनार्थवादिनः अहीनार्थवाचकाः॥६०॥

## प्रभा

**कल्पेति।** कल्पदेशीयदेश्या यथा–

पूर्णेन्दुकल्पवदना मृणालीदेश्यदोर्लता।
चक्रदेशीयजघना सा स्वप्नेपि न दृश्यते॥

प्रख्यो यथा–

द्विपक्षगरुडप्रख्यैर्द्वारैः सौधैश्च शोभितम्।
गुप्तमभ्रचयप्रख्यैर्गोपुरैर्मन्दरोपमैः॥

प्रतिनिधिर्यथा–

भयोत्सृष्टविभूषाणां तेन केरलयोषिताम्।
अलकेषु चमूरेणुश्चूर्णप्रतिनिधिः कृतः॥

सवर्णो यथा–

ग्रथितमौलिरसौ वनमालया तरुपलाशसवर्णतनुच्छदः।

तुरगवल्गनचञ्चलकुण्डलो विरुरुचे रुरुचेष्टितभूमिषु।।

तुलितो यथा–

मुखं श्लेषमागारं तदपि च शशाङ्केन तुलितम्।

अन्यूनार्थवादिनः अहीनः अनूनः इत्यादयः। यथा–

सुधान्यूनानि गङ्गाया जलानि श्रयतां जनाः।।६०।।



**समासश्च बहुव्रीहिः शशाङ्कवदनादिषु।**
**स्पर्धते जयति द्वेष्टि द्रुह्यति प्रतिगर्जति॥६१॥**

## हृदयङ्गमा

समास इति।–तथा समासश्च बहुव्रीहिः इति बहुव्रीहिः समासः उपमावाचकः, स च उपमानपूर्वः एव, उपमागर्भत्वाभावे सादृश्यप्रतीतेरभावात्। तत्रोदाहरणमाह, शशाङ्कवदनादिष्विति। –शशाङ्कस्य सदृशं वदनं यस्याः सा, [पूर्वार्द्धेत्यादिना सदृशपदलोपः। उपमानपूर्वस्य बहुव्रीहिसमासत्वञ्चोक्तं महाभाष्ये,–"सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च। सप्तमीपूर्वस्य उपमानपूर्वस्य च बहुव्रीहिर्वक्तव्यः, उत्तरपदस्य च लोपो वक्तव्यः ; कण्ठे स्थः कालोऽस्य कण्ठेकालः, उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः" इति। अत एव मृगनयना इत्यादौ मृगनयनमिव नयनं यस्या इति बहुव्रीहिरुत्तरपदलोपश्च इति प्रकाशकृताऽपि उक्तम्। समासश्चेति चकारेण "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" (२।१।५६ पा०) इत्यनेन विहितः कर्मधारयश्चेति वक्तव्यम्; यथा, पुरुषव्याघ्र इत्यादि]। स्पर्द्धते इत्याद्यसूयतीत्यन्ताः शब्दाः लक्षकाः न तु वाचका इत्यवधेयम्॥६१॥

## प्रभा

**समासेति।** समासश्च बहुव्रीहिः कर्मधारयोपि। तत्र बहुव्रीहिर्यथा–

कमलकरा रम्भोरू कुवलयनयना मृगाङ्कवदना सा।
कथमिव चम्पकगात्री मृणालबाहुः प्रिया तपति॥

कर्मधारयो यथा–

शोणाधरांशुसंभिन्नास्तन्वि ते वदनाम्बुजे।
केसरा इव काशन्ते कान्तदन्तालिकान्तयः।।

स्पर्धते यथा–

स्पर्धते रुद्धमद्धैर्यो वररामामुखानिलैः।
चन्दनप्रणयोद्गन्धिर्मन्दो मलयमारुतः।।

जयतिर्यथा–

स काञ्चने यत्र मुनेरनुज्ञया नवाम्बुदश्यामवपुर्न्यविक्षत।
जिगाय जम्बूजनितश्रियः श्रियं सुमेरुश्रृङ्गस्य तदा तदासनम्।

द्वेष्टिर्द्रुह्यतिश्च यथा–

राधामुखं द्वेष्टि सुधाकरस्तत् पापेन लोके दधते कलङ्कम्।
द्रुह्यन्ति तल्लोचनमम्बुजानि ततो निमीलन्ति निशासु तानि।।

प्रतिगर्जतिर्यथा–

न जातु शक्तिरिन्दोस्ते मुखेन प्रतिगर्जितुम्।
कलङ्किनो जडस्यास्ति निर्दोषेणाजडेन च।।६१।।

---

**आक्रोशत्यवजानाति कदर्थयति निन्दति।**
**विड़म्बयति संरुन्ध्दे हसतीष्येत्यसूयति।।६२।।**

## हृदयङ्गमा

आक्रोशतीति।–आक्रोशति तिरस्करोति, अवजानाति निन्दति, आक्रोशतीत्यादि निन्दतीत्यन्ताः तिरस्कारार्थाः, तिरस्कारस्य सादृश्यार्थकत्वाभावेऽपि तव मुखं चन्द्रं तिरस्करोति इत्यादौ लक्षणया सादृश्यार्थः प्रतीयते। एवं विड़म्बयतीत्यादयोऽपि सादृश्यार्था इति बोध्यम्।।६२।।

## प्रभा

**आक्रोशतीति।** आक्रोशत्यवजानाति कदर्थयति निन्दति यथा–

आक्रोशत्यवजानाति कदर्थयति निन्दति।
अम्बुजं त्वन्मुखं बाले अहो जडसमागमः।।

विडम्बयतिर्यथा–

स एवमुक्त्वा मघवन्तमुन्मुखः करिष्यमाणः सशरः शरासनम्।
अतिष्ठादालीढविशेषशोभिना वपुःप्रकर्षेण विडम्बितेश्वरः

संधत्ते यथा–

चन्दनः शीततां धत्ते सौरभ्यं कमलं शशी।
लांवण्यं त्वन्मुखं बाले संधत्ते तत् त्रयं कथम्।।

हसतिर्यथा–

श्रिया हसद्भिः कमलानि सस्मितैरलंकृताम्बुप्रतिमागतैर्मुखैः।
कृतानुकूल्या सुरराजयोषितां प्रसादसाफल्यमवाप लक्ष्मीः॥

ईर्ष्यत्यसूयती यथा–

ईर्ष्यति कपिचेष्टायै चपलमतिर्यो यदियदुश्चरितम्।
नित्यमसूयति वानरवदनाय नमः खलाय शतशस्ते॥६२॥

---

**तस्य मुष्णाति सौभाग्यं तस्य कान्तिं विलुम्पति।**
**तेन सार्धं विगृह्णाति तुलां तेनाधिरोहति॥६३॥**

## हृदयङ्गमा

तस्येति।—तस्य मुष्णातीत्यादिनिषेधतीत्यन्ताः व्यञ्जकाः। तस्य सौभाग्यं मुष्णाति चोरयति, ("मुष्णाति" इत्यत्र "पुष्णाति" इति पाठान्तरम्)। तेन तुलामिति तेन चन्द्रादिना उपमानेन, तुलां मानयन्त्रम् अधिरोहति मुखाद्युपमेयसमीकरणार्थम् आश्रयति इत्यर्थः। (केचित्तु तुलां सादृश्यम् इत्यर्थं कल्पयन्ति, तदसत्; तुलाशब्दस्य सादृश्यार्थकत्वे अधिरोहतीति पदं व्यर्थमेव स्यात्)॥६३॥

## प्रभा

**तस्येति।** मुष्णात्यादीनां तस्य मुष्णाति सौभाग्यमित्यादीनि वाक्यान्येव मूल उदाहृतानि। अतो नात्रोदाहरणापेक्षा। मुष्णात्यादीनां सादृश्यादयोर्था वाक्यमर्यादया यदा अभिप्रेतास्तदैव तेषां सादृश्यमर्थो नान्यथा। अत एव धनं मुष्णाति तस्कर इत्यादौ न सादृश्यार्थता। तुलां तेनाधिरोहति। तुलां मानयन्त्रम् स्वसमीकरणायाधिरोहति। नात्रोपमार्थः। तथा सति तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्। इत्यतुलोपमाभ्यामिति पर्युदासात् षष्ठी स्यात्। अधिरोहतीति पदस्वारस्यं च लोपमियात्॥६३॥

---

**तत्पदव्यां पदं धत्ते तस्य कक्षां विगाहते।**
**तमन्वेत्यनुबध्नाति तच्छीलं तन्निषेधति।।६४।।**

---

## हृदयङ्गमा

तत्पदव्यामिति।–तत्पदव्यां तस्य उपमानस्य पथि, पद्धतौ इत्यर्थः, पदं स्थानं, धत्ते प्राप्नोति, सादृश्यं लभते इत्यर्थः। तस्य उपमानस्य, कक्षां साम्यं, विगाहते लभते। सर्वत्र तच्छब्द उपमानपरः इति बोध्यम्। (एतदनन्तरं पुस्तकान्तरेषु "बन्धुश्चौरः सुहृद्वादी कल्पः प्रख्यः समः प्रभः। देशीयदेश्यहृद्याभसोदराद्या इवार्थकाः।।" इत्येवं पाठो दृश्यते, तन्न समीचीनं, कल्पदेशीयादीनां प्रख्यादीनाञ्च सादृश्यार्थकत्वस्य प्रागेवाभिहितत्वात्, अतः पुनस्तदुपादानं निरर्थकमेव प्रतिभाति। बन्धुप्रभृतीनामपि प्रागुक्तार्थत्वेन कथञ्चित् सङ्ग्रहसम्भवादस्माभिर्न तदाद्रियते इत्यवधेयम्)। तमन्वेति तम् उपमानमनुगच्छति, अनुबन्धाति तमनुवर्त्तते इत्यर्थः। तच्छीलमिति, तस्य शीलं स्वभावो यत्र उपमेये तत् तच्छीलम् उपमानसमानधर्म्मीत्यर्थः। तन्निषेधति तत् उपमानं स्वस्मादुत्कर्षयितुं वारयति इत्यर्थः।।६४।।

## प्रभा

**तत्पदव्यामिति।** कक्षां सादृश्यम्। तच्छीलमनुबन्धाति इत्येकम्। तच्छीलमिति षष्ठीतत्पुरुषो न तु तस्येव शीलं यस्येति बहुव्रीहिः। तथात्वे समासश्च बहुब्रीहिरित्यनेनैव सिद्धे पुनरुपादानं व्यर्थं स्यात्। तन्निषेधति अपकृष्टत्वेन निन्दति। अथवा उत्कर्षान्निवारयति।।६४।।

---

**तस्य चानुकरोतीति शब्दाः सादृश्यसूचिनः।**
**उपमायामिमे प्रोक्ताः कवीनां बुद्धिसौख्यदाः॥६५॥**

## रत्नश्री

इवश्च वच्च यथा च ते शब्दाश्चेति विग्रहः। समाननिभसन्निभाः पूर्ववच्चार्थः। शब्दा इति वक्ष्यमाणमपेक्ष्य पुंस्त्वमिति॥ तुल्यादिष्वप्यनन्तरो[क्तेषु तथैव] वाच्यमिति। सदृशादिकमपि पूर्ववत् सुगममिति ॥ सलक्षणादीनामपि सैव रीतिः॥ आदिशब्देन बहुजादिपरिग्रहः।

अयं कुणालो बहुसागरः प्रियः [?]

इत्यादि च लक्ष्यमालक्ष्यमिति॥ सवर्णेत्यादि। ये चान्यूनं सममर्थं वदन्ति सधर्मसाधारणसच्छायादयोऽनुक्ताः तेऽपि शब्दाः सादृश्यसूचिन इत्यवेक्षणीयम्। शशाङ्क इव वदनं यस्याः सा तथा। आदि शब्देनोत्पलाक्ष्यादिपरिग्रहः। तेषु प्रयोगेषु समासश्च बहुव्रीहिरन्यपदार्थः। सादृश्यसूचक इत्यपेक्षमिति॥ स्पर्द्धत इत्यादि सुगममिति। एते सर्वे शब्दा यथोक्ताः सादृश्यम् उपमानोपमेययोः साम्यं सूचयन्ति व्यञ्जयन्तीति सादृश्यसूचिनः प्रतिपत्तव्या इति उपमाप्रपञ्चः॥

॥ उपमाचक्रम् ॥

रूपकं निरूपयन्नाह–

## हृदयङ्गमा

तस्येति।–उपमायां सादृश्यसूचकाः इमे शब्दाः कवीनां

बुद्धिसौख्यदाः मनः सौख्यविधायिनः, प्रोक्ताः निर्दिष्टाः, औपम्यद्योतनाय प्रयुज्यन्ते इत्यर्थः।।६५।।

## प्रभा

**तस्येति।** सादृश्यसूचका अभिधालक्षणाव्यञ्जनामर्यादया सादृश्यबोधकाः। तत्र इवादयो वाचकाः। तत्रापि यथेवादिशब्दप्रयोगे साधर्म्यं वाच्यम्। तत्रैव तेषां शक्तेः। तुल्यसदृशादिपदानां प्रयोगे साधर्म्यमार्थम्। तेषां सादृश्यवति शक्तेरिति बोध्यम्। स्पर्धते इत्यादयो लक्षकाः। तेषां सादृश्ये शक्त्यभावात्। तस्य मुष्णाति सौभाग्यम् इत्यादीनि वाक्यानि तु व्यञ्जकानि। आदित्सति श्रियं तस्य मैत्रीं तस्यानुरुध्यति इति क्वचिद् दृश्यते। उपमायामिमे प्रोक्ताः कवीनां बुद्धिसौख्यदाः। इति मुद्रितपुस्तकेषु अर्धमधिकमस्ति। परं प्राचीनग्रन्थेषु अनुपलम्भात् तथा प्राचीनटीकासु चानुल्लेखात् तत्प्रक्षिप्तमिति भाति। न च कोपि विशेषार्थस्तस्मात् प्रतीतो भवति।।६५।।

## विवृति

अथ कैः पुनःशब्दैः उपमा सूच्यत इत्याह–

इववत् वा यथा इत्येवमादयः शब्दाः सादृश्यसूचकाः।।

उपमाद्योतकान् उपन्यस्यति–इवेति। वत् इति इवशब्दपर्यायः ; अव्ययं वतिप्रत्ययश्च द्वयमपि गृह्यते; 'व्योम पश्चिमकलास्थितेन्दु वत्', 'खद्योतो भाति भानुवत्' इति च दर्शनात्। तुलां तेनाधिरोहति इति सहार्थे तृतीया।।

अतः परं यैः शब्दैः उपमा सूच्यते तान् सर्वान् सादृश्यपर्यायान् कथयति–इवेति। कल्पदेशीयदेश्यादि–'ईषदसमाप्तौ कल्पब्देश्य-देशीयरः' इतिविहितप्रत्यायान्ताः ये शब्दाः। समासश्च बहुव्रीहिरिति 'सप्तम्युपमान–'इत्यादिना निष्पन्नो गृह्यते। स्पर्धते जयति इत्यादीनि कियापदानि सादृश्यसूचकानि।।५७–६५।।

इत्युपमाचक्रम्।।

अथ रूपकचक्रम्।।

---

**उपमैव तिरोभूतभेदा रूपकमुच्यते।
यथा बाहुलता पाणिपद्मं चरणपल्लवम्॥६६॥**

## रत्नश्री

उपमैव यथोक्तलक्षणा रूपकमिष्यते तज्ज्ञैः। न कश्चित् तर्हि विशेषः तयोर्नाममात्रं भिद्यत इत्याह–तिरोभूतभेदेति। तिरोभूतोऽप्रकटो भेदो नानात्वम् उपमानोपमेययोरभेदारोपणात् यस्यां तथाभूता सती रूपकं नाम अलङ्कारः कल्प्यत इति भेदोद्भवाभिभवप्रभावितं नानात्वम् अनयोर्व्यञ्जनेन शब्दाभेदमात्रं रूपयति। उपमा[नोपमेययो]रभेदमारोपयति इति रूपकम्। यथेत्युदाहरति–बाहुर्लतातुल्यो लतारूपेण निरूप्यते इत्यभेदारोपः। तिरोहितो भेदः। नतूद्भेदः। बाहुर्लते एवेति [49a]। पाणिरेव पद्मं चरण एव पल्लवमित्यभेदाध्यासः। पूर्ववदिति॥

## हृदयङ्गमा

सम्प्रति रूपकं निरूप्यते, उपमेति। –तिरोभूतः अप्रकटितः, भेदप्रतीतौ सत्यामपि सादृश्यातिशयमहिम्ना अपह्नतप्रायः इत्यर्थः, भेदः उपमानोपमेययोर्भेदग्रहो यत्र तादृशी, उपमा सादृश्यमेव, आहार्य्यतादात्मारोपरूपा इति यावत्, रूपकम् उच्यते, कविभिः इति शेषः। (तथा च सत्यामपि सादृश्यप्रत्ययजन्यभेदप्रतीतौ यत्र सादृश्यातिशयनिबन्धनवैचित्र्यात्मकः उपमानेन उपमेयस्याभेदः गौणसारोपलक्षणाभ्यां प्रतीयते तत् रूपकमिति लक्षणम्। तथा हि उपमायां चन्द्र इव मुखं रमणीयम् इत्यादौ चन्द्रप्रतियोगिकान्योऽन्याभावसमानाधिकरणं यच्चन्द्रवृत्ति

रमणीयत्वं तदाश्रयो मुखम् इति बोधात् तद्भिन्नत्वे सति तद्गतभूयोधर्म्मवत्त्वस्य सादृश्यलक्षणत्वाच्च तत्र भेदप्रतीतिः सर्वसिद्धैव। इह रूपकेऽपि मुखं चन्द्र इत्यादौ भिन्नयोरुपमानोपमेययोरन्वयानुपपत्तेः प्रथमं लक्षणया चन्द्रसदृशं मुखम् इति बोधः, भेदप्रतीत्यनन्तरञ्च व्यञ्जनया चन्द्राभिन्नमिति बोधः, मुखत्वमुपमेयताऽवच्छेदकं तदधिकरणे मुखे चन्द्रतादात्मामुक्तरीत्या प्रतीयते। इत्यञ्चाभेदप्रतीतिराहार्य्या, आहार्य्यत्वञ्च बाधकालिकेच्छाप्रयोज्यत्वम्; अनाहार्यत्वे चाभेदप्रतीतिः नैव सम्भवति; मुखं, न चन्द्र इत्येतादृशबाधबुद्धिप्रतिबन्धकत्वात्; तदुक्तं चण्डीदासेन,– "अलङ्कारश्चात्राहार्य्यस्तादात्मारोप एव इत्यवसेयम्" इति। सादृश्यञ्चात्र गौणमारोपलक्षणालभ्यमेव, उपमानस्योपमेयवृत्तौ गौणलक्षणाया हेतुत्वं शारीरिकमीमांसाभाष्यव्याख्याने वाचस्पतिमिश्रैरप्युक्तं, यथा,–"अपि च परशब्दः परत्र लक्ष्यमाणगुणयोगेन वर्त्तते" इति; तस्मात् "यदोपमानशब्दानां गौणवृत्तिव्यपाश्रयात्। उपमेये भवेदवृत्तिस्तदा तद्रूपकं विदुः॥" इतिकण्ठाभरणोक्तदिशा लक्षणाजन्यसादृश्यप्रतीत्यनन्तरं जायमाना ताद्रूप्यप्रतीतिरेव रूपकमिति प्राचामाशयः। न च लक्षणाजन्येऽपि तत्सदृशबोधे कथं ताद्रूप्यप्रत्यय इति वाच्यम्; व्यञ्जनयैव तत्सम्भवात्; उक्तञ्च प्रकाशकारेण,–"भेदेऽपि ताद्रूप्यप्रतीतिः सर्वथैवाभेदागमश्च प्रयोजनम्" इति। तथा काव्यप्रदीपेऽपि,–"शब्देन लाक्षणिके अर्थे प्रतिपादिते तत्र मुख्याभेदो व्यञ्जनया प्रतिपाद्यते। न च व्यञ्जने बाधः प्रतिबन्धकः इति काव्यविदां पन्थाः" इति। केचित्तु मुखं चन्द्रः इत्यादौ मुखं, न चन्द्र इत्याद्ययोग्यतानिर्णयसत्त्वेऽभेदान्वयः न जायते, किन्तु

चन्द्रपदस्य चन्द्रसादृश्यविशिष्टलक्षणया चन्द्रसादृश्यविशिष्टभिन्नं मुखमित्येव बोध इत्याहुः। एवञ्चेदुपमारूपकयोरभेदापत्तिः सादृश्यप्रत्ययस्योभयत्राप्यविशिष्टत्वात्। अत्राहुः, सादृश्यप्रतीते- रुभयत्राविशेषेऽपि लक्षणायाः फलीभूततादूप्यज्ञानमादाय रूपकस्योपमातो भेदः। उपमायान्तु ताद्रूप्यप्रतीतिर्नास्तीति नोक्तदोषः सम्भवतीति दिक्। एतेन चन्द्रसदृशं मुखं चन्द्र इत्यादौ शब्दप्रतिपाद्यसादृश्यप्रतीत्यनन्तराभेदग्रहे नायमलङ्कारः, सादृश्यस्य लक्षणाजन्यत्वाभावात्; तेनातिशयोक्तावपि नातिव्याप्तिः, तस्या गौणसाध्यवसानलक्षणामूलकत्वात्; तथा सम्भावनारूपायाम् उत्प्रेक्षायामपि नास्य प्रवेशः सम्भवति, सम्भावनायाः आहार्य्यत्वाभावात्। अपह्नुतौ तु,–"नेदं नभोमण्डलमम्बुराशिः" इत्यादौ उपमेयस्य निषेधपूर्वकमभेदप्रतीतिः, इह तु तन्नास्तीति भेदः। तथा निदर्शनादावपि भेदः प्रोक्तदिशैवानुसन्धेयः। उपमैव इत्येवकारेण उपमाने उपमेयतादात्मारोपस्यैव रूपकत्वं बोध्यं, तेन "आयुर्घृतम्" इत्यादौ कार्य्यकारणभावसम्बन्धेनाभेदारोपे तु नायमलङ्कारः इति स्वमतं सूचितम्। रत्नाकरस्तु,–"सादृश्यप्रयुक्तः सम्बन्धान्तरप्रयुक्तो वा यावान् भिन्नयोः सामानाधिकरण्यनिर्देशः स सर्वोऽपि रूपकम्" इत्याह। "अभेदारोप एव रूपकम्" इति च काव्यप्रदीपः। "तद्रूपकमभेदो यः उपमानोपमेययोः" इति च काव्यप्रकाशकारः। चित्रमीमांसाकृतस्तु,–"विम्बाविशिष्टे निर्दिष्टे विषये यद्यनिह्नुते। उपरञ्जकतामेति विषयी रूपकं तदा।।" इत्याहुः)। यथा ब्राहुलतेत्यादि।–बाहुरेव लता बाहुलता, पाणिरेव पद्मं पाणिपद्मं, चरण एव पल्लवः चरणपल्लवः। [अत्र रूपककर्मधारयः। व्यासे यथा,–बाहुर्लतेत्यादि। अत्र बाहौ

लतात्वारोपः बाहुर्लता इवेत्याद्युपमापेक्षया समधिकं वैचित्राम् आवहति इति बोध्यम्। अत्र केचिदाहुः ;–मुखचन्द्रं पश्यामीत्यादौ मुखं चन्द्र इव इत्युपमितसमासस्य तथा मुखमेव चन्द्र इति रूपकसमासस्यापि सम्भवात् उभयोः सन्देहसङ्कर इति। तन्न रुचिरं, साधकबाधकाभावस्थले एव सन्देहसङ्करस्याङ्गीकारात्; तथा हि यत्र तु साधर्म्यम् उपमेये मुख्यतया, उपमाने तु उपचरितत्वेन स्थितं तत्र उपमायाः प्राधान्यं, यत्र च उपमाने मुख्यतया उपमेये च उपचारेण स्थितं तत्र रूपकस्य प्राधान्यं, यथा,–मुखचन्द्रं चुम्बतीत्यादौ उपमा एव, तथा मुखचन्द्रः प्रकाशते इत्यादौ रूपकमेव, न तु उभयोः सङ्करः। उक्तञ्च प्रकाशकृता,–"एकस्य च ग्रहे न्यायदोषाभावादनिश्चयः" इति। विश्वनाथेनाप्युक्तं,–"साधकबाधकयोर्द्वयो रेकतरस्य सद्भावे न पुनः सन्देहः। यथा मुखचन्द्रं चुम्बति इत्यत्र चुम्बनं मुखस्यानुकूलमित्युपमायाः साधकं, चन्द्रस्य तु प्रतिकूलमिति रूपकस्य बाधकम्। मुखचन्द्रः प्रकाशते इत्यत्र प्रकाशाख्यो धर्म्मः रूपकस्य साधकः मुखे चोपचरितत्वेन सम्भवति इति नोपमाबाधकः इति। एवं सुन्दरं वदनाम्बुजम् इत्यादौ साधारणधर्म्मप्रयोगे,–"उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" (२।१।५६ पा०) इति वचनादुपमासमासो न सम्भवतीत्युपमाया बाधकः, एवञ्चात्र मयूरव्यंसकादित्वात् रूपकसमास एव"। सुन्दरमिति रूपकस्य साधकत्वात् वदनमेवाम्बुजमिति रूपकसमासः। एतेन मुखचन्द्र इत्यादौ उपमास्थले मुखं चन्द्र इव इत्युपमितिसमासः, मुखमेव चन्द्र इत्यादौ रूपके कर्म्मधारय इति समासद्वयाश्रयणम् इति बोध्यम्]।।६६।।

## प्रभा

अथ रूपकं लक्षयति–**उपमैवेति**। तिरोभूतभेदा तिरोहितः निगूहितः विद्यमानोपि सादृश्यातिशयप्रदर्शनाय कविना निह्नुतो भेदः प्रस्तुताप्रस्तुतयोर्वैधर्म्यं यत्र तादृशी। उपमैव साधर्म्यमेव। रूपकम् रूपयति उपमानोपमेययोरेकतां नयति इति रूपकम् तन्नामालंकारः। तथा च परस्परविरुद्धधर्मवत्त्वेन उपस्थित्या प्रकाशितभिन्नस्वरूपयोरपि उपमानोपमेययोर्विशेषसाम्यप्रदर्शनाय भेदनिगूहनेन अभेदप्रतिपत्ती रूपकालंकारः। मुखं चन्द्र इत्यादौ मुखत्वचन्द्रत्वरूपपरस्परविरुद्धधर्मवत्त्वेनोपस्थितयोर्मुखचन्द्रयोर्भेद-निगूहनेन अभेदप्रतिपत्तिः। इयं चाभेदप्रतिपत्तिराहार्यरूपा। आहार्यत्वं च बाधकालिकेच्छाजन्यज्ञानत्वम्। अत्र बाधशब्देन बाधकज्ञानं विवक्षितम्। तथा च मुखं चन्द्र इत्यादौ बाधो मुखं चन्द्रो न इति ज्ञानम्। तत्काल एव या इच्छा मुखे चन्द्रज्ञानं मे जायताम् इत्यादिका तज्जन्यं यज्ज्ञानं मुखं चन्द्र इति तद् आहार्यम्। तथा च आहार्यत्वं नाम सत्यपि बाधे प्रमातुरिच्छाजन्यप्रयोज्यत्वम् इति निष्कर्षः। निगीर्याध्यवसानरूपायामतिशयोक्तौ उपमेयस्य नोपमेयगत-धर्मत्वेनोपस्थितिरिति न तत्रातिव्याप्तिः। अपह्नुतौ उपमेयगोपनेन भेदस्यापह्नवः। अत्र तथा न इति ततो भेदः। मुखपद्मम् इत्यादिसमासस्थले तु विशेषणस्य प्राधान्येनोपमानगतत्वे रूपकम्। यथा विकसितं मुखपद्ममिति। अत्र विकासस्य पद्मधर्मत्वेन तस्य प्राधान्येनोपमाने गतत्वेन मुखमेव पद्ममिति रूपकम्। तस्योपमेयगतत्वे उपमा। यथा सहास्यं मुखपद्मम्। अत्र हासस्य मुखधर्मत्वेन तद्विशेषणं मुखमिति उपमेयसंबद्धम्। अतोत्र मुखं पद्ममिव इति उपमा। उपमानोपमेययोर्विशेषणस्य उभयत्र समान

एव संबन्धः। इति रूपकोपमयोः संकर इति बोध्यम्। रूपकस्य लक्षणानि प्राचीनपण्डितैरव्याप्त्यतिव्याप्तिदोषपरिहारपुरः सरं विविधानि प्रदर्शितानि। परं तेषु जगन्नाथस्य लक्षणं (२२४-५ पत्रयोः) प्रायः सर्वसंग्राहकमिति तत् सप्रपञ्चं संगृह्णीमः। स च उपमेयतावच्छेदकपुरस्कारेणोपमेये शब्दानिश्चीयमानमुपमानतादात्म्यं रूपकम् इति लक्षणं विधाय उपमेयतावच्छेदकपुरस्कारेणेतिविशेषणादपह्नुतिभ्रान्तिमदतिशयोक्तिनिदर्शनानिरासः। अपह्नुतौ स्वेच्छया निषिध्यमानत्वाद् भ्रान्तिमति च तज्जनकदोषेणैव प्रतिबाध्यमानत्वाद् अतिशयोक्तिनिदर्शनयोश्च साध्यवसानलक्षणामूलत्वादुपमेयतावच्छेदकस्य नास्ति पुरस्कारः। शब्दादितिविशेषणान् मुखमयं चन्द्र इति प्रात्यक्षिकाहार्यनिश्चयगोचरचन्द्रतादात्म्यावच्छेदः। निश्चीयमानमितिविशेषणात् संभावनात्मनो नूनं मुखं चन्द्र इत्याद्युत्प्रेक्षाया व्यावृत्तिः। उपमानोपमेयविशेषणाभ्यां सादृश्यलाभात् सुखं मनोरमा रामा इत्यादिशुद्धारोपतादात्म्यनिरासः। सादृश्यमूलकमेव च तादात्म्यं रूपकमामनन्ति इति व्याचख्यौ। मुखं चन्द्र इत्यत्र प्रथमं लक्षणया चन्द्रपदात् चन्द्रसादृश्योपस्थितिः। ततश्चन्द्रसदृशमुखमिति अन्वयबोधः। पश्चाल्लक्षणाफलावगमायोद्भूतया व्यञ्जनया चन्द्रो मुखमित्यभिन्नतया चन्द्रमुखयोः प्रतीतिः। इदमेव लक्षणायाः फलम्। सा चाभेदप्रतीतिः प्राधान्येन वैचित्र्यमीदृशस्थले प्राप्नोति। तेन सादृश्यप्रतीतिजन्यमुपमावैचित्र्यं तत्कुक्षिनिलीनमिव भवति। अतोत्र नोपमा। प्रधानचमत्कृतेरेव अलंकारप्रयोजकत्वात्। तद्वैचित्र्योपस्थितस्यैवालंकारत्वम्। नान्तर्विलीनभूतवैचित्र्योपस्थितानामिति पूर्वोक्तमत्रानुसंधेयम्। उपमैव इति एवकारेण संबन्धान्तरनिरासः। सादृश्यसंबन्धमूलकलक्षणायामेव रूपकं न जन्यजनकभावादिसंबन्धमूलकलक्षणायामिति

भावः। तेनायुर्घृतम् इत्यादौ न रूपकम्। अत्र प्रेमचन्द्राः–नवीनतरास्तु रूपकस्य सादृश्यप्रतीतिपूर्वकत्वमेव। तच्च सादृश्यं प्रत्यक्षादिप्रमाणान्तरगम्यं न तु गौणसारोपलक्षणया शब्दप्रमाणगम्यम्। तत्र सादृश्यस्य शब्दवेद्यत्वादुपमैव। अत एवाग्नेये–

उपमानस्य तत्त्वं यदुपमेये तु रूप्यते।
गुणानां समतां दृष्ट्वा रूपकं नाम तद्विदुः।। (३४४.२२)

इत्यत्र दृष्ट्वेत्युक्तम्। तस्मात् सादृश्यस्य प्रमाणान्तरवेद्यत्वे एव रूपकम्। लक्षणास्थले तु लक्षणाफलत्वेनाभ्युपगतापि अभेदबुद्धिरुदीच्यबोधतया शाब्दबोधविषयतां गतस्य सादृश्यस्य तत्काल एव प्रवृत्तमुपमाव्यपदेशं न व्याहन्तुमीष्टे। प्रवृत्तत्वात् तस्य। न हि निर्बाधं लब्धसत्ताकं वस्तु कालान्तरीयेण प्रतिद्वन्द्विनान्यथाकर्तुं शक्यते इति वदन्ति इत्याहुः। आस्तामेतत्। प्रकृतमनुसरामः। एवं रूपकस्य सामान्यलक्षणमभिधाय उदाहरति। **यथेति**। बाहुरेव लता। पाणिरेव पद्मम्। चरण एव पल्लव इति उपमानप्रधानो मयूरव्यंसकादित्वात् समासः। अत्र समासेपि प्रथमं गौणलक्षणया लतादिपदात् तत्सादृश्यप्रतीतिः। तदनन्तरं तदनुरोधेन समुन्मिषन्त्या व्यञ्जनया ताद्रूप्यप्रतीतिर्ज्ञेया। अत्र केचिद् बाहुर्लतेव इति उपमितं व्याघ्रादिभिः सामान्याप्रयोगे इति कर्मधारयं अङ्गीकुर्वन्ति। परं तन्न रुचिरम्। इवादिशब्दवत् कर्मधारयस्यापि साम्यवाचकत्वेन उपमानोपमेयोर्भेदप्रदर्शनेन उपमायाः संभवात्। अत एवं एवंविधस्थले साधकबाधकप्रमाणाभावे उपमारूपकयोः सांकर्यमिच्छन्ति। तन्निरूपितमेव प्रागस्माभिः। प्रकृतोदाहरणेपि सांधकबाधकप्रमाणाभावाद्रूपकोपमयोः सांकर्यमेव स्यात्।

शुद्धोदाहरणं तु-तव बाहुलता बाले कोमला भाति भूतले। इति ऊह्यम्। अत्र कोमलेति सामान्यधर्मप्रयोगात् सामान्याप्रयोगे एव उपमितिसमासस्य विहित्वाद् बाहुरेव लता इति समासः। अत्र कोमलेति विशेषणमुपमाया बाधकम्। एवमेव तव बाहुलता बाले पुष्पिता नखरश्रिया इति उदाहरणं ज्ञेयम्। अत्र पुष्पितत्वमुपमानलताया एव धर्म इति रूपकस्य साधकम्।।६६।।

## विवृति

रूपकलक्षणमाह–

तिरोभूतो भेद उपमानोपमेययोर्यस्यां सा तिरोभूतभेदा। यथा–बाहुलता बाहुर्लतेवेत्युपमा। 'उपमितं व्याघ्रादिभि-स्सामान्याप्रयोगे' इति समासः। इयमेव तिरोभूतभेदा सती रूपकं भवति। बाहुरेव लता बाहुलतेति रूपकम्। एवं सर्वत्र योज्यम्।।

रूपकं लक्षयति–उपमैवेति। तिरोभूतभेदा–उममेयस्य उपमानेन सादृश्यातिशयविवक्षया भेदद्योतकेवादिशब्दपरित्यागेन सामानाधिकरण्येन मुखचन्द्रः इति तदात्मत्वारोपणं रूपकम्। तद्दर्शयति–यथेति। बाहुः लतेव इति विगृह्य 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' इति समासः।।

अथ रूपकलक्षणमाह–उपमैवेति। अस्यार्थः–उपमानवाची शब्दः परित्यक्तस्वार्थः उपचारादुपमेयगतं विशेषणं ब्रुवाणः उपमानोपमेययोः अभेदरूपणात् रूपकशब्दवाच्यो भवतीति रूपकम्। साम्यप्रतीतौ उपमैव कथं रूपकम् इति चेत्, न केवलं साम्यप्रतीतिमान् रूपकालङ्कारः, किन्तु उपमानोपमेययोः भेदे या साम्यप्रतीतिः सा उपमा; अभेदे या साम्यप्रतीतिः सा रूपकम्।

उदाहरति–यथेति। बाहुलता इत्यत्र लतेव बाहुः इति उपमास्थितिः तिरोभूता। एवं पाणिपद्मं, चरणपल्लवम्, इत्यत्रापि। तत्र लक्षणमुक्तम्–'साकल्येनैकदेशेन किञ्चित्साधर्म्यतोऽपि वा। रूपकं त्रिविधं काव्ये कवयस्तत्प्रचक्षते।। हर्षकान्तिः स्मितज्योत्स्नो दन्तांशुः पक्ष्मलक्षणः। तस्या हि मुखचन्द्रोऽयमिति साकल्यरूपकम्। तेजसार्कः शशी कान्त्या भवान् बुद्ध्या बृहस्पतिः। ऋद्धया वैश्रवणश्चेति कथयन्त्येकदेशिकम्।। व्यूढं पुरुषसिंहस्य विलोचनयुगं जगत्। ददाह भूयः कालाग्निरिति साधर्म्यरूपकम्'।।६६।।

---

**अङ्गुल्यः पल्लवान्यासन् कुसुमानि नखार्चिषः।**
**बाहू लते वसन्तश्रीस्त्वं नः प्रत्यक्षचारिणी॥६७॥**

## रत्नश्री

हे वसन्तश्रीः कुसुमागमलक्ष्मीः! त्वं भवती नः अस्माकम् प्रत्यक्षेऽर्थसाक्षात्कारिणि ज्ञाने चरसि प्रतिभासि। न परोक्षवर्तिनी। प्रत्यक्षं यथा भवति तथा चरसीति क्रियाविशेषणोपपदाद्वा क्रियार्थाद्विधिः। कथयामि तावत् पल्लवानि किसलयसम्पदस्तानि ताम्रतादेस्तवाङ्गुल्य आसन् अभूवन् अदृश्यन्त इति यावत्। यानि चेमानि पल्लवसङ्गतानि कुसुमानि तानि तव नखार्चिषः कररुहरुचयः शौक्ल्यादिना, लते च द्वे विवक्षिते केचित् तव बाहु[भूते] मार्दवादेः। इति प्रत्यक्षाङ्गत्वात् त्वं नश्चाक्षुषी। यद्वा, वराङ्गि! प्र[त्यक्ष]चारिणी वसन्तश्रीस्त्वमेवास्माकम्, किमन्यया अप्रत्यक्षया। यास्तवाङ्गुल्यस्ता[:] पल्लवान्यासन्। नखार्चिषश्च कुसुमानि। बाहू ते लते। ततस्त्वं नश्चाक्षुषी प्रत्यक्षा वसन्तश्रीः। शेषं पूर्ववत्॥

किं नामेदं व्यवह्रियत इत्याह–

## हृदयङ्गमा

सामान्यलक्षणानन्तरं विभागः प्राप्तसङ्गतिकः इति रूपकस्य भेदं निरूपयिष्यन् प्रथमं व्यस्तरूपकस्य उदाहरणमाह, अङ्गुल्य इति।–त्वं नः अस्माकं, प्रत्यक्षचारिणी परिदृश्यमाना, वसन्तश्रीः ; तथा हि, ते अङ्गुल्यः पल्लवानि, नखार्चिषः कुसुमानि, बाहू लते। (अत्र लिङ्गभेदप्रदर्शनेन रूपके लिङ्गभेदो न दोषावह इति सूच्यते। कदाचित् वचनभेदोऽपि न दोषाय; यथा,–शास्त्राणि

चक्षुर्नवमित्यादि। अत्र शास्त्राणि इत्यनेन सर्वशास्त्रज्ञानस्य लाभात् ज्ञानस्य च एकजातीयत्वात् बहुवचनान्तमपि एकवचनान्तवत् भामते। अनीदृशस्थाने तु दोषाय; यथा,—मुखं पद्मानीत्यादि)।।६७।।

## प्रभा

पूर्वं समस्तरूपकोदाहरणं प्रदर्शितम्। इदानीमसमस्तं दर्शयति—**अङ्गुल्य इति।** त्वं न अस्माकम् प्रत्यक्षचारिणी प्रत्यक्षं चरितुं शीलमस्याः सा प्रत्यक्षचारिणी दर्शनविषयीभूतेत्यर्थः। वसन्तश्रीः वसन्तलक्ष्मीः। वसन्तश्रियः सादृश्यदर्शनाय तदुभयवृत्तिवस्तूनां बिम्बप्रतिबिम्बतया विषयविषयिभावं दर्शयति **अङ्गुल्य इति।** अङ्गुल्यः अङ्गुष्ठादयः करशाखाः। पल्लवानि किसलयानि। उपमायामिव रूपक उपमानोपमेययोर्भिन्नलिङ्गत्वे न दोषः। अतोत्र वाक्यत्रये भिन्नलिङ्गयोर्निर्देशः। वचनभेदोपि रूपके क्वचिन्न दोषाय। यथा शास्त्राणि चक्षुर्नवम् इत्यादि। अत्र शास्त्राणि इत्यनेन सकलशास्त्रप्रवीणत्वसूचनेन चमत्कारातिशयः। एवंविधस्थले न वचनभेदो दोषाय।।६७।।

## विवृति

'अङ्गुल्यः पल्लवान्यासन्' इत्यादि व्यस्तरूपकम्। समासस्याभावात्। पूर्वे बाहुलतेत्यादि समस्तरूपकम्। शेषमृजु।।

अङ्गुल्य इति। ते अङ्गुल्यः पल्लवानि, नखार्चिषः कुसुमानि, बाहू लते, त्वं वसन्तश्रीः।।

बाहुलतेत्यादीनि समस्तरूपकोदाहरणानि। व्यस्तरूपकोदाहरणमाह— अङ्गुल्य इति।।६७।।

**इत्येतदसमस्ताख्यं समस्तं पूवरूपकम्।**
**स्मितं मुखेन्दोर्ज्योत्स्नेति समस्तव्यस्तरूपकम्।।६८।।**

---

## रत्नश्री

इत्येतदीदृशम् अस[म]स्तमित्याख्या संज्ञा यस्येत्यसमस्ताख्यं व्यस्तं नाम रूपकं प्रतिपत्तव्यम्, उपमानोपमेयरोरकृतसमासत्वात्। यत्र समासः। तत् किमाख्यायते? पूर्वरूपकं बाहू लतेत्यादि। कृतसमासं प्रथममुदाहरणम्। समस्तं तादृशं वेदितव्यम्, समासयोगात्। मुखमिवेन्दुर्मुखेन्दुरिति समस्तम्। स्मितं लीलाहसितं ज्योत्स्ना चन्द्रिकेति व्यस्तम्। अतश्च समस्तं तद् व्यस्तं चेति समस्तव्यस्तं नामेदृशं रूपकमवगन्तव्यमिति।।

## हृदयङ्गमा

इतीति।–इति पूर्वोक्तम्, एतत् अङ्गुल्य इत्यादि, असमस्ताख्यम् असमस्तरूपकमित्यर्थः। (अत्र पल्लव-कुसुमलतावसन्तश्रीशब्दानां गुणवृत्त्याश्रयेण अङ्गुली-नखार्चि-र्बाहूवर्णनीयनायिकाभिः सह सामानाधिकरण्यात् सामान्येवादिशब्दाप्रयोगाच्च तिरोभूतेऽप्युपमानार्थे समासो न कृत इति असमस्तरूपकमित्याशयः)। पूर्वरूपकं बाहुलतेत्यादि पूर्वश्लोकप्रदर्शितरूपकं, समस्तं समासघटितशब्दगतत्वेन समस्तरूपकम्। 'बाहुलता' 'पाणिपद्मं' 'चरणपल्लवः' इत्यादौ च समासः कृतः इति समस्तरूपकमिति निष्कर्षः। समस्तव्यस्तरूपकमुदाहरति, स्मितमिति।–स्मितं मृदुहास्यं, मुखेन्दोः मुखमेव इन्दुः तस्य ज्योत्स्ना इति समस्तव्यस्तरूपकम् उभयमिश्ररूपकमित्यर्थः, तथा च स्मितं ज्योत्स्ना इत्यत्र समासो न

कृतः, मुखेन्दोरित्यत्र च समास इति मिश्ररूपतया समस्तव्यस्तरूपकमिति। (पूर्णश्लोकस्तु,–"स्मितं मुखेन्दोर्ज्योत्स्ना ते प्रभाऽम्बु कुचकुम्भयोः। दोर्लतापल्लवे पाणौ पुष्पं सखि! नखार्चिषः।।" इति)।।६८।।

## प्रभा

निर्दिष्टस्य द्विप्रकारस्य रूपकस्य संज्ञां निर्दिशति–**इत्येतदिति।** इत्येतद् अङ्गुल्यः पल्लवानीत्येतत्। असमस्ताख्यम् असमस्तसंज्ञाकम्। पूर्वरूपकम् बाहुलता पाणिपद्मं चरणपल्लव इत्यादिकम्। समस्तं समस्तसंज्ञकं रूपकम्। तत्रोपमानोपमेययोः समस्तत्वादिति भावः। समस्तव्यस्तरूपकं दर्शयति **स्मितमिति।** मुखेन्दोः मुखमेव इन्दुस्तस्य। स्मितं हास्यम् ज्योत्स्ना। अत्र मुखेन्दोरिति समस्तं स्मितं ज्योत्सनेति व्यस्तम्। इति समस्तव्यस्तरूपकम्।।६८।।

## विवृति

स्मितं ज्योत्स्नेति व्यस्तम्। मुखेन्दोरिति समासकरणात् समस्तमिति समस्तव्यस्तरूपकम्।।

इतीति। इत्येतद्वाक्यम् असमस्तरूपकम्। पूर्वं समस्तरूपकम्। स्मितमिति–सुखेन्दोः इति रूपणस्य समस्तत्वात्, स्मितं ज्योत्स्ना इति अस्य व्यस्तत्वाच्च, समस्तव्यस्तरूपकम्। रूपकविशेषलक्षणानि स्पष्टानि।।६८।।

---

**ताम्राङ्गुलिदलश्रेणि नखदीधितिकेसरम्।**
**ध्रियते मूर्ध्नि भूपालैर्भवच्चरणपङ्कजम्॥६९॥**

## रत्नश्री

राजन्, भवतश्चरण एव पङ्कजं भूपालैः ध्रियते धार्यते मूर्ध्नि शिरसि। किम्भूतम्? ताम्राङ्गुलयो दलश्रेणिः पत्रपंक्तिर्यस्य। नखानां दीधितयः किरणाः केसराणि यत्र तादृशं ध्रियते इति प्रकृतम्॥

कतमदेतद्रूपकमित्याह–

## हृदयङ्गमा

सकलरूपकं निरूपयति, ताम्रेत्यादि।–ताम्राङ्गुलय एव दलश्रेणयः यस्य, तथा नखानां दीधितयः किरणा एव, केसरा यस्य तादृशं, भवच्चरण एव पङ्कजं तत्, भूपालैः मूर्द्धि ध्रियते॥६९॥

## प्रभा

सकलरूपकं दर्शयति–**ताम्राङ्गुलिरिति**। ताम्राङ्गुल्य एव दलश्रेणिः पत्रपङ्क्तिर्यत्र तत्। नखानां दीधितयः किरणानि एव केसराणि किञ्जल्कानि यस्मिन्। एतादृशं भवच्चरणपङ्कजं त्वत्पदकमलम्। भूपालैर्मूर्न्धि ध्रियते उह्यते॥६९॥

## विवृति

ताम्राङ्गुलय एव दलश्रेणी यत्र नखदीप्तय एव केसराणि यत्र तत्तथा॥६९॥

**अङ्गुल्यादौ दलादित्वं पादे चारोप्य पद्मताम्।**
**तद्योग्यस्थानविन्यासादेतत् सकलरूपकम्॥७०॥**

## रत्नश्री

एतदनन्तरोक्तमीदृशं सकलरूपकम् आख्यायते। सकलस्याङ्गिनः पादस्याङ्गस्य चाङ्गुल्यादीनां रूपणात्। अङ्गुलिरादिर्यस्या नखदीधितेस्तत्र दलमादिर्यस्य केसरस्य तस्य भावः तत्त्वं तदारोप्य इत्यङ्गरूप[49b]णमुक्तम्। पादे च पद्मतामारोप्य उपचर्येति अङ्गिरूपणं तस्येदृशस्य पद्मस्य योग्यमुचितम्। स्थीयते इति स्थानम् आधारो मूर्द्धा तत्र विन्यासात् निवेशनात्। सकलरूपकमेतदिति प्रकृतम्॥

## हृदयङ्गमा

अत्र अङ्गुल्यादो दलादित्वं दलश्रेणित्वं, तथा पादे चरणे, पद्मतां पङ्कजत्मव्, आरोप्य तस्य पङ्कजस्य, योग्ये स्थाने शिरसि इत्यर्थः, विन्यासात् धारणात्, एतत् सकलरूपकं सकलरूपकसंज्ञकमित्यर्थः, चरणे पङ्कजत्वमारोप्य तदनुकूलत्वेन चरणावयवेष्वपि पङ्कजावयवानामारोपेण सम्पूर्णरूपणादिति भावः। (अत्र मूर्द्धि धारणरूपस्य साधारणधर्म्मस्य उपमाने पङ्कज एव औचित्यात् रूपकसमासः, न तु उपमितसमासः, उपमेयस्य चरणस्य मूर्द्धि धारणायोग्यत्वात् इत्युक्तमेव प्राक्। तथा च यत्र अङ्गिनस्तदङ्गानाञ्च रूपणं शब्देन प्रतिपादितं भवेत् तत् सकलरूपकमित्यभिप्रायः। दर्पणकारस्तु इदं साङ्गरूपकमाह; यथा,–"अङ्गिनो यदि साङ्गस्य रूपणं साङ्गमेव तत्।"

यथा,–"रावणावग्रहक्लान्तमिति वागमृतेन सः। अभिवृष्य मरुच्छस्यं कृष्णमेघस्तिरोदधे।।" इति।।७०।।

## प्रभा

उदाहरणस्थसकलरूपकत्वं विशदयति–**अङ्गुल्यादौ इति।** अङ्गुल्यादौ आदिशब्देन नखग्रहणम्। दलादित्वम्। अत्रादिशब्देन केसरग्रहणम्। पादे च पद्मताम् आरोप्य तद्योग्यस्थानविन्यासात् तस्य पङ्कजस्य योग्यस्थानं मूर्धा तत्र विन्यासाद् ध्रियते इति प्रतिपादनात्। एतत् सकलरूपकम् संपूर्णरूपकम्। दलकेसररूपसर्वावयव-निरूपणात्। अयं भावः। चरणपङ्कजमित्यत्र उपमारूपकयोः संशयः। तत्र भूपालैर्मूर्न्धि ध्रियते इति वर्णनेन मूर्न्धि धारणस्य पङ्कजस्यैव युक्तत्वात् तदुपमानप्राधान्ये सुसंगतं भवति। अतो मूर्न्धि धारणं रूपकसाधकम्। उपमेये चरणे तस्यासंभवादुपमाया बाधकम्। अतोत्र रूपकमेव नोपमा न वा संदेहसंकरः। इदमेव साङ्गं सावयवमिति अर्वाचीना व्यवहरन्ति। उक्तं च जगन्नाथेन–

परस्परसापेक्षनिष्पत्तिकानां रूपकाणां संघातः सावयवम्। यथा–

सुविमलमौक्तिकतारे धवलांशुकचन्द्रिकाचमत्कारे।
वदनपरिपूर्णचन्द्रे सुन्दरि राकासि नात्र संदेहः।।
(२३१ पत्रे) इति।

विस्तरस्तु तत्रैव द्रष्टव्यः। अङ्गुल्यः पल्लवान्यासन् इति असमस्तरूपकोदाहरणमपि सकलरूपकस्य भवतीति ज्ञेयम्।।७०।।

## विवृति

अङ्गुल्यादौ दलादित्वमारोप्य, पद्मतां पादपद्मं (पद्मत्वेन पादं) रूपयित्वा तद्योग्यस्थानविन्यासात् ध्रियते मूर्ध्नि भूपालैरित्यनेन तस्य पद्मस्य योग्यं स्थानं मूर्धैव यतः पुष्पं शिरस्येवाधीयत इति सकलरूपकमिदमुच्यते। समस्तपङ्कजधर्माणामभिधानात्।।

अङ्गुल्यादाविति। तद्योग्यस्थाने मूर्न्धि विन्यासात्।।७०।।

**अकस्मादेव ते चण्डि! स्फुरिताधरपल्लवम्।**
**मुखं मुक्तारुचो धत्ते घर्माम्भः, कणमञ्जरीः॥७१॥**

## रत्नश्री

चण्डि कोपने! ते तव मुखं स्फुरिताधरपल्लवं स्फुरितः कोपकम्पनः अधरः ताम्रतादेः पल्लवो यस्येति। घर्माम्भःकणाः प्रणयकोपजन्मानः स्वेदबिन्दव एव मञ्जयः कुसुमस्तबकाः शौक्ल्यादिना। यदाह–मुक्तारुच इति। मुक्तानां रुचयो दीप्तयो यासां ता धत्ते। अकस्मादेव विना व्यलीकेन केनचित् तादृशेन, कोऽयमस्थानकोप इति॥

कतरदेतत् रूपकमित्याह–

## हृदयङ्गमा

अवयवरूपकं निरूपयति, अकस्मादित्यादि।–हे चण्डि! अतिकोपने! "चण्डस्त्वत्यन्तकोपनः" इत्यमरः। ते तव, मुखम् अकस्मादेव स्फुरितः कम्पितः, अधर एव पल्लवः यत्र तादृशं सत् मुक्तानां रुच इव रुचः कान्तयो यासां तादृशीः मुक्तारुचः मौक्तिकाकाराः, धर्माम्भसां कणा एव मञ्जर्य्यः ताः, धत्ते धारयति। ॥ ७१॥

## प्रभा

अवयवरूपकोदाहरणं दर्शयति–**अकस्मादिति।** हे चण्डि कोपने। अंकस्मात् सहसैव। स्फुरिताधरपल्लवं स्फुरितः कोपेन कम्पितः अधर एव पल्लवो यत्र तत् ते मुखम्। मुक्ताः

मौक्तिकास्तद्वद् रुग् यासां ता मुक्ताकारा इत्यर्थः। घर्माम्भः कणमञ्जरीर्धर्माम्भसां स्वेदोदकानां ये कणाः बिन्दवस्त एव मञ्जर्यः। अथवा घर्माम्भ एव कणमञ्जरीः कणवल्लरीस्तुषारस्तबका इत्यर्थः। धत्ते दधते।।७१।।

## विवृति

स्फुरितः अधरपल्लवो यत्र तन्मुखं घर्माम्भसः कणाः त एव मञ्जर्यः तावत्ते (ता धत्ते) किंभूताः मुक्तारुचः मुक्तानां मौक्तिकानामिव रुक् दीप्तिर्यासां ता मुक्तारुचः।।७१।।

---

**मञ्जरीकृत्य घर्माम्बु पल्लवीकृत्य चाधरम्।**
**नान्यथाकृतमत्रास्यमतोऽवयवरूपकम्॥७२॥**

---

## रत्नश्री

घर्माम्बु मञ्जरीत्वेन परिकल्प्य। अधरं चैकदेशं पल्लवीकृत्य पल्लवोऽयमिति रूपयित्वा। आस्यं मुखम् अङ्गि अन्यथा नःकृतम्। पद्मादित्वेन न रूपितमत्र प्रयोगे। अतः कारणादवयवरूपकमी-दृशमवयवस्याधरादे रूपणादिति।

## हृदयङ्गमा

अत्र धर्माम्बः मञ्जरीकृत्य मञ्जरीत्वेन आरोप्य, तथा अधरं पल्लवीकृत्य पल्लवत्वेन आरोप्य, आस्यं मुखं, न अन्यथाकृतं पद्मत्वेन न अरोपितम्, अतः अवयवमात्ररूपणात्, अवयवरूपकम्। (मुखे पद्मत्वारोपस्तु अर्थवशात् उन्नेयः। दर्पणकारस्तु इदमेकदेशविवर्त्तिरूपकमाह; यथा,–"यत्र कस्यचिदार्थत्वमेकदेश-विवर्त्ति तत्" इति)॥ ७२॥

## प्रभा

उदाहरणं विशदयति–**मञ्जरीति**। अत्र प्रस्तुतोदाहरणे घर्माम्भः उपरिदर्शितप्रथमसमासे घर्माम्भःशब्देन घर्माम्भःकणा ग्राह्याः। द्वितीयसमासस्वीकारे मञ्जरीशब्देन कर्णमञ्जरीर्ग्राह्याः। अयमेव समासो युक्त इति भाति। अन्यथा कमले मञ्जरीवर्णनस्यानुपयुक्ततया मञ्जरीपदं व्यर्थमिव भवति। मञ्जरीकृत्य मञ्जरीत्वेनारोप्य। अधरं अधरोष्ठम्। पल्लवीकृत्य

पल्लवत्वेन आरोप्य। आस्यं मुखम् अवयवि। नान्यथाकृतम् पद्माभिन्नत्वेन न वर्णितम् अतोवयवमात्ररूपणाद अवयवरूपकमिदम्। मुखे पद्मत्वारोपस्तु अर्थवशादवसेयः। अर्वाचीनास्तु एतदेव एकदेशविवर्ति रूपकं मन्यन्ते। परं तत्र स्वल्पो विशेषः। अवयवरूपके अवयविन आरोपविषयत्वं नास्तीति निश्चयः। एकदेशविवर्तिरूपके तु अवयवानां अवयविनो वा यस्य कस्यापि रूपकैकदेशस्य रूपणाभावोभिप्रेतोस्ति। अतो जगन्नाथोदाहृतैकदेशिविवर्तिरूपकोदाहरणे–

रूपजला चलनयना नाभ्यावंर्ता कचावलिभुजङ्गा।
मज्जन्ति यत्र सन्तः सेयं तरुणीतरङ्गिणी विषमा।।

इत्यत्र नावयवरूपकम्। तत्र अवयविन्यास्तरुण्यास्तरङ्गिणीत्वेनारोपात्। एक देशविवर्ति तु भवति। रूपकस्यावयवभूतस्य चलनयनस्य विषयभूतस्य विषयिणा मीनेनानारोपणात्। अत एव प्रकाशकारेण–श्रौता आर्थाश्च ते यस्मिन्नेकदेशविवर्ति तत्। (७२३ पत्रे) इति सामान्यं लक्षणं विहितम्।।७२।।

## विवृति

मञ्जीकृत्य घर्माम्बु मञ्जरीत्वेन घर्माम्बु रूपिक(त)म्। अधरश्च पल्लवत्वेन रूपितः। नान्यथाकृतमत्रास्यं मुखं तु न रूपितमित्येवमवयवरूपकं नाम।।

मञ्जरीति। मुखावयवानि रूपितानि; मुखम् अविकृतम्; अतः अवयवरूपकमिदम्।।७२।।

---

**वल्गितभ्रु गलद्घर्मजलमालोहितेक्षणम्।**
**विवृणोति मदावस्थामिदं वदनपङ्कजम्॥७३॥**

---

## रत्नश्री

वल्गिते आरेचिते भ्रुवौ। गलच्च घर्मजलम्। आलोहिते च ईक्षणे यत्र तदिदं वदनं पङ्कजं मदस्य मधुपानजनितस्य हर्षविशेषस्य अवस्थाम् ईदृशविकारलीलाजनितलक्षणां दशां विवृणोति प्रकाशयतीति॥

किमेतद् रूपकमुच्यते इत्याह–

## हृदयङ्गमा

अवयविरूपकं निरूपयति, वल्गितेत्यादिद्वाभ्याम्। –वल्गिते भ्रुवौ–यत्र तत् चलितभ्रूयुगलं, गलन्ति धर्मजलानि यस्मात् तादृशं, तथा आलोहिते आरक्ते, ईक्षणे यस्य तथाभूतम्, इदं वदनमेव पङ्कजं मदावस्थां मद्यपानजनितां दशाम्, आनन्दजनितहर्षोत्फुल्लतामित्यर्थः, विवृणोति। (अत्र वल्गितभ्रु इत्यत्र दलं, धर्म्मजलमित्यत्र च मकरन्दम्, आलोहितेक्षणमित्यत्र पारागपिञ्जरम् इति च शब्देनानुपात्तमपि रूपणं वदनस्य पङ्कजत्वारोपेणार्थं प्रतीयते, ततश्च पङ्कजस्य मदावस्थाप्रकटनं दिवाप्रकाशरूपं बोध्यं, विकशितस्यैव वल्गितदलादिसम्भवात्, ततश्च वल्गितदलादिविशिष्टं पङ्कजं प्रोक्तविशेषणविशिष्टं वदनमेव इति बोधः। एवञ्च रूपकस्य वैचित्राजनकत्वेन सम्भवत्येव रूपकोदाहरणम्। केचित्तु वदनमम्बुजमिति व्यस्तमेव पाठं समीचीनं मन्यन्ते, अन्यथा वदनपङ्कजमित्यत्र

वल्गितादीनामुपात्तानां वदनमात्रगतत्वेन उपमायाः साधकत्वेन रूपकस्य च विनिगमकत्वाभावात् वदनमेव पङ्कजमिति समास एव भवितुं नार्हति इति सुधीभिर्विचार्य्यम्)।।७३।।

## प्रभा

अवयविरूपकमाह–**वल्गितभ्रु इति।** वल्गिते चलिते भ्रुवौ यस्मिंस्तत् चलितभ्रुकुटि। गलन्ति घर्मजलानि स्वेदजलानि यस्मात् तत्। आलोहिते आरक्ते ईक्षणे नयने यस्मिंस्तत्। इदं पुरो दृश्यमानम्। वदनपङ्कजं वदनमेव पङ्कजं कमलम्। मदावस्थां मद्यसेवनजनितमदावस्थाम् विवृणोति प्रकाशयति। यथाश्रुतपाठेत्र उपमैव साधीयसी न रूपकम्। उपमानपङ्कजमात्रान्वयिधर्माणा-मनुपादानाद् उपमेयवदनस्यैवान्वयिनो भ्रूत्वादीनां चोपादानात्। सत्यम् वदनमम्बुजमिति पाठं स्वीकृत्य व्यस्तरूपकेण समाधेयम्।।७३।।

## विवृति

वल्गिते भ्रुवौ यत्र तद्वल्गितभ्रु। गलत् क्षरत् घर्मजलं स्वेदवारि यस्मात्तद्गलद्धर्मजलम्। आलोहिते ईक्षणे यत्र तदालोहितेक्षणं विवृणोति मदावस्थां ईदृशं सत् इदं वदनं(?)वदनंपङ्कजम्।।७३।।

---

**अविकृत्य मुखाङ्गानि मुखमेवारविन्दताम्।**
**आसीद् गमितमत्रेदमतोऽवयविरूपकम्॥७४॥**

## रत्नश्री

मुखस्य अङ्गिनः अङ्गानि अवयवान् नेत्रादीन् अविकृत्य रूपयित्वा मुखमेवाङ्गि अरविन्दतां गमितमासीत् पद्मत्वेन रूपितम्। अत्र लक्ष्ये। अतोऽवयविरूपकमिदमीदृशम्, अवयविन एव रूपितत्वादिति॥

## हृदयङ्गमा

अत्र लक्षणं सङ्गमयति, अविकृत्येति।–मुखाङ्गानि मुखस्य अङ्गानि अवयवानि, भ्रूप्रभृतीनि इत्यर्थः, अविकृत्य पङ्कजाङ्गत्वेन अनारोप्य, मुखमेव अरविन्दतां गमितं पङ्कजत्वेन आरोपितम्, आसीत्, अतः अवयविमात्रस्य रूपणात्, अवयवस्य भ्रुवः दलत्वेन धर्म्मजलस्य मकरन्दत्वेन लोहितेक्षणस्य च परागपिञ्जरभ्रमरत्वेन शब्दोपात्तरूपणाभावाच्चेत्यर्थः, इदं प्रोक्तोदाहरणरूपम्, अवयविरूपकमिति ज्ञेयम् इति। (दर्पणकारस्तु इदं निरङ्गरूपकमाह)॥७४॥

## प्रभा

उदाहणं विवृणोति–**अविकृत्येति।** अस्मिन्नुदाहरणे मुखाङ्गानि भ्रुकुटिघर्मजलनयनादीनि। अविकृत्य पङ्कजाङ्गभूतैरविकृत्य उपमानाङ्गभूतलत्वमकरन्दत्वपरागपिञ्जरभ्रमरत्वादिभिरनारोप्य। अवयवि मुखमेव अरविन्दतां गमितमासीत् पङ्कजत्वेन आरोपितमासीत्। अतोवयविनो मुखस्यैव पङ्कजत्वेनारोपणाद्

अवयविरूपकमिदम्। नव्यानां तु इदमेकदेशविवर्ति स्याद् इति भाति। नवीनमते इदं निरङ्गरूपकमिति केषांचिदुक्तिस्तु न क्षोदक्षमा। यतोत्रावयविनो मुखस्य अवयवा निर्दिष्टा न तु आरोपावयविनो कमलस्य अवयवा निर्दिष्टाः। निरङ्गविषये तु अवयविन आरोप्या अपि न निर्दिश्यन्ते। अत एव एकदेशवर्तिनो निरङ्गस्य भेद इति सुधीभिर्विचारणीयम्।।७४।।

## विवृति

अविकृत्य (अ)रूपयित्वा मुखस्याङ्गानि मुखावयवान् भ्रूनेत्रादीन्, मुखमेवारविन्दतां नीतमाननमेवारविन्दत्वेन रूपितम्। अतोऽवयविरूपकम्। मुखस्यावयविनोऽरविन्दत्वेन रूपणात्।।७४।।

---

**मदपाटलगण्डेन रक्तनेत्रोत्पलेन ते।**
**मुखेन मुग्धे! सोऽप्येष जनो रागमयः कृतः॥७५॥**

## रत्नश्री

मदेन पाटलौ गण्डौ कपोलौ रक्ते च नेत्रे उत्पले यत्र तेन ते मुखेन सोऽप्येष जनो यः त्वत्प्रसादैकवृत्तिः परमुखेनात्मानमाह कश्चित्कामुको रागमयो रागविकारः किमपि रक्तः कृतः न केवलं स्वयं रक्तमित्यपि शब्दः। मुग्ध इत्यामन्त्रणम् इति॥

## हृदयङ्गमा

प्रागभिहितस्य अवयवरूपकस्य भेदविशेषान् दर्शयति, मदेत्यादिद्वाभ्याम्।—स एष जनोऽपि ते तव, मदेन पाटलौ गण्डौ यस्य तेन, तथा रक्ते नेत्रे एव उत्पले यस्य तादृशेन, मुखेन मुग्धः तथा रागमयः अनुरागपूर्णः लौहित्यमयश्च, कृतः॥७५॥

## प्रभा

अवयवरूपकभेदान् दिदर्शयिषुरेकाङ्गरूपकभेदमाह—**मदेति।** मदेन वारुणीमदेन पाटलौ श्वेतरक्तौ गण्डौ कपोलौ यत्र तेन। तथा रक्तं ताम्रं नेत्रमेव उत्पलं यत्र तेन। एतादृशेन ते मुखेन। एषः मल्लक्षणो मुग्धस्त्वत्सौन्दर्यमोहितो जनो रागमयोनुरागपरिपूर्णो लोहितमयश्च कृतः॥७५॥

## विवृति

मदेन पाटलौ गण्डौ यत्र (त)न्मदपाटलगण्डं तेन॥७५॥

**एकाङ्गरूपकं चैतदेवं द्विप्रभृतीन्यपि।**
**अङ्गानि रूपयन्त्यत्र योगायोगौ भिदाकरौ।।७६।।**

## रत्नश्री

एतच्च एकाङ्गरूपकम् एकस्यैव नेत्रलक्ष्मस्याङ्गस्य रूपणात्। एवम् अनेन प्रकारेण द्विप्रभृतीन्यपि न केवलमेकम्। द्वे त्रीणि चत्वारि इति यथासम्भवमङ्गानि अवयवान् रूपयन्ति यथायोगमर्थान्तररूपेण आरोप्य प्रयुञ्जते कवयः। अत्राङ्गरूपणे योगः सङ्गतिः अङ्गानामयोगश्च विरोधः। भिदाकरौ रूपकभेदव्यवस्थापकौ। योगायोग[50a]भेदेनैतद्रूपकं व्यवह्रियते। न तु पूर्ववत् संख्याभेदेनेत्यर्थः।।

## हृदयङ्गमा

लक्षणमवतारयति, एकाङ्गेति।–एतत् प्रागुक्तरक्त-नेत्रोत्पलेनेत्यत्र रूपणात् मदपाटलगण्डेन इत्यत्र च तदभावात् एकाङ्गरूपकाख्यमिदम्। एवं यत्र अङ्गद्वयादिभिः रूपणं तत्र द्वाङ्गत्राङ्गरूपकादि भवेत्, तदेवाह, एवमिति।–एवं प्रागुक्तप्रकारेण, अत्र अवयवरूपके, द्विप्रभृतीनि अङ्गानि अपि रूपयन्ति अप्रस्तुतत्वेन आरोपयन्ति, न तु अङ्गिनम् इति भावः, तेन च द्वाङ्गरूपकादिसंज्ञकानि भवन्तीति निष्कर्षः।–

उक्तेष्वपि भेदेषु विशेषावाह, योगायोगाविति।–योगः द्वाङ्गादिरूपके आरोप्यपदार्थस्य युक्तः सम्बन्धः, अयोगः

युक्तसम्बन्धाभावः तौ, भिदाकरौ भेदकौ, अङ्गारोपेषु परस्परयोगायोगाभ्यां युक्तरूपकमयुक्तरूपकञ्चेति भेदद्वयमित्यर्थः।।७६।।

## प्रभा

नाम निर्दिशति—**एकाङ्गेति।** अत्र उदाहरणे रक्तनेत्रोत्पलेन इति एकाङ्गमात्ररूपणान् मदपाटलगण्डेन इत्यस्य अरूपणाच्च एकाङ्गरूपकमिदम्। एवम् अनयैव दिशा द्विप्रभृतीनि अपि द्वित्रिचतुःप्रभृतीनि अङ्गानि न तु अङ्गी, रूपयन्ति उपमानेन आरोपविषयीकुर्वन्ति कवय इति शेषः। ततश्च द्व्यङ्गरूपकं त्र्यङ्गरूपकं चतुरङ्गरूपकामित्यादीनि बहूनि रूपकाणि भवन्ति। अङ्गस्य अङ्गयोरङ्गानां वा योग आरोपणयोगः अयोगस्तदभावस्तौ। भिदाकरौ भेदनिष्पादकौ। प्राचीनटीकाकारास्तु योगायौगौ भिदाकरौ एतावन्तं वाक्यांशमन्यथा विवृण्वन्ति। तथा हि तेषु एकाङ्गद्व्यङ्गादिरूपकेषु योगायोगौ भिदाकरौ भेदकौ। तानि रूपकाणि योगायोगाभ्यां पुनर्द्विप्रकाराणि भवन्ति इत्यर्थः। योग आरोप्यमाणानां परस्परं युज्यमानः संबन्धः। अयोगस्तदभावः। एतच्च उदाहरणे स्पष्टीभविष्यति।।७६।।

## विवृति

**रक्तनेत्रोत्पलेनेति।** नेत्रे एवोत्पलत्वे(न रूपिते) नान्यदङ्ग(म्। अत) एकाङ्गरूपकमेतत्। एवमनेन प्रकारेण द्विप्रभृतीन्यप्यङ्गानि रूपयन्ति। अत्र रूपकालङ्कारे योगायोगौ युक्तत्वायुक्तत्वे भिदाकारौ भेदकारिणौ।।

**एकेति।** नेत्रमेव उत्पलतया रूपितम्। अतः एकाङ्गरूपकम् एतत्। एवं द्विप्रमृतीन्यपि अङ्गानि रूपयन्ति। तत्रापि व्यङ्गरूपकम्, त्र्यङ्गरूपकम्, इति संज्ञा द्रष्टव्या। 'योगायोगौ भिदाकरौ' इति रूपकान्तरस्य लक्षणमुच्यते। अत्र रूपकप्रपञ्चे योगायोगौ कौचिद्विशेषौ भिदाकरौ। योगो नाम अविरुद्धेन द्रव्यान्तरेण योगः। विद्येते इत्यध्याहार्यम्।।७६।।

---

**स्मितपुष्पोज्ज्वलं लोलनेत्रभृङ्गमिदं मुखम्।**
**इति पुष्पद्विरेफाणां सङ्गत्या युक्तरूपकम्।।७७।।**

---

## रत्नश्री

स्मितं पुष्पं शौक्ल्यादिना तेन उज्ज्वलं सुभगं लोले नेत्रे भृङ्गौ चञ्चलत्वादिना यस्य मुखस्येतीदृशम् [युक्त]रूपकमाख्यायते। ननु कथम्? पुष्पाणां द्विरेफाणां च सङ्गत्या परस्परसम्बन्धादिति।।

## हृदयङ्गमा

अथ युक्तरूपकमुदाहरति, स्मितेति।–स्मितमेव पुष्पं स्मितपुष्पं, तेन उज्ज्वलं, लोले नेत्रे एव भृङ्गौ यत्र तादृशम्, इदं मुखम्। (अत्र मुखावयवयोः स्मितनेत्रयोः पुष्पभृङ्गत्वेन अभेदारोपात् द्वाङ्गरूपकम्; तत्र पुष्पे भ्रमरावस्थानञ्च युक्तमिति युक्तरूपकच्च)। तदेव समर्थयते, इतीति।–इति उक्तप्रकारेण, पुष्पद्विरेफाणां सङ्गत्या पुष्पे भ्रमरसम्बन्धस्य युक्ततया इत्यर्थः, युक्तरूपकमिदम्। ("न कस्य नन्दनं सुभ्रु! सुरभिश्वसितानिलम्।।" इति परार्द्धम्। तथा हि स्मितपुष्पोज्ज्वलं लोलनेत्रभृङ्गं सुरभिश्वसितानिलं ते मुखं न कस्य नन्दनम्? इति पूर्णश्लोकार्थः। पुष्पभृङ्गादीनां परस्परयुक्त्युपपत्तेः युक्तं नाम रूपकमिति भोजराजस्याशयः)।।७७।।

## प्रभा

तत्रादौ युक्तरूपकमुदाहरति–**स्मितेति**। स्मितम्–

ईषद्विकसितैर्गण्डैः कटाक्षैः सौष्ठवान्वितैः।

अलक्षितद्विजं धीरमुत्तमानां स्मितं भवेत्।।

इत्युक्तलक्षणं तदेव पुष्पं तेन उज्ज्वलं कान्तिमत्। लोले चञ्चले नेत्रे एव भृङ्गौ यत्र तद् इदं मुखं शोभते इति शेषः। इति एवम् पुष्पद्विरेफाणां मुखावयवभूतयोः स्मितनेत्रयोरारोपविषयी-भूतानां तेषां संगत्या परस्परसंबन्धसुसंगत्या इदं युक्तरूपकम्। अत्र अवयवत्वं नाम आधेयत्वम्। तन्मुखनिरूपितं स्मिते वर्तते इति स्मितस्य मुखावयवत्वं बोध्यम्।।७७।।

## विवृति

योगायोगावुदाहरणैः स्वयं स्पष्टयति–

स्मितमेव पुष्पं स्मितपुष्पं तेन उज्ज्वलं स्मितपुष्पोज्ज्वलं लोले च नेत्रे एव भृङ्गौ यत्र तल्लोलनेत्रभृङ्गं इदं मुखमिति पुष्पद्विरेफाणां सङ्गत्या युक्तरूपकं यत्र पुष्पं तत्र द्विरेफ इति पुष्पद्विरेफयोर्योगात् युक्तरूपकमेतत्।।७७।।

---

**इदमार्द्रस्मितज्योत्स्नं स्निग्धनेत्रोत्पलं मुखम्।**
**इति ज्योत्स्नोत्पलायोगादयुक्तं नाम रूपकम्॥७८॥**

---

## रत्नश्री

इदं मुखम् आर्द्रं स्निग्धं स्मितं ज्योत्स्ना, स्निग्धे नेत्रे उत्पले [च] यस्य इत्येवंविधमयुक्तं नाम रूपकम्। कुतः ज्योत्स्नया उत्पलस्य अयोगात् विरोधात्, ज्योत्स्नायामुत्पलस्य सङ्कोचादिति॥

## हृदयङ्गमा

अयुक्तरूपकमुदाहरति, इदमिति।–आर्द्रं सरसं, स्मितमेव ज्योत्स्ना यत्र तत्, तथा स्निग्धे स्नेहवर्षिणी, नेत्रे एव उत्पले पद्मे यत्र तादृशं, मुखम्। इत्यत्र, ज्योत्स्नोत्पलायोगात् ज्योत्स्नाया उत्पलस्य च आरोप्यमाणयोरेतयोः, अयोगात् एककालिकत्वसम्बन्धाभावात्, उभयोर्भिन्नकालिकत्वेन उत्पले ज्योत्स्नायोगाभावादित्यर्थः, अयुक्तं नाम रूपकम्। ("जगन्नेत्रेन्दुरस्माकं कथं तापाय कल्पते॥" इति परार्द्धम्)॥७८॥

## प्रभा

अयुक्तरूपकमुदाहरति–**इदमिति।** आर्द्रं प्रेमार्द्रं स्मितमेव ज्योत्स्ना चन्द्रिका यस्मिंस्तत्। स्निग्धे स्नेहपूर्णे नेत्रे एव उत्पले कमले यस्मिन्। ज्योत्स्नोत्पलायोगात् आरोपविषयभूतयोश्चन्द्रिकाकमलयोरयोगात् परस्परविरोधितया असंबन्धात्। इदम् अयुक्तरूपकम्॥७८॥

## विवृति

अयुक्तरूपकमाह–

आर्द्रं स्मितमेव ज्योत्स्ना चन्द्रिका यत्र तत्तथा स्निग्धे नेत्रोत्पले यत्र तत् स्निग्धनेत्रो पलं इति ज्योत्स्नोत्पलायोगादयुक्तं नाम रूपकं ज्योत्स्नोत्पलयो (र) योगस्सं (गात्स) म्बन्धाभावादयुक्तत्वम्। यथा पुष्पद्विरेफयोः सङ्गतिर्नैव (वं) ज्योत्स्नोत्पलयोर(तोऽ) युक्तमित्युच्यते।।७८।।

---

**रूपणादङ्गिनोऽङ्गानां रूपणारूपणाश्रयात्।**
**रूपकं विषमं नाम ललितं जायते यथा॥७९॥**

## रत्नश्री

अङ्गिनोऽवयविनः रूपणात् यथायोगम् अर्थान्तरीकरणात्। अङ्गानां रूपणमरूपणं च तयोराश्रयणम् [तस्माद्] [आ]श्रयात् अपेक्षणाद्रूपणादरूपणाच्चेत्यर्थः। ततो विषमं रूपकं ललितं चारुजायते। यथेत्युदाहरति॥

## हृदयङ्गमा

विषमरूपकमुदाहरति, रूपणादित्यादिद्वाभ्याम्।–अङ्गिनः रूपणात् तथा अङ्गानां तदवयवानां, रूपणारूपणाश्रयात् कस्यचिदङ्गस्य रूपणात् कस्यचित् वा अरूपणात्, ललितं सुन्दरं, वैचित्र्यजनकमित्यर्थः, विषमं नाम रूपकं जायते॥७९॥

## प्रभा

विषमरूपकं लक्षयति–**रूपणादिति**। अङ्गिनः प्रधानस्य रूपणात्। तथा अङ्गानां अप्रधानानाम् रूपणारूपणाश्रयात्। भावे घञ्। आश्रयणादित्यर्थः। तथा च कस्यचिदङ्गस्य रूपणं कस्यचिदरूपणं तस्मात्। ललितं वैचित्र्येण मनोहरम्। विषमं रूपणारूपणवैषम्याद् विषमसंज्ञकम् जायते। यथेति उदाहरणप्रस्तावाय॥७९॥

## विवृति

रूपणादङ्गिनोऽवयविनः, अङ्गानामवयवानां रूपणं च केषांचिदरूपणं च केषांचिद्रू(दिति रू)पणरूपणाश्रयं (यात्?) रूपकं विषमं नाम त(?)ललितं रम्यं जायते।।७९।।

---

**मदरक्तकपोलेन मन्मथस्त्वन्मुखेन्दुना।**
**नर्तितभ्रूलतेनालं मर्दितुं भुवनत्रयम्॥८०॥**

---

## रत्नश्री

भुवनत्रयं मर्दितुं जेतुम् अलम् समर्थो मन्मथः। केन? मदेन रक्तौ कपोलौ यस्य नर्तिते भ्रुवौ लते लोलतादिना येन तेन तव मुखेन इन्दुना करणेन च मुखस्याङ्गिनो रूपणं भ्रूलक्षणस्य च तदङ्गस्य रूपणमेव। कपोलरूपस्य त्वङ्गस्यारूपणमिति॥

## हृदयङ्गमा

यथा इति उदाहरति, मदरक्तेति। –मदेन रक्तौ कपोलौ यत्र तेन, तथा नर्त्तिते भ्रुवौ एव लते यत्र तादृशेन, त्वन्मुखमेव इन्दुस्तेन, मन्मथः भुवनत्रयं मर्दितुं जेतुम्, अलं समर्थः। (अत्र इन्दुना मुखावयवो रूपितः, भ्रुवौ च तदवयवौ लताऽवयविभ्यां, मदरक्तौ तु कपोलौ न केनापि रूपितौ इति वैषम्यात् विषमावयवं नाम रूपकम्)॥८०॥

## प्रभा

उदाहरति–**मदरक्तेति।** मदरक्तकपोलेन मदपाटलगण्डेन। नर्तितभ्रूलतेन नर्तिते भ्रुवौ एव लते यत्र तादृशेन। मुखमेव इन्दुस्तेन। भुवनत्रयं मर्दितुं जेतुम्। मन्मथः मदनः। अलं समर्थः। अत्र अङ्गिनि मुखे इन्दुत्वारोपस्तथा तदङ्गभूतयोर्भ्रुवोर्लतात्वारोपः कपोलयोस्तु न कस्यापि आरोपः इति वैषम्यम्॥८०॥

## विवृति

**मदरक्तकपोलेनेति।** कपोलौ न निरूपितौ(न रूपितौ) त्वन्मुखेन्दुनेति मुखमिन्दुत्वेन निरूपितम्। नर्तितभ्रूलतेनेति भ्रूर्लतात्वेन रूपितेति विषमरूपकम्।।

**रूपणादिति।** अङ्गिनो रूपणात् अङ्गानां रूपणारूपणाच्च विषमं नाम रूपकं भवति। मदेति–तत्र मुखम् अङ्गि चन्द्रतया रूपितम्; भ्रूः तावत् लतारूपेण रूपिता; कपोलो न रूपितः। अत एव विषमं रूपकम्।।८०।।

---

**हरिपादः शिरोलग्नजह्नुकन्याजलांशुकः।**
**जयत्यसुरनिःशङ्कसुरानन्दोत्सवध्वजः॥८१॥**

## रत्नश्री

हरेर्विष्णोः विक्रममाणस्य पादो जयति विपक्षमभिभवति। शिरस्यग्रे भागेऽङ्गुलीदेशे लग्नमवस्थितं जह्नुकन्याजलम्। ब्रह्मणा किल तदानीम् अर्घीकृतं गाङ्गम् उदकम्। अंशुकं पताकारूपं यत्र स तथा। असुरेभ्यो हरिनिर्जितेभ्यो निःशंका निर्भयास्तदुपक्रमशङ्काविगमात्। ये सुराः, तेषामानन्दः प्रीतिरुत्सवो महस्तत्रोच्छ्रितो ध्वजः केतुरिति॥

किमिदं रूपकं व्यवह्रियत इत्याह–

## हृदयङ्गमा

सविशेषणरूपकं निर्दिशति, हरीत्यादिद्वाभ्याम्। –शिरसि अग्रभागे, लग्नं जह्नुकन्याया गङ्गायाः, जलमेव अंशुकं श्वेतवसनाञ्चलं यस्य सः, तथा असुरेभ्यः निःशङ्का ये सुरा देवाः बलिदमनात् इति भावः, तेषामानन्दोत्सवस्य ध्वजः केतुः, हरिपादः वामनचरणः, जयति॥८१॥

## प्रभा

सविशेषणरूपकमाह–**हरिपाद इति**। शिरोलग्नजह्नुकन्या-जलांशुकः शिरः चरणाग्रप्रदेशः ध्वजाग्रप्रदेशश्च तत्र लग्ना आसक्ता या जह्नुकन्या भागीरथी तस्या जलम् उदकमेव अंशुकं श्वेतपताका यस्य सः। असुरनिः शङ्कासुरानन्दोत्सवध्वजः असुरेभ्यः

निःशङ्का निर्भीका बलिविजयादित्यर्थः ये सुरास्तेषामानन्दोत्सवस्य ध्वजः केतुरिव। हरेः वामनस्य पादो जयति सर्वोत्कर्षेण वर्तते॥८१॥

## विवृति

हरिपादो जयति किंभूतः शिरोलग्नजह्नुकन्याजलमेवांशुकं वस्त्रं यस्य स तथा असुरेभ्यो बलिप्रभृतिभ्यः निःशङ्कास्ते च ते सुराश्च इन्द्रादयस्तेषामानन्दः स एवोत्सवः तस्य तत्र वा ध्वजः॥८१॥

---

**विशेषणसमग्रस्य रूपं केतोर्यदीदृशम्।**
**पादे तदर्पणादेतत् सविशेषणरूपकम्।।८२।।**

## रत्नश्री

विशेषणेन उपाधिना पताकोत्सवसम्भवरूपेण समग्रस्य सूक्तस्य केतोर्ध्वजस्य यदीदृशस्य अनन्तरोक्तप्रकारं रूपं स्वभावः तस्यार्पणादारोपात् पादे वैष्णवेऽयं ध्वज इति एतदीदृशं सविशेषणं नाम रूपकं व्यपदिश्यत इति।।

## हृदयङ्गमा

विशेषणसमग्रस्य सविशेषणस्य, केतोर्ध्वजस्य, यत् ईदृशम् उक्तरूपं, रूपं यथोक्तविशेषणविशिष्टो यो हरिपादः यश्च हरिहतासुरेभ्यो निःशङ्कानां सुराणामानन्दोतसवे ध्वजः तयोः सविशेषणयोरेव प्रतीयमानसादृश्ययोः परस्परमुपमानोपमेयभावः इति भावः, पादे चरणे, तस्य अर्पणात् आरोपात्, सविशेषणरूपकमिदम्। (अत्रेदं प्रतिभाति, हरिपादस्य केतुत्वारोपो जलस्य वसनाञ्जलारोपमन्तरेण न सम्भवति, अत एव तद्विशेषणस्यांशुक इत्यस्य रूपणात् विशेषणविशिष्टस्यैव ध्वजस्य हरिचरणे रूपणमिति सविशेषणरूपकमिति दिक्)।।८२।।

## प्रभा

उदाहृतालंकारं निर्देशपूर्वकं विशदयति—**विशेषणेति।** विशेषणेन शिरालग्नेतिविशेषणेन समग्रस्य युक्तस्य केतोरसुरनिःशङ्कसुरानन्दोत्सवध्वजस्य यद् ईदृशं रूपं विशेषणविशिष्टस्वरूपं

सपताकध्वजरूपमित्यर्थः। पादे तस्य सपताकध्वजस्य समर्पणाद् विशेषणविशिष्टस्य पदार्थस्यारोपात् सविशेषणरूपकमेतत्॥८२॥

## विवृति

एतञ्च सविशेषणमुच्यते–विशेषणसमग्रस्य केतो रूपं यदीदृशम्। पादे तस्यार्पणात्। ध्वजदण्डां(ण्डें)शुकं च भवति उत्सवे च तस्योच्छ्र्य इत्यत्रापि तदस्तीति॥

सविशेषणंरूपकमाह–**हरीति**। हरिपादः विशेषणविशिष्टः सुरानन्दोत्सवध्वज इव जयति। **विशेषणेति**–विशेषणससग्रस्य केतोः यत् ईदृग्रूपम्, पादे तस्य अर्पणेन सविशेषणरूपकम्। अत्र जाह्नवीजलस्य अंशुकत्वेन रूपणात् रूपकसमुपतेन विशेषणेन सहितध्वजस्वरूपं पादे अर्पितम्॥८२॥

**न मीलयति पद्मानि न नभोऽप्यवगाहते।**
**त्वन्मुखेन्दुर्ममासूनां हरणाय व्यवस्यति।।८३।।**

## रत्नश्री

तव मुखम् इन्दुः, पद्मानि न मीलयति न संकोचयति [50b] नभोऽपि नावगाहते। किं तर्हि करोति? मम असूनां प्राणानां हरणायैव व्यवस्यति प्रयतते। किमिदमिति।।

तद् व्याचष्टे–

## हृदयङ्गमा

विरुद्धरूपकं निरूपयति, नेत्यादिद्वाभ्याम्। –तव मुखमेव इन्दुः पद्मानि न मीलयति न सङ्कोचयति, अप्रकाशादिति भावः, नभश्च आकाशञ्च, न अवगाहते न उत्तिष्ठति, अवनतत्वात् इति भावः ; केवलं मम असूनां प्राणानां, हरणाय एव कल्पते प्रभवति। मानिनीं प्रत्युक्तिरियम्।।८३।।

## प्रभा

विरुद्धरूपकमाह–**न मीलयतीति।** त्वन्मुखेनदुस्तव वदनचन्द्रमाः। पद्मानि न मीलयति न संकोचयति। नभोपि न अवगाहते नाक्रमति। केवलं मम असूनां प्राणानाम् हरणाय कल्पते प्रभवति विप्रलम्भोद्दीपकत्वादिति भावः।।८३।।

## विवृति

न मीलयति न सङ्कोचयति पद्मानि। न नभोऽप्यवगाह्नते नापि नभोभध्यमध्यास्ते त्वन्मुखेन्दुस्त्वदाननचन्द्रः ममासूनां हरणाय व्यवस्यति।।८३।।

---

**अक्रिया चन्द्रकार्याणामन्यकार्यस्य च क्रिया।**
**अत्र सन्दर्श्यते यस्माद्विरुद्धं नाम रूपकम्॥८४॥**

## रत्नश्री

चन्द्रकार्याणां पद्मनिमीलनादीनाम् अक्रिया अकरणम्। अन्यस्य शस्त्रादेर्यत् कार्यं प्राणहरणं तस्य क्रिया अत्र प्रयोगे सन्दर्श्यते प्रतिपाद्यते यस्मात्, अतो विरुद्धं नामेदृशं रूपकमवगन्तव्यम् इति॥

## हृदयङ्गमा

अत्र चन्द्रस्य आरोप्यमाणस्य, कार्य्याणां पद्मनिमीलनादीनाम्, अक्रिया अननुष्ठानं, प्रत्युत अन्यस्य यमस्य, कार्य्यस्य प्राणहरणरूपस्य, क्रिया यस्मात् सन्दर्श्यते तस्मात् इदं विरुद्धं नाम रूपकम्। (उपमानाभिन्नतया रूपितस्य उपमेयमुखस्य उपमानपद्मकार्य्यकारित्वस्य एवौचित्यात् तदकरणं तदन्यकार्य्यकरणञ्च विरुद्धम् इति बोध्यम्)॥८४॥

## प्रभा

उदाहरणं विशदयति–**अक्रियेति** चन्द्रकार्याणां पद्मनिमीलननभोवगाहित्वादीनां चन्द्रव्यापाराणाम् अक्रिया अविधानम्। अन्यस्य चन्द्रभिन्नमृत्योः कार्यं प्राणहरणरूपं तस्य क्रिया अनुष्ठानम् अत्र अस्मिन्नुदाहरणे यस्मात् संदर्श्यते अतो विरूद्धं विरुद्धसंज्ञकं रूपकम्। रूपके उपमानाभिन्नतया रूपितस्योपमेयस्य तत्कार्यकरणमेवोचितम्। परमत्र तत् तेन न क्रियते प्रत्युत तद्विरुद्धशीलस्य कार्यकरणादिदं विरुद्धम्। विरोधश्चात्र अनौचित्यरूप इति बोध्यम्॥८४॥

## विवृति

एतद्विरुद्धं नाम रूपकम्। कुतः। अक्रिया चन्द्रकार्याणां पद्मसङ्के च(न)भोऽवगाहनाकरणात्। अन्यकार्यस्य च मरणस्य करणात्।।

**नि( ? )मीलयतीति।** विरुद्धरूपकमेतत्। अन्यकार्यस्य मृत्युकार्यस्य।।८४।।

**गाम्भीर्येण समुद्रोऽसि गौरवेणासि पर्वतः।**
**कामदत्वाञ्च लोकानामसि त्वं कल्पपादपः॥८५॥**

---

## रत्नश्री

गाम्भीर्येणानुत्तानचित्ततया समुद्रोऽसि। गौरवेण गुणलक्षणेन पर्वतोऽसि। लोकानां कामम्, इष्टं ददासीति कामदत्वाच्च कल्पपादपोऽसिं इति कश्चित् स्तूयत् इति॥

किमिदं रूपकमित्याह–

## हृदयङ्गमा

हेतुरूपकं निरूपयति, गाम्भीर्येणेत्यादि।– गाम्भीर्येण दुरवगाहाशयत्वेन, समुद्रः असि, गौरवेण सारवत्तया, पर्वतः असि, तथा लोकानां कामदत्वात् कल्पपादपः असि, (अत्र हेतौ तृतीया पञ्चमी च)॥८५॥

## प्रभा

हेतुरूपकमुदाहरति–**गाम्भीर्येणेति**। गाम्भीर्येण दुरवगाहाशयत्वेन समुद्रोसि। गौरवेण सारवत्तया पर्वतोसि। लोकानां कामदत्वाद् वाञ्छितप्रदत्वात् कल्पपादपः कल्पवृक्षस्त्वमसि। सर्वत्र हेतौ तृतीया॥८५॥

## विवृति

गाम्भीर्येण समुद्रोऽसीत्यादि हेतुरूपकम्। त(क)स्मात्॥
गाम्भीर्यप्रमुखैरत्र हेतुभिः सागरो गिरिः कल्पद्रुमश्च क्रियते॥८५॥

---

**गाम्भीर्यप्रमुखैरत्र हेतुभिः सागरो गिरिः।**
**कल्पद्रुमश्च क्रियते तदिदं हेतुरूपकम्॥८६॥**

---

## रत्नश्री

अत्र प्रयोगे गाम्भीर्यं प्रमुखमादि येषां गौरवादीनां तैः हेतुभिः कारणैः कश्चित् विवक्षितः पुरुषः सागरः क्रियते, गिरिश्च कल्पद्रुमश्च क्रियते रूप्यते यतः, तत् तस्मात् इदम् एवंविधं हेतुरूपकम् अवसेयम्। तदिदमनन्तरोक्तं हेतुरूपकमिति योज्यम्॥

## हृदयङ्गमा

अत्र गाम्भीर्य्यप्रमुखैः हेतुभिः उपमेये सागरः गिरिः तथा कल्पद्रुमः क्रियते आरोप्यते, तत् तस्मात, हेतुनिबन्धनारोपणात् इत्यर्थः, हेतुरूपकमिदम्। (अत्रैकस्यानेकधोल्लेखनात् उल्लेखालङ्कारोऽयम् इति नव्याः)॥८६॥

## प्रभा

उदाहरणं विवृणोति–**गाम्भीर्येति।** गाम्भीर्यप्रमुखैः गाम्भीर्यगौरवकामदत्वैः प्रस्तुतनृपः सागरः गिरिः कल्पद्रुमश्च क्रियते एतेषां आरोपविषयीक्रियते। गिरित्वादिभिरारोप्यते इति भावः। अत्र गाम्भीर्यादिसाधारणधर्माणां हेतुत्वेन विन्यसनाद् हेतुरूपकमिदम्। साहित्यदर्पणकारास्तु- एकस्यानेकधोल्लेखो यः स उल्लेख उच्यते। (१०.३७) इति उल्लेखलक्षणं विधाय अत्र एकस्य प्रस्तुतस्य नृपस्य गाम्भीर्यादिविषयभेदेनानेक-धोल्लेखादिममुल्लेखालंकारमाहुः। परं हेतुशून्यस्थले विविधारोपे

उल्लेखो हेतुपुरः सरे तु हेतुरूपकमिति उभयोर्भेदे सति यत् तैरुल्लेख एव सामान्यतया सर्वत्र स्वीकृतस्तच्चिन्त्यमिति भाति॥८६॥

## विवृति

गाम्भीर्यात् सागरो भवान्। गौरवात् पर्वतः। कामदत्वात् अभिलषितदानात् कल्पवृक्षः। (इति) समुद्रादिकरणे गाम्भीर्यादिकं हेतुत्वेनोपन्यस्तम्॥८६॥

---

**राजहंसोपभोगार्हं भ्रमरप्रार्थ्यसौरभम्।**
**सखि वक्त्राम्बुजमिदं तवेति श्लिष्टरूपकम्॥८७॥**

## रत्नश्री

सखि, तव वक्त्राम्बुजमिदं चारु [राज]हंसोपभोगार्हम्। पद्मं तावत् राजहंसैः पक्षिविशेषैः उपभोगं निषेवणम् अर्हति, तदुपभोग्यमिति यावत्। तव वक्त्राम्बुजं तु राजहंसैः नृपवरैः उपभोगमर्हतीति शब्दश्लेषः। उभयमपि भ्रमरैः प्रार्थ्यम् अभिलषणीयं सौरभं गन्धविशेषोऽस्येति भ्रमरप्रार्थ्यसौरभमित्यर्थश्लेषः। ईदृशं श्लिष्टरूपकमिष्टम्, श्लेषानुविद्धत्वात् इति॥

## हृदयङ्गमा

श्लिष्टरूपकं निरूपयति, राजेति।–हे सखि! तव इदं वक्त्रमेव अम्बुजं राजहंसः राजश्रेष्ठः हंसविशेषश्च, ("राजहंसस्तु कादम्बे कलहंसे नृपोत्तमे" इति मेदिनी), तस्य उपभोगार्ह सम्भोगयोग्यं, भ्रमरः कामुकः षट्पदश्च, ("भ्रमरः कामुके भृङ्गे" इति मेदिनी), तस्य प्रार्थ्यं स्पृहणीयं, सौरभं यस्य तादृशम्, इत्यत्र, श्लिष्टरूपकं साधारणधर्मस्य राजहंसोपभोगार्हत्वादिरूपस्य श्लेषमूलकत्वात् इति॥८७॥

## प्रभा

श्लिष्टरूपकं दर्शयति–**राजेति**। राजहंसोपभोगार्हम् राजहंसो नृपश्रेष्ठो हंसविशेषश्च तेन उपभोगार्हं संभोगोचितम्। भ्रमरप्रार्थ्यसौरभम् भ्रमरैः कामुकैर्भृङ्गैश्च प्रार्थ्यं स्पृहणीयं सौरभं यस्य। सखि दयिते तव वक्त्राम्बुजं वक्त्रमेव अम्बुजं भातीति शेषः।

शिलष्टरूपकम् साधारणधर्मस्य श्लेषनिष्पाद्यत्वादिति भावः। साधारणधर्मप्रयोगाच्च नोपमितिसमासः।।८७।।

## विवृति

राजहंसोपभोगार्हं राजहंसाः श्वेतपक्षाः पक्षिणः। अन्यत्र राजहंसाः राजश्रेष्ठाः तदुपभोगार्हम्। भ्रमरप्रार्थ्यसौरभं वक्त्राम्बुजमिति शिलष्टरूपकम्। पद्मधर्माणां मुखाम्बु–ति–(जे)पि समानत्वात्।।

**राजहंसेति**। राजहंसाः राजश्रेष्ठाः हंसविशेषाश्च। भ्रमराः मधुकराः कामुकाश्च।।

**राजेति**। राजहंसाः श्रेष्ठा राजानः तथा हंसविशेषाश्च। भ्रमरः भृङ्गः धूर्तश्च।।८७।।

---

**इष्टं साधर्म्यवैधर्म्यदर्शनाद् गौणमुख्ययोः।**
**उपमाव्यतिरेकाख्यं रूपकद्वितयं यथा॥८८॥**

## रत्नश्री

उपमारूपकं व्यतिरेकरूपकमिति रूपकद्वितयमिदमपरमिष्टं शिष्टैः। उपमेति व्यतिरेक इति वा आख्या संज्ञा तदेकदेशत्वाद्यस्येति विग्रहः कृतः। गौणस्य आरोपितस्य मुखस्य च प्रधानस्यानुपचितस्य साधर्म्यं साम्यं वैधर्म्यम् असाम्यं च तयोर्दशनात् प्रकाशनात् कारणात्। यथेति उदाहरति—

## हृदयङ्गमा

उपमारूपकं व्यतिरेकरूपकञ्च निरूपयति, इष्टमिति।— गुणयोगात् आरोप्यमाणः चन्द्रादिर्गौणः, आरोपविषयः मुखादिश्च मुख्यः, तयोः साधर्म्यदर्शनात् साधारणधर्मयोगात्, उपमारूपकं वैधर्म्ययोगात् व्यतिरेकरूपकम् इति रूपकद्वितयम् इष्टं, कविभिः इति शेषः। यथेति उदाहरणार्थम्॥८८॥

## प्रभा

उपमारूपकं व्यतिरेकिरूपकं चेति रूपकद्वयं लक्षयति—**इष्टमिति।** गौणो गुणसंबन्धादारोप्यमाणश्चन्द्रादिर्विषयो गौणः। मुख्यो वर्ण्यत्वेन प्रस्तुतत्वात् प्रधानो मुखादिविषयः। तयोर्गौणमुख्ययोः साधर्म्यदर्शना- दुपमारूपकं वैधर्म्यदर्शनाद् व्यतिरेकरूपकम् इष्टम् आलंकारिकैरिति शेषः॥८८॥

## विवृति

गौणस्य साधर्म्यदर्शनादुपमारूपकम् मुख्यस्य (?) वैधर्म्यदर्शनात् व्यतिरेकरूपकत्वम्॥८८॥

**अयमालोहितच्छायो मदेन मुखचन्द्रमाः।**
**सन्नद्धोदयरागस्य चन्द्रस्य प्रतिगर्जति॥८९॥**

## रत्नश्री

अयं मुखचन्द्रमाः, आलोहिता छाया प्रभा यस्य स तथा। केन? मदेन हेतुना सन्नद्धोऽवस्थितः उदयकालभावी रागो यस्य तस्य चन्द्रस्य प्रतिगर्जति तेनोपमीयते। गौणमुख्ययोरिह रक्ततासाधर्म्यादुपमारूपकमीदृशं दृश्यमिति॥

## हृदयङ्गमा

उपमारूपकमुदाहरति, अयमिति।– मदेन मद्यपानेन, आलोहिता आरक्ता, छाया यस्य तादृशः, अयं मुखमेव चन्द्रमाः सन्नद्धः समुज्ज्वलः, उदयरागः उदयकालिकलौहित्यं यस्य तथाभूतस्य, चन्द्रस्य प्रतिगर्जति (चन्द्रस्येति सम्बन्धविवक्षया षष्ठी) तथाभूतं चन्द्रं स्पर्द्धते, न तु अनुकरोतीत्यर्थः। (अत्र चन्द्राभिन्नतया आरोपविषयस्य मुखस्य औपम्यसूचकप्रतिगर्जनरूप-साधर्म्यसम्बन्धात् उपमारूपकमिदम्)॥८९॥

## प्रभा

उपमारूपकमुदाहरति–**अयमिति।** मदेन वारुणीमदेन आलोहितच्छाय आरक्तकान्तिः अयं मुखमेव चन्द्रमाः। संनद्धोदयरागस्य संनद्धः सर्वबिम्बव्यापनेन प्रस्फुरन्नुदयराग उदयकालीनलौहित्यं यस्य तथाविधस्य चन्द्रस्य प्रतिगर्जति समानकान्तिमत्त्वात् स्पर्धते। चन्द्रस्येति कर्मणि षष्ठी। चन्द्रं स्पर्धते न तु तमनुकरोतीत्यर्थः। अन्यथा उपमाया एव

प्रधानवाक्यस्थिततया प्राधान्यात् तत्कुक्षिनिलीनस्य मुखचन्द्रमा इतिरूपकस्य अलंकारव्यपदेशकत्वाभावेन इदं रूपकभेदोदाहरण-मसंगतं स्यात्। तथैव रूपकेण चन्द्राभिन्नं मुखमिति अवगतस्य मुखस्य चन्द्रसदृशं मुखमिति प्रतीतेरसंगतत्वमपि स्यात्। एव चात्र चन्द्राभिन्नतया आरोपविषयीभूतस्य मुखस्य औपम्यसूचकप्रति-गर्जनारूपसाधर्म्यसंबन्धादुपमारूपकमिदम्। अत्रासंतुष्टाः प्रेमचन्द्रशर्माणस्तु रक्तं तव मुखं चण्डि साक्षात् संध्येन्दुमण्डलम् इत्येतदुदाहरणं पर्यवर्तयन्त॥८९॥

## विवृति

तदुभयमुदाहरति–

मुखचन्द्रमा इति गौणः। तस्य लोहितच्छायत्वं सन्नद्धोदयरागत्वं चेति (रागेण) मुख्येन चन्द्रमसा साधर्म्यम्। प्रतिगर्जति सन्नद्धोदयरागस्येत्युपमाद्योतक इत्युपमारूपकमुच्यते॥८९॥

---

**चन्द्रमाः पीयते देवैर्मया त्वन्मुखचन्द्रमाः।**
**असमग्रोऽप्यसौ शश्वदयमापूर्णमण्डलः॥९०॥**

## रत्नश्री

[51a] चन्द्रमा मुख्यः पीयते देवैरमृतमयत्वात् पर्यायेण सुरैः चन्द्रः पीयते यतः क्रमेणापचीयत इति श्रुतेः। अत एवासमग्रोऽप्यसौ मुख्यश्चन्द्रः। न केवलं समग्र एवेत्यपिशब्दः। मया तव मुखचन्द्रमाः पीयते निषेव्यते। तथाप्ययं तव मुखचन्द्रमाः आपूर्णमखण्डं मण्डलं यस्येत्यापूर्णमण्डलः शश्वत्। अनवरतं न कदाचित् अन्यथेति गौणमुख्ययोर्वैधर्म्यात् व्यतिरेकरूपकमिदमीदृशमिति॥

## हृदयङ्गमा

व्यतिरेकरूपकमुदाहरति, चन्द्रमा इति।– देवैः असमग्रोऽपि असौ चन्द्रमाः शश्वत् पीयते, मया तु आपूर्णमण्डलः सम्पूर्णप्रकाशः, अयं तव मुखमेव चन्द्रमाः पीयते। (अत्र मुख्यगौणयोर्मुखचन्द्रयोः सम्पूर्णत्वासम्पूर्णत्वरूपवैधर्म्ययोगात् व्यतिरेकरूपकमिदम्। अयञ्च व्यतिरेकः उपमेयस्य उपमानात् समधिकमुत्कर्षं व्यञ्जयति। भोजराजस्तु इदं व्यतिरेकवन्नाम रूपकमाह; तत्रोदाहरणं यथा,–"अनाघ्रातं पुष्पं किसलयमलूनं कररुहैः अनाविद्धं रत्नं मधु नवमनास्वादितरसम्। अखण्डं पुण्यानां फलमिव च तद्रूपमनघं न जाने भोक्तारं कमिह समुपस्थास्यति विधिः॥" अत्र पुष्प–किसलय–रत्न–मधु पुण्य फलानाम् अनाघ्रातमित्यादिविशेषणापादितव्यतिरेकाणां प्रतीयमानसादृश्येन

शकुन्तला- रूपेण रूपणात् व्यतिरेकवद्रूपकमिदम्। दर्पणकारस्तु इदमेव अधिकारूढवैशिष्ट्यसंज्ञकमाह, यथा,- "अधिकारूढ़-वैशिष्ट्यं रूपकं यत्तदेव तत्" इति)।।९०।।

## प्रभा

व्यतिरेकरूपकं दर्शयति-**चन्द्रमा इति।** देवैरसमग्रोपि असंपूर्णोपि असौ चन्द्रमाः शश्वत् पीयते। अयं मत्पुरोवर्ती आपूर्णमण्डलः संपूर्णबिम्ब-स्त्वन्मुखचन्द्रमास्त्वन्मुखमेव चन्द्रमा मया पीयते। अत्र मुख्यगौणचन्द्रमसोरसंपूर्णत्वसंपूर्णत्वरूप-वैधर्म्ययोगाद् व्यतिरेकरूपकमेतत्। अयं च व्यतिरेक उपमानादुपमेयस्योत्कर्षं द्योतयति। नायं वक्ष्यमाणो व्यतिरेकालंकारः। तस्य सादृश्यप्रतीतिपूर्वकभेदपर्यवसान-विषयत्वात्। अत्र रूपकत्वेनाभेदप्रतीतिः। तदुक्तं-

शब्दोपात्ते प्रतीते वा सादृश्ये वस्तुनोर्द्वयोः।
तत्र यद्भेदकथनं व्यतिरेकः स उच्यते।। इति।।९०।।

## विवृति

अयमसौ (असमग्रो) मुख्यचन्द्रमाः अयं मुखचन्द्रः शश्वदापूर्णमण्डलः इति मुख्येन चन्द्रमसा सह मुखचन्द्रस्य गौणस्य वैधर्म्यदर्शनात् व्यतिरेकरूपकम्।।

उपमाव्यतिरेकरूपकयोः स्वरूपमाह-इष्टमिति। (गौण) मुख्ययोः पदार्थयोः साधर्म्येण रूपकं यत् दृश्यते तत् उपमारूपकं भवति। उभयोः यत्र वैधर्म्येण रूपकं दृश्यते तत् व्यतिरेकरूपकम्। इति रूपकद्वितयं इह लक्षितम्।।९०।।

---

**मुखचन्द्रस्य चन्द्रत्वमित्थमन्योपतापिनः।**
**न ते सुन्दरि! संवादीत्येतदाक्षेपरूपकम्॥९१॥**

## रत्नश्री

सुन्दरि! तव मुखचन्द्रस्येत्थमेवमिति आत्मसंवेद्यतामुपतापस्य दर्शयति। अन्यमिमं जनमुपतापयतः। परमुखेन आत्मानमाह-चन्द्रत्वं न संवादि न यथार्थमेकान्तशीतत्वाच्चन्द्रस्यास्य च तद्विपरीतत्वात्। इतीदृशं चन्द्रत्वनिषेधादाक्षेपरूप[क]मवसेयमिति॥

## हृदयङ्गमा

आक्षेपरूपकं निरूपयति, मुखेति। –हे सुन्दरि! इत्थम् एवम्, अतिकठोरमित्यर्थः, अन्योपतापिनः कमलसन्तापकस्य अथवा विरहिजनपीड़कस्य, चन्द्रस्य इति शेषः, चन्द्रत्वं ते तव, मुखमेव चन्द्रः तस्य न संवादि नानुकारकं, न युक्तमित्यर्थः, चन्द्रः परोपतापकरः त्वन्मुखन्तु सर्वाह्लादकमिति भावः। एतत् आक्षेपरूपकम् आक्षेपाख्यं रूपकम्, आक्षेपः प्रतिषेधोक्तिः, रूपणस्य तत्पूर्वकत्वादिति भावः। (नेदमपह्नुतिः, प्रस्तुतप्रतिषेधाभावात्, मुखमेवात्र प्रस्तुतम् आरोप्यमाणत्वेन चन्द्रस्याप्रस्तुतत्वमित्यवधेयम्)॥९१॥

## प्रभा

आक्षेपरूपकं दर्शयति–**मुखेति**। हे सुन्दरि। इत्थं मया प्रत्यक्षीकृतम् अतिप्रखरम्। अन्योपतापिनः अन्याः प्रतिनायिकास्तासां उपतापिनः संतापकस्य सौन्दर्यातिशयेन तासां

मात्सर्योदयात्। ते मुखचन्द्रस्य चन्द्रत्वं संवादि नानुगुणम्। यतः प्रसिद्धचन्द्रः सर्वेशामाह्लादकस्तव मुखं तु प्रतिनायिकानां संतापकरम् अतो न संवादि। अथवा अन्योपतापिनः अनयस्त्वत्तो भिन्नो नायकोहं तस्य उपतापिनः प्रणयकलहे मधुरोक्तिशून्यतया। अन्यत् सर्वं पूर्ववत्। अत्र अन्ये टीकाकारास्तु–इत्थमितिपदं वाक्यस्यास्य कमलसंकोचनकृतचन्द्रनिन्दाबोधकवाक्यानन्तर्यं सूचयति। इत्थं कमलसंकोचनेन अन्योपतापिनः परपीडयितुः। यद्वा इत्थम् एवम् अतिनिर्दयमित्यर्थः अन्योपतापिनः मादृशविरहिजनसंतापकस्य चन्द्रस्य प्रसिद्धस्य चन्द्रत्वं तव मुखचन्द्रस्य न संवादि न युज्यते सर्वेषामाह्लादकत्वेन परपीडकधर्माध्यासायोगादिति भाव इति विवृण्वन्ति। तत्र अन्योपतापिनः इति विशेषणमात्राद्विशेष्यस्य चन्द्रस्य प्रतीतिः स्वीकर्तव्या। तदुक्तं वामनेन–विशेषणमात्रप्रयोगो विशेष्यप्रतिपत्तौ इति। इत्येतद् आक्षेपरूपकम् आक्षेपः प्रतिषेधोक्तिस्तदुपादाननियतत्वाद् आक्षेपरूपकम्। अथवा आक्षेपो निन्दा तन्निवेशनादिदमाक्षेपकम्। नायं व्यतिरेकः सादृश्यप्रतीतेरभावात्। न वापह्नुतिः प्रस्तुतस्य निषेधायोगात्। अत्र निषेधश्चन्द्रत्वस्य स तु न प्रस्तुत आरोपविषयत्वात् प्रथमार्थस्वीकारेपि प्रस्तुतमुखचन्द्रन्स्य निषेधेपि अन्यार्थस्य अनारोपान्न सा भवति। तत्र अन्यार्थारोपणस्य विहितत्वांत्। तथा च वक्ष्यति–अपह्नुतिरपह्नुत्य किंचिदन्यार्थदर्शनमिति।।९१।।

---

**मुखेन्दुरपि ते चण्डि! मां निर्दहति निर्दयम्।**
**भाग्यदोषो ममैवेति तत् समाधानरूपकम्॥९२॥**

---

## रत्नश्री

चण्डि निर्दये! एकान्तप्रीतिकरः तव मुखेन्दुः अतिनिर्दयम् अत्यर्थं मां निर्दहति। नैतद्युज्यत इत्ययोगमपिशब्दः सूचयति। न केवलम् इन्दुरिति वा [अपि]शब्दः समुच्चिनोति। अथवा किं न युज्यते? संभाव्यते सर्वमीदृशमपि भाग्यपरावृत्तौ, यदाह-भाग्यदोषो ममैव इति ममैवायं भाग्यदोषः अभाग्यं यदेवं भवति। न तव मुखचन्द्रस्यायं दोषः। इत्येवंरूपं यत् तदीदृशं समाधानरूपकमित्थं समाधानाभिधानादिति॥

## हृदयङ्गमा

समाधानरूपकं निर्दिशति, मुखेन्दुरिति।–हे चण्डि! कोपने! ममैव भाग्यदोषात् ते मुखमेव इन्दुरपि मां निर्दयं निर्दहति तापयति। इति अत्र, समाधानात् भाग्यदोषान्ममेति स्वयं हेतुवादप्रदर्शनात्, तत् समाधानरूपकम्॥९२॥

## प्रभा

समाधानरूपकं कथयति। **मुखेन्दुरिति।** हे चण्डि ते मुखेन्दुरपि मां निर्दयं दहति अपिना दहनस्यान्त्यतायोग्यता सूचिता। तत्र स्वयं समाधत्ते ममैवेति। भाग्यदोषाद् दैवदुर्विपाकात्। इति एवं स्वयं समाधानाद् इदं समाधानरूपकम्॥९२॥

---

**मुखपङ्कजरङ्गेऽस्मिन् भ्रूलता नर्तकी तव।
लीलानृत्तं करोतीति रम्यं रूपकरूपकम्॥९३॥**

---

## रत्नश्री

सुन्दरि! तव भ्रूलता लोलतादिना। सा च नर्तकी चित्तहरत्वादिना लीलाप्रधानं श्रृङ्गारमयं नृत्तं वर्णितरूपं करोति। कुत्र? मुखं पङ्कजं कान्त्यादिना तच्च रङ्गो नृत्यभूमिः। तत्रास्मिन्निर्ति प्रत्यक्षवर्तिनि। ईदृशं रूपकरूपकं रम्यं मनोज्ञं लतीकृतायाः भ्रुवो नर्तकीकरणात् पङ्कजीकृतस्य च मुखस्य रङ्गीकृतेरिति॥

## हृदयङ्गमा

रूपकरूपकं लक्षयति, मुखेति।—अस्मिन् तव मुखमेव पङ्कजं तदेव रङ्गः नाट्यशाला तस्मिन्, भ्रूरेव लता सा एव नर्त्तकी लीलानृत्यं करोति, (अत्र "लीलानाट्यामृतं दृष्टौ सखि! यूनां निषिञ्चति" इति भोजराजसम्मतः पाठः)। इति एतत्, रम्यम् अतिमनोहरम्, (अत्र रम्यमिति विशेषणेन बहूनां रूपणात् यत्र रमणीयता न स्यात्, तत्रास्य न प्रसङ्गः इति; यथा,—"नारीबाहुलताव्यालीपरिरब्धः कुतः सुखी" इत्यादि) रूपकरूपकम् एकेन रूपितस्यापि पुनरन्येन रूपणात् इति भावः। (तथा च प्रथमं मुखे पङ्कजत्वारोपः तदनन्तरञ्च मुखपङ्कजे रङ्गत्वारोपः, एवं भ्रुवि लतात्वारोपः, तदनन्तरं लतायां नर्त्तकीत्वारोप इति। इदञ्च समासे एव बोध्यम्, असमासे तु एकस्मिन् बहूनामारोपे हेतुमति हेतुरूपकम्, अहेतुके मालावयविरूपकमिति। यथा,—"सौन्दर्य्यस्य तरङ्गिणी तरुणिमोत्कर्षस्य हर्षोद्गमः कान्तेः

कार्मणकर्म्म नर्म्मरहसामुल्लासनावासभूः। विद्या वक्रगिरां विधेरनवधिप्रावीण्यसाक्षात्क्रिया बाणाः पञ्चशिलीमुखस्य ललनाचूड़ामणिः सा प्रिया।।'' इति)।।९३।।

## प्रभा

रूपकरूपकमाह–मुखेति। मुखमेव पङ्कजं तदेव रङ्गं नृत्यस्थानं तस्मिन् भ्रुवौ एव लता सा एव नर्तकी नटी। लीलानृत्यं विलासनर्तनम् करोति इति एतद् रम्यं मनोहरम् रूपरूपकम्। एकेन रूपितस्यान्येन रूपणात् तत्संज्ञकोलंकारः। तथा च मुखपङ्कजरङ्ग इत्यत्र प्रथमं मुखस्य पङ्कजेन रूपणं पश्चाच्च मुखपङ्कजस्य रङ्गेण रूपणम्। तथैव भ्रूलतानर्तकी इत्यत्र प्रथमं भ्रुवो लतात्वेन पश्चाद्भ्रूलताया नर्तकीत्वेन रूपणम्। इदं च समासे एव संभवति। वाक्ये तु एकस्मिन् बहूनामारोपे हेतूपादने हेतुरूपकम्। यथा गाम्भीर्येण समुद्रोसि इत्यादि पूर्वं निर्दिष्टम्। हेतोरनिर्देशे तु मालारूपकम् यथा प्रकाशे–

सौन्दर्यस्य तरङ्गिणी तरुणिमोत्कर्षस्य हर्षोद्गमः
कान्तेः कार्मणकर्म नर्मरहसामुल्लासनावासभूः।
विद्या वक्रगिरां विधेरनवधिप्रावीण्यसाक्षात्क्रिया
बाणाः पञ्चशिलीमुखस्य ललनाचूडामणिः सा प्रिया।।
(७२६ पत्रे) इति।

अत्र रम्यमिति लक्षणघटकतयाङ्गीकृत्य यत्र रूपकरूपणे रम्यत्वं नास्ति तत्र नायमलंकारः। यथा–नारीबाहुलताव्याली-परिरब्धः कुतः सुखी इति। अत्र बाहौ लतात्वारोपे न कापि रम्यता। अपकर्षप्रतिपादनस्यैव प्रस्तावाद् इति प्रेमचन्द्रशर्माणः कथयन्ति।

अस्मिन्नुदाहरणे चमत्कृतिरस्ति परं बाहौ लतात्वारोपे रम्यता नास्तीति तदभिप्राय इति ध्येयम्।।९३।।

## विवृति

अन्योपतापिनः तव मुखेन्दोश्चन्द्रत्वं न संवादि

रूपकरूपकमाह–**मुखपङ्कजेति।** मुखं पङ्कजत्वेन रूपितम्; तत् रङ्गत्वेन रूपितम्; भ्रूः लतारूपेण रूपिता; सा नर्तकीरूपेण रूपिता। एतत् रूपकरूपकम्।।९१–९३।।

---

**नैतन्मुखमिदं पद्मं न नेत्रे भ्रमराविमौ।**
**एतानि केसराण्येव नैता दन्तार्चिषस्तव॥९४॥**

## रत्नश्री

तव एतत् मुखं न भवति। किं तर्हि पद्मम् इदम्। एते च अत्र नेत्रे न भवतः। किं तर्हि? भ्रमराविमौ। एताश्च दन्तार्चिषौ न भवन्ति किं तु केसराण्येतानि इति॥

तद् व्याचष्टे–

## हृदयङ्गमा

तत्त्वापह्नवरूपकं निरूपयति, नेत्यादिद्वाभ्याम्। –एतत् तव मुखं न, इदं पद्मं, नेत्रे न, इमौ भ्रमरौ, एतानि केशराणि किञ्जल्का एव, एता दन्तार्चिषः न॥९४॥

## प्रभा

तत्त्वापह्नवरूपकं दर्शयति–**नैतदिति**। एतन्मुखं न इदं पद्मम्। इमे नेत्रे न अपि तु भ्रमरौ। एता दन्तार्चिषो दन्तकान्तयो न किंतु केसराणि किञ्चल्का एव। तवेति सर्वत्र उपमेयेन संबध्यते॥९४॥

---

**मुखादित्वं निवत्यव पद्मादित्वेन रूपणात्।
उद्भावितगुणोत्वकर्षं तत्त्वापह्नवरूपकम्॥९५॥**

## रत्नश्री

मुखमादिर्यस्य नेत्रादेः तस्य भावः। तत्त्वम्। तद् विनिवर्त्यैव अपहृत्यैव। न तु मुखादिकमेवैतत् पद्मादिकमिति तत्त्वम् [51b] अपलाप्यते [अत]एवाक्षेपरूपकविलक्षणमेतत्। पद्ममादिर्यस्य भ्रमरादेः तस्य भावः तेन लक्षितस्य रूपणात् परिकल्पनात्। मुखादेरिति गम्यते। तत्त्वापह्नवरूपकमीदृशं तत्त्वस्य वस्तुरूपस्य अपह्नवेन रूपकमिति। किमेवमाविष्कृतं स्यादित्याह-उद्भावितः प्रकाशितः। गुणस्य कान्त्यादेरुत्कर्षा[ति]शयो येन यत्र वा तत्तथोक्तमिति।।

कि[मि]यन्त एव रूप[क]भेदाः? नेत्यपर्यवसायेन उपमासामान्येन निगमयन्नाह-

## हृदयङ्गमा

अत्र मुखादित्वं मुखत्वादिकं, निवर्त्त्य प्रतिषिध्य एव, पद्मादित्वेन पद्मत्वादित्वेन, रूपणात् मुखादिषु पद्मत्वादिभिरध्यासात्, एतत् उद्भावितः व्यञ्जितः, गुणस्य उपमेयगतस्य, उत्कर्षः वैचित्र्यातिशयः यत्र तत्, तत्त्वापह्नवरूपकं तत्त्वस्य याथार्थ्यस्य मुखत्वादिकस्य अपह्नवमूलकत्वादित्यर्थः। [अत्रारोपस्य प्रकृतनिषेधपूर्वकत्वादपह्नुतिरेव भवितुं युक्ता इति चेदत्रोच्यते, यत्र प्रकृतस्य धर्म्मनिषेधपूर्वको धर्म्मान्तरारोपस्तत्रापह्नुतिः, यत्र तु प्रकृतधर्म्मिनिषेधेना-

प्रकृतधर्म्यन्तरारोपस्तत्र रूपकमेव इति प्राचामाशयः, अत एवापह्नुतौ यथा उदाहृतं ग्रन्थकृता,–"न पञ्चेषुः स्मरस्तस्य सहस्रं पत्रिणामिति" (का० २प० ३०४श्लो०) ; अत्र तु पञ्चबाणताधर्मं प्रतिषिध्य सहस्रबाणतारूपधर्म्मान्तरारोप इति। नैतन्मुखम् इत्यादौ तु मुखादेर्धर्म्मिणः प्रतिषेधेनान्यस्य धर्म्मिणः पद्मादेरारोपः इति। केचित्तु,–रूपके सादृश्यप्रतीतिरस्त्येव अपह्नुतौ न तथा इति वदन्ति। नव्यास्तु,–निषेधपूर्वकारोपे अपह्नुतिरेव अन्यत्र रूपकम् इत्युभयत्रापि धर्म्मधर्म्मिसमारोपरूपे अपह्नुतिं मन्यन्ते। उक्तञ्च दर्पणकृता रूपकलक्षणे निरपह्नवे इति विषयविशेषणम्; यथा,–"रूपकं रूपितारोपात् विषये निरपह्नवे" इति]।।९५।।

## प्रभा

उक्तोदाहरणं व्याख्याति–**मुखादित्वमिति।** मुखादित्वम् मुखत्वादिकं मुखत्वनेत्रत्वदन्तार्चिष्ट्वरूपमुपमेयम् निवर्त्यैव प्रतिषिध्यैव। पद्मादित्वेन पद्मत्वादिना पद्मत्वभ्रमरत्वकेसरत्वेन रूपणाद् आरोपाद् उद्भावितगुणोत्कर्षम् उद्भावितो रूपकान्तरेभ्यः प्रकटतां नीतो गुणानामुत्कर्षस्तादात्म्यारोपहेतु प्रस्तुतगुणानाम् आधिक्यम् यत्र तत्। तत्त्वस्य यथार्थभूतस्य प्रस्तुतस्य मुखस्वरूपस्य अपह्नवेन अप्रस्तुतपद्मादिस्वरूपारोपेण वस्तुनिह्नवेन रूपकम् इति तत्त्वापह्नवरूपकम्। रूपकान्तरेषु केवलं सामानाधिकरण्येन उपमेयोपमानानामभेददर्शनेन यावान् गुणोत्कर्षस्ततोपि अधिकोत्र प्रतिषेधपूर्वकारोपेण इति उद्भावितगुणोत्कर्षत्वमस्मिन् रूपके सहृदयवेद्यमस्ति। केचित्तु उद्भावितगुणोत्कर्षम् इत्यस्य उद्भावितः स्फुटं दर्शितो गुणोत्कर्षः प्रस्तुतस्य यत्रेति प्रस्तुतोपमेयस्य गुणवर्णनरूपं तत्त्वापह्नवरूपकस्य

विशेषं मन्यन्ते। परं तदपेक्षया प्रथमदर्शिताशय एव गरीयान् इति भाति। नेयमपह्नुतिः। तस्यां प्रस्तुतस्य धर्मनिषेधेन धर्मान्तरारोपो यथा—न पञ्चेषुः स्मरस्तस्य सहस्त्रं पत्रिणामिति। कुवलयानन्देपि—शुद्धापह्नुतिरन्यस्यारो पार्थो धर्मनिह्नव इति धर्मनिह्नवस्थल एव अपह्नुतेर्विषयो दर्शितः। अस्मिन्नुदाहरणे प्रस्तुतस्य स्मरस्य पञ्चेषुत्वरूपं धर्मं प्रतिषिध्य तस्मिन् सहस्त्रपत्रित्वारोपः। अत्र तु धर्मिणं मुखादिकं प्रतिषिध्य धर्म्यन्तरस्य पद्मादिकस्यारोप इति उभयोर्भेदः। केचित्तु सादृश्यप्रतीतिपूर्वकारोपो रूपकम्। अपह्नुतौ तु सादृश्यप्रतीतिर्नापेक्ष्यते। सादृश्यप्रतीतिभिन्नस्थलीयारोप एव सा। तथा च प्रकृते निषेधेपि सादृश्यप्रतीतिरस्त्येव इति अत्र सादृश्यप्रतीतिजीवितस्य रूपकस्यैव साम्राज्यम्। दर्पणकारास्तु—प्रकृतं प्रतिषिध्यान्यत्स्थापनं स्यादपह्नुतिः। (१०. ३२) इति सामान्यतः प्रतिषेधपूर्वकारोपे अपह्नुतिं कथयन्ति। तदपह्नुतिविषयपरिहारार्थं च रूपकलक्षणे रूपकं रोपितारोपो विषये निरपह्नव इति विषयस्य इति विषयस्य निरपह्नवमिति विशेषणमुपन्यस्यन्ति तन्मतेत्रापह्नुतिरेव॥९५॥

---

**न पर्यन्तो विकल्पानां रूपकोपमयोरतः।**
**दिङ्मात्रं दर्शितं धीरैरनुक्तमनुमीयताम्।।९६।।**

## रत्नश्री

रूपकस्योपमायाश्च विकल्पाः प्रभेदाः सामान्यलक्षणव्याप्ताः। तेषां पर्यन्तोऽवसानं नास्ति यतस्ततः कारणात्, दिङ्मात्रं सर्वविकल्पव्यापकसामान्यलक्षणानुगतविशेषरूपं कियदपि लक्ष्यं शेषविकल्पानुगमद्वारं दर्शितम् उक्तं धीरैः कविभिरिति परमुखेनाचष्टे। शेषमतिदिशति-अनुक्तमिहानुपात्तं विकल्पजातं सामान्यविशेषलक्षणात्मकं तादृशमुक्तविकल्पानुसारेणानुमीयताम् ऊह्यताम्। तस्याप्येवंप्रकारत्वात् शक्यमनया दिशा तदप्यवसातुमभियुक्तैरिति।।

तद्यथा–

तव तन्वङ्गि! वदनमिन्दुना तुल्यमित्ययम्।
अभिधत्तां जनो नाहमुत्सहे वक्तुमीदृशम्।। अनुत्साहोपमा।

गुञ्जद्भृङ्गमिवाम्भोजं सशीत्कारं मुखं तव।
इति वक्तुमनुत्साहो न युक्तः कलभाषिणि।। अयुक्तोपमा।

पयोधरयुगे तन्वि! तव चक्राह्वयद्वयम्।
अविभक्तमिवाभाति भासुरं कुङ्कुमश्रिया।। विशेषोपमा।

एवमन्येप्युपमाविकल्पा अभ्यूह्याः।

मुखेन्दावेव ते तन्वि! रागपक्ष्मविचक्षणम्।

कामः केवलमाधत्ते धनुः कुसुमसायकम्।। नियमरूपकम्।

अङ्गनासरसीं रम्यामुन्निद्रमुखपङ्कजाम्।

शमनासाद्य [?] सन्तापं कथमेष गमिष्यति।। आशंसारूपकम्।

अनिच्छयैव ते तन्व्यास्तस्या वदनपङ्कजम्।

विरहय्य विमूढ़ाद्य मनः किमनुतप्यसे।। अनुशयरूपकम्।

एवमपरेऽपि रूपकविकल्पा ऊहितव्याः। इति रूपकप्रपञ्चः।।

।। इति रूपकचक्रम् ।।

दीपकं परिदीपयन्नाह–

## हृदयङ्गमा

रूपकं संहरति, नेति। –रूपकस्य उपमायाश्च विकल्पानां विशेषाणां, पर्य्यन्तः शेषः, न, अस्तीति शेषः, अतः दिङ्मात्रं सामान्यं, दर्शितं, मया इति शेषः, अनुक्तम् अकथितं, धीरैः धीमद्भिः, अनुमीयताम् अनुमानेन ज्ञायताम्। [अत्र हि अन्यैरुक्ता रूपकभेदाः कतिचित् शिष्याणां बोधसौकर्य्यार्थं प्रदर्श्यन्ते। तत्र केचिदाहुः,–रूपकं तावत् त्रिविधं, सावयवं निरवयवं परम्परितञ्च; आद्यं समस्तवस्तुविषयम् एकदेशविवर्त्ति च, द्वितीयं शुद्धं मालारूपञ्च, तृतीयमपि द्विविधं तच्च परम्परा एकारोपस्यान्यारोपहेतुत्वमित्येवंरूपा सञ्जाता अत्र इति (तारकादित्वादितच्प्रत्ययसिद्धं) परम्परितपदं व्युत्पत्तिलभ्यमेवार्थं प्रकटयति; तेन च, यत्र यदारोपं विना अन्यत्रारोपो न सम्भवति तत् परम्परितं नाम रूपकम् आरोप्यारोपाधिकरणवाचकस्य शिलष्टत्वे

आरोप्यारोपविषयवाचकपदयोः भेदे च सम्भवतीति द्विविधम्। तत्र श्लिष्टवाचके यथा,–"भुवि भ्रमित्वाऽनवलम्बमम्बरे विहर्त्तुमभ्यासपरम्परा परा। अहो! महावंशममुं समाश्रिता सकौतुकं नृत्यति कीर्त्तिनर्त्तकी।।" इति; अत्र राज्ञि महावंशः महाकुलसम्भवः, एवं महान् वंशो वेणुरिति वेणुत्वारोपश्च कीर्त्तौ नर्त्तकीत्वारोपे निमित्तं महावंशपदस्य श्लिष्टत्वञ्च। यथा वा,–"विद्वन्मानसहंस! वैरिकमलासङ्कोचदीप्तद्युते!" इत्यादि वाचके श्लिष्टे मालारूपं परम्परितसंज्ञकमिदम्। भेदे यथा,–"धृतैव या हाटकपट्टकाऽलिके बभूव केशाम्बुदविद्युदेव सा। मुखेन्दुसम्बन्धवशादिवायुषः स्थिरत्वमूहे नियतं तदायुषः।।" इति; इह केशेषु मेघत्वारोपः सुवर्णपट्टिकायां विद्युत्त्वारोपे निमित्तं, केशाम्बुदयोर्भिन्नत्वञ्च इति। विश्वनाथस्तु एवमन्यमपि भेदमत्राह; यथा,–"क्वचिद्वैयधिकरण्येऽपि यथा,–'विदधे मधुपश्रेणीमिह भ्रूलतया विधिः। क्वचिद्वैधर्म्येऽपि यथा,–"सौजन्याम्बुमरुस्थली सुचरितालेख्यद्युभित्तिर्गुणज्योत्स्नाकृष्णचतुर्दशी सरलतायोगश्व-पुच्छच्छटा। यैरेषाऽपि दुराशया कलियुगे राजाऽऽवली सेविता तेषां शूलिनि भक्तिमात्रसुलभे सेवा कियत् कौशलम्?'।। इति। अधिकारूढवैशिष्टासंज्ञकरूपकं यथा मम,–'इदं वक्रं साक्षाद्विरहितकलङ्कः शशधरः' इत्यादि"]।।९६।।

## प्रभा

रूपकमुपहसंहरति–**न पर्यन्त इति।** रूपकस्य उपमायाश्च विकल्पानां प्रकाराणाम् पर्यन्तः परिसमाप्तिर्नास्ति। अतो दिङ्मात्रम् उपमारूपकस्वरूपावगमाय किंचिदिव दर्शितं कथितम्। अनयैव दिशा धीरैः साहित्यशास्त्रप्रगल्भमतिभिरनुक्तमपि अकथित

उपमारूपकविभाग अनुमीयताम् उन्नीयताम्। तथा च भेदद्वयविशिष्टं परंपरितमपि रूपकभेद एव। तदुक्तं प्रकाशकृता–

नियतारोपणोपायो यदारोपः परस्य यः।
तत् परंपरितं श्लिष्टे वाचके भेदभाजि वा।।

यथा–

विद्वन्मानसहंस वैरिकमलासंकोचदीप्तद्युते
दुर्गामार्गणनीललोहित समित्स्वीकारवैश्वानर।
सत्यप्रीतिविधानदक्ष विजयप्राग्भावभीम प्रभो
साम्राज्यं नरवीर वत्सरशतं वैरिञ्चमुच्चैः क्रियाः।।
(७२८-२९ पत्रयोः) इति

अत्र मानसमेव मानसम् कमलायाः संकोच एव कमलानामसंकोचो दुर्गाणाममार्गणमेव दुर्गाया मार्गणम् समितां युद्धानां स्वीकार एव समिधां स्वीकारः सत्ये प्रीतिरेव सत्यामप्रीतिर्विजयः परपराभव एव विजयोर्जुन एवमारोपणनिमित्तो हंसादेरारोपः।। भेदभाजि यथा–

आलानं जयकुञ्जरस्य दृषदां सेतुर्विपद्वारिधेः।
पूर्वाद्रिः करवालचण्डमहसो लीलोपधानं श्रियः।
संग्रामामृतसागरप्रमथनक्रीडाविधौ मन्दरो
राजन् राजति वीरवैरिवनितावैधव्यदस्ते भुजः।। इति।

अत्र जयादेर्भिन्नशब्दवाच्यस्य कुञ्चरत्वाद्यारोपे भुजस्य आलानत्वाद्यारोपो युज्यते। अपय्यदीक्षितास्तु अश्लिष्टशब्दनिबन्धनं मालापरंपरितमपि दर्शयन्ति। यथा–

पर्यङ्को राजलक्ष्म्या हरितमणिमयः पौरुषाब्धेस्तरङ्गः
संग्रांमत्रासताम्यन्मुरलपतियशोहंसलीलाम्बुवाहः।
भग्नप्रत्यर्थिवंशोल्बणविजयकरिस्त्यानदानाम्बुपट्टः
खड्गक्ष्मासौविदल्लः समिति विजयते मालवाखण्डलस्य।।

इति। (चि.मी.५१ पत्रे)

इदं चाधिकारारूढवैशिष्ट्यमपि भवति। यथा–इदं वक्त्रं साक्षाद्विरहितकलङ्कः शशधर इति। वैयधिकरणेपि भवति। यथा–विदधे मधुपश्रेणीमिह भ्रूलतया विधिरिति। क्वचिद्वैधर्म्येणापि। यथा–सौजन्याम्बुमरुस्थली सुजनता लेख्यद्युभित्तिर्गुण इत्यादि। काव्यानुशासने (२५१ पत्रे) अन्येपि भेदा हेमचन्द्रेण दर्शिताः। तथाहि अनेकविषयं रूपकं यथा–

यस्या बीजमंहकृतिर्गुरुतरो मूलं ममेति ग्रहो
नित्यत्वस्मृतिरङ्कुरः सुतसुहृज्जात्यादयः पल्लवाः।
स्कन्धोदारपरिग्रहः परिभवः पुष्पं फलं दुर्गतिः
सा मे त्वच्चरणार्हणापरशुना तृष्णालता लूयताम्।।

इदमेव अन्यैरुभयावयवत्वेन निर्दिश्यते। उदाहरणान्तरं यथा–

इन्द्रस्त्वं तव बाहू जयलक्ष्मीद्वारतोरणस्तम्भौ।
खड्गः कृतान्तरसना रसना च सरस्वती राजन्।। इति।

सहजावयवरूपकं यथा–

गजो नगः कुथां मेघाः शृङ्खलाः पन्नगा अपि।
यन्ता सिंहोपि शोभन्ते भ्रमरा हरिणास्तथा।। इति।

यथा वा–

पप्फुरिअओठ्ठदलअं तक्खणविगलिअरुहिरमहुविच्छड्डं।
उक्खण्डिदअण्ठणालं पडिअं फुटदसणकेसरं मुहकमलं।।

अत्र ओष्ठादीनां दलादीनां च मुखाम्भोजावयवानां स्फुरितविगलितोत्खण्डितस्फुटविशेषणविशिष्टानां परस्परमुपमानोपमेयभावरूपितानां मुखपक्षे कमलपक्षे च सहजत्वं गम्यते।

उभयावयवं यथा–

अलिकुलकुन्तलभाराः सरसिजवदनाश्च चक्रवाककुचाः।
राजन्ति हंसरसनाः संप्रति वापीविलासिन्यः।। इति।

रशनारूपकं यथा–

किसलयकरैर्लतानां करकमलैर्मृगदृशां जगज्जयति।
नलिनीनां कमलमुखैर्मुखेन्दुभिर्योषितां मदनः।। इति।

अत्र हि किसलयकरैः करकमलैः कमलमुखैर्मुखेन्दुभिरिति रशनाक्रमेण शब्दानां संदर्भ उपलभ्यमानस्तदर्थानां मनोभुवो जगद्विजये लतादिसंबन्धात् करणभावमनुमापयति। एवमन्येपि विविधाः कल्पिताः प्रभेदाः सन्ति। तेषु केचिदुक्तेषु अन्तर्भावनीयाः केचित्तु वर्णनानुरोधेन तत्तदनुरूपनामभिरूहनीयाः। विस्तरस्तु सरस्वतीकण्ठाभरणे चतुर्थपरिच्छेदे द्रष्टव्यः।।९६।।

## विवृति

**न पर्यन्त** इति। अनुक्ता अपि भेदाः रूपकोपमयोः अनया दिशा प्राज्ञैः अनुमीयताम्।।९४–९६।।

---

**जातिक्रियागुणद्रव्यवाचिनैकत्रवर्तिना।**
**सर्ववाक्योपकारश्चेत् तदाहुर्दीपकं यथा॥९७॥**

## रत्नश्री

[52a] जातिवाचिना क्रियाभिधायिना गुणप्रकाशिना द्रव्याभिलापिना वा शब्देन वाक्यावयवभूतेन केनचित् एकत्र वाक्यस्यादौ मध्येऽन्ते वा वर्तमाने[न]कर्तृभूतेन सर्वस्याभिमतस्य कस्यचिद् वाक्यस्य क्रियाकारकसम्बन्धाभिधायिनः पदसन्तानस्यार्थद्वारेण सा[धन] संभवादुपकारः साध्यसाधनभावेन तदपेक्षालक्षणश्चेत् यदि भवति तदेवंरूपं दीपकमाहुः उपदिशन्ति तद्विदः। सर्वं वाक्यं दीपयत्युपकरोतीति दीपकम्। यथेत्युदाहरति॥

## हृदयङ्गमा

अथ दीपकमाह, जातीति।–एकत्र प्रबन्धस्य यस्मिन् कस्मिन् अंशे, आदावन्ते मध्ये वा इत्यर्थः, वर्त्तिना स्थितेन, जातिक्रियागुणद्रव्यवाचिना जातिवाचकेन क्रियावाचकेन गुणवाचकेन द्रव्यवाचकेन वा एकेन पदेन, चेत् यदि, सर्वस्य वाक्यस्य प्रबन्धघटकस्य, उपकारः उपकरणम्, अन्वयोपपत्तिरित्यर्थः, भवतीति शेषः, तं दीपकम् आहुः, दीपस्य एकदेशस्थितस्य अपि देशान्तरीयपदार्थप्रकाशनवत् अस्य सर्वोपकारकपदमूलकत्वात् इति भावः। (तदुक्तं भरतेन,–"नानाधिकरणस्थानां शब्दानां सम्प्रदीपकः। एकवाक्येन संयोगो यस्तु दीपकमुच्यते॥" इति। दर्पणकारस्तु,– "अप्रस्तुतप्रस्तुतयोर्दीपकन्तु निगद्यते। अथ कारकमेकं स्यादनेकासु क्रियासु चेत्॥" इति लक्षणमाह, तत्तु प्राचीनोक्तलक्षणात्

भिन्नप्रकारमेव। तस्याप्यनेकवाक्यगतत्वे इहोक्तलक्षणलक्षिततत्वमपि सम्भवति इति दिक्) यथेति वक्ष्यमाणोदाहरणार्थम्।।९७।।

## प्रभा

क्रमप्राप्तं दीपकं लक्षयति–**जातीति।** एकत्र प्रबन्धान्तरगते कस्मिंश्चिदपि एकस्मिन् वाक्य आदिमध्यावसानेषु एकस्मिन् स्थाने वर्तिना विद्यमानेन जातिक्रियागुणद्रव्यवाचिना जात्याद्यन्यतमवाचकेन पदेन सर्ववाक्योपकारश्चेत् स्वार्थद्वारा वाक्यान्तरार्थान्वयोपपत्तिश्चेत् तदा तं रचनाचमत्कारं दीपकं दीपकसंज्ञकालंकारम् आहुः कवय इति शेषः। दीप इव दीपकम्। संज्ञायां कन् इति सूत्रेण इवार्थे कन्। दीपो यथा प्रासादार्थमारोपितः प्रासादमुपकृत्य रथ्यामपि उपकरोति तथा कस्मिंश्चिदपि एकस्मिन् वाक्ये स्थितं जात्यादिपदं तद्वाक्योपस्कारपूर्वकम् अन्यस्मिन् वाक्ये तदादिसर्वनाम्ना चकारादिना वा अनुषक्तं सत् तदर्थं संपादयति इति दीपसाम्याद् दीपकम्। एवं च एकवाक्योपात्तपदप्रतिपाद्यस्य जात्याद्यन्यतमस्य तत्रोपपन्नान्वयत्वेन निराकाङ्क्षस्यापि पुनर्वाक्यान्तरान्वयोपपादनायानुषङ्गादिना तत्रान्वयित्वं दीपकमिति निष्कर्षः। अत एव अस्य अर्थालंकारत्वम्। इदमेव दीपकलक्षणं भरतभामहादिभिः कटाक्षितं दृश्यते। सरस्वतीकण्ठाभरणेपि इदमेव लक्षणं स्वीकृत्य विस्तरः प्रदर्शितः। प्रकाशकारादयोर्वाचीनास्तु प्रस्तुताप्रस्तुतयोर्धर्मस्य सकृद्वृत्तित्वं दीपकमाहुः। तदनेकवाक्यगतं चेदेतन्मतेन दीपकं भवेत्। एकवाक्यगतत्वे तु भिन्नं तदिति ध्येयम्। उपमारूपकयोः साधारणधर्मस्योभयान्वितत्वेपि अनुषङ्गादिना वाक्यान्तरार्थोपस्थाप- कत्वाभावान्न तत्र दीपकातिव्याप्तिः। सर्ववाक्योपकारो यत्र जात्यादिपदानामुपादानं तद्वाक्यस्य तथा

तद्भिन्नानां जात्यादिपदाकाङ्क्षिणां वाक्यान्तराणां च उपकारः। अनेन एकवाक्ये दीपकं न भवतीति स्पष्टम्।।९७।।

## विवृति

इति रूपकचक्रम्।

दीपकं लक्षयति–**जातीति।** अनेकवाक्याश्रयं दीपकम्। एकवाक्यगतेन जातिक्रियागुणद्रव्यवाचिना सर्ववाक्यसम्बन्धश्चेत् तत् दीपकम्। दीपवत् दीपकम् एकत्रावस्थितो यथा दीपः प्रकाशयति दूरे, एवं एकवाक्यस्थितमपि पदं वाक्यान्तराण्यपि प्रकाशयति।।

अथ प्रसिद्धं दीपकं लक्षयति–**जातीति।** एकत्र वाक्ये वर्तिना जातिवाचिना क्रियावाचिना गुणवाचिना द्रव्यवाचिना वा पदेन सर्ववाक्योपकारश्चेत् तत् दीपंक आहुः। उपकारो वाक्यस्य नैरपेक्ष्यसम्पादनम्। दीपकस्य श्लोकादिमध्यान्ताः स्थानानि। तत्र ग्रन्थान्तरेष्वपि एवमेव उक्तम्–'पदेनैकेन सिद्ध्यन्ति वाक्यार्था बहवो यदि। पद्यादिमध्यपर्यन्तेष्वेतद्दीपकलक्षणम्।।९७।।

---

**पवनो दक्षिणः पर्णं जीर्णं हरति वीरुधाम्।
स एवावनताङ्गीनां मानभङ्गाय कल्पते॥९८॥**

## रत्नश्री

पवनो दक्षिणो मलयानिलः। वीरुधां लतानां गुल्मानां वा सम्बन्धि पर्णं शीर्णं हरति क्षिपति, नताङ्गीनां मानवतीनां नवाय प्रत्यग्राय मानस्य विषयस्य वामताविशेषस्य विगमार्थं च कल्पते संपद्यते। किम्? पवनो दक्षिण इत्यपेक्षते। इह पवनजातिवाचिनादिवर्तिना सर्वमेतत् वाक्यमुपक्रियत इति जात्यादिदीपकमीदृशमवसेयम्॥

## हृदयङ्गमा

तत्र जातिगतमादिदीपकमुदाहरति, पवन इति।–दक्षिणः दक्षिणदेशादागतः, पवनः मलयानिल इत्यर्थः, वीरुधां लतानां, जीर्णं शुष्कं, पर्णं पत्रं, हरति पातयति; स एव पवनः, अवनताङ्गीनां, यौवनभरेणेति भावः, नारीणामिति शेषः, मानभङ्गाय प्रणयकोपशान्तये, कल्पते प्रभवति, तस्य अतीवोद्दीपकत्वात् इति भावः। (अत्र सर्वपादादिस्थितेन पवन इति पदेन यथा पूर्वार्द्धस्यान्वयः तथा स एवेति तच्छब्दपरामर्शित पवनपदार्थेन परार्द्धस्याप्यन्वय इति जातिविषयमादिदीपक-मिदम्)॥९८॥

## प्रभा

दीपकमुदाहरति–**पवन इति**। दक्षिणः पवनो मलयानिलः। वीरुधां जीर्णं पत्रं हरति। अनेन तस्य मान्द्यं सूचितम्। स एव अत्र

तच्छब्दः पूर्ववाक्यस्थपवनशब्दपरामर्शकः स एव पवनोवनताङ्गीनां विनम्रगात्रीणाम् मानभङ्गाय कल्पते कामोद्दीपकत्वादिति भावः। अत्र पूर्ववाक्यस्थस्य पवन इति जातिवाचकपदस्य उत्तरवाक्ये स इत्यनेन परामर्शादन्वयः सुघटितो भवति इति दीपकालंकारः। शास्त्रे वायोरेकपञ्चाशव्यक्तिकथनात् तत्सामान्यवाचकः पवनशब्दो जातिवाचकः। अत एतत् जातिदीपकम्।।९८।।

## विवृति

जातिदीपकं दर्शयति–**पवन इति।** स एव इति तच्छब्दप्रयोगः पवनशब्दस्य जातिवाचिताद्योतनार्थः। कश्चित् जीर्णं पर्णं हरति, स एव तज्जातीयो मानभङ्गं करोति, इति स एव इति प्रयोगः वाक्यार्थद्वयस्य एककर्तृकताद्योतकः आदौ प्रयुक्तः।।९८।।

---

**चरन्ति चतुरम्भोधिवेलोद्यानेषु दन्तिनः।**
**चक्रवालाद्रिकुञ्जेषु कुन्दभासो गुणाश्च ते॥९९॥**

## रत्नश्री

ते तव दन्तिनो जयकुञ्जराः चतुर्णां पूर्वादीनाम् अम्भोधीनां वेलोद्यानेषु वेलायां वेलारूपाणि वा उद्यानानीति समासः। चरन्ति क्रीड़न्ति चक्रवालाद्रेर्लोकालोकाचलस्य कुञ्जेषु सिद्धाध्यासितेषु प्रदेशेषु कुन्दस्येव भासो दीप्तयो येषामिति कुन्दभासो विशदाः, तव गुणाश्च त्यागसत्यशौर्यादयः। किम्? चरन्ति श्रुतिपथमवतरन्ति उदधिवासिनामिति कश्चित् राजा स्तूयते। अत्र चरन्तीति क्रियावाची प्रथमप्रयुक्तः सर्वमेतद्वाक्यमुपकरोतीति क्रियादीपक-मेवंजातीयं विज्ञेयमिति॥

## हृदयङ्गमा

क्रियागतमादिदीपकमाह, चरन्तीति।–ते तव, दन्तिनः गजाः, चतुरम्भोधिवेलोद्यानेषु चत्वारः अम्भोधयः समुद्राः, तेषां वेलाः तटानि एव, उद्यानानि उपवनानि तेषु, कुन्दभासः कुन्दकुसुमकान्तयः, शुभ्रा इत्यर्थः, गुणाश्च शौर्यादयश्च, चक्रवालाद्रिकुञ्जेषु लोकालोकपर्व्वतकुञ्जदेशेषु, ("लोकालोक-श्चक्रवालः" इत्यमरः); चरन्ति, तव यशांसि विश्वव्यापकानीति भावः। (अत्र द्वयोरपि वाक्ययोरादिपदस्थितेन एकेन चरन्तीति क्रियापदेन चकारबलयोगात् उत्तरार्द्धवाक्यस्याप्यन्वयोपपत्तेः क्रियाविषयदीपकमिदम्)॥९९॥

## प्रभा

क्रियादीपकमुदाहरति–**चरन्तीति**। कस्यचिच्चक्रवर्तिनो नृपस्य वर्णनमेतत्। ते दन्तिनश्चतुरम्भोधिवेलोद्यानेषु चरन्ति। अनेन सार्वभौमत्वं सूचितम्। ते गुणाश्च चक्रवालाद्रिकुञ्जेषु लोकालोकपर्वतकुञ्जेषु। कुन्दभासः कुन्दकुसुमस्येव भाः कान्तिर्येषां ते तादृशा गुणाश्चरन्ति। अनेन गुणानां विश्वव्यापित्वं सूचितम्। अत्र चकारेण परामृष्टायाश्चरन्तीतिक्रियायाः पूर्ववाक्यवदुत्तरवाक्योपकारकत्वात् क्रियादीपकमेतत्। अत्र केचिद् दन्तिन इत्यस्य दिग्दन्तिन इत्यर्थं स्वीकृत्य ते इति षष्ठ्यन्तपदस्य तत्संबन्धविरहेणैवार्थं प्रदर्शयन्ति। परं राजवर्णानुगुणः प्रथमनिर्दिष्ट एवार्थ इति नो भाति।।९९।।

## विवृति

क्रियादीपकम्–**चरन्तीति**। गुणदीपकंम्–**श्यामला** इति। द्रव्यदीपकम्–**विष्णुनेति**।।९९।।

---

**श्यामलाः प्रावृषेण्याभिर्दिशो जीमूतपंक्तिभिः।**
**भुवश्च सुकुमाराभिर्नवशाद्वलराजिभिः॥१००॥**

## रत्नश्री

प्रावृषेण्याभिः वर्षासमयवर्तिनीभिः जीमूतपंक्तिभिः मेघमालाभिः दिशः श्यामलाः नीलाः वर्तन्ते। सुकुमाराभिः शाद्वलराजिभिः शष्पोद्गमैः। भुवश्च भूमयः किम्? श्यामला इत्यपेक्षते। इह श्यामला इति पूर्ववर्तिना गुणवाचिना सर्वमिदं वाक्यमुपक्रियते इति गुणादिदीपकमित्थंभूतं विभाव्यमिति॥

## हृदयङ्गमा

गुणविषयमादिदीपकमाह, श्यामला इति।–दिशः प्रावृषेण्याभिः वर्षाकालिकीभिः, जीमूतपङ्क्तिभिः मेघराजिभिः, भुवश्च भूतलानि च, सुकुमाराभिः कोमलाभिः, नवशाद्वलराजिभिः नवतृणश्रेणीभिः, श्यामलाः श्यामवर्णाः, भवन्तीति शेषः। (अत्र श्यामला इति गुणवाचकेन सर्वपादादिस्थेन उभयार्द्धयोरन्वयात् गुणविषयमादिदीपकमिदम्)॥१००॥

## प्रभा

गुणदीपकमुदाहरति–**श्यामला इति**। दिशः दश दिशः। प्रावृषेण्याभिः प्रावृट्कालसंभूताभिः। प्रावृष एण्य इति प्रावृट्शब्दाद् भवार्थे एण्यप्रत्ययः। जीमूतपङ्क्तिभिः मेघराजिभिः। श्यामलाः मलिनाः। भुवश्च सुकुमाराभिः नवशाद्वलराजिभिः कोमलनूतनतृणहरितीकृतप्रदेशैः श्यामलाः। अत्र श्यामला इति

गुणवाचकपदेन दिश इति पदस्य तथा चकारेण भुव इत्यस्य च संबन्धाद् इदं गुणदीपकम्।।१००।।

## विवृति

क्रमेण एषां उदाहरणानि–**पवन इति**। पवन इति जातिशब्दः सर्वत्र अनुषक्तो द्रष्टव्यः। **चरन्तीति**–चरन्ति इति क्रियापदं सर्वत्रानुषक्तं द्रष्टव्यम्। श्यामला इति गुणोदाहरणम्; श्यामगुणाः उभयत्र अनुषक्ताः।।१००।।

---

**विष्णुना विक्रमस्थेन दानवानां विभूतयः।**
**क्वापि नीताः कुतोऽप्यासन्नानीता देवतर्द्धयः॥१०१॥**

## रत्नश्री

विक्रमस्थेन बलिबन्धसंनद्धेन विक्रममाणेन दानवानां विभूतयः श्रियः। क्वापि क्वचित् इदन्तया अनिर्देश्ये स्थाने नीताः। [52b] नाशिता इति यावत्। देवतानामृद्धयो विभूतयः। कुतोऽपि स्थानादव्यपदेश्यात्। आनीता आसन्। अभूवन्। उत्पादिता इति यावत्। इह विष्णुना इति द्रव्यशब्दोऽयं सर्वमेतद्वाक्य-मुपजीवयतीति द्रव्यादिदीपकमेवंविधं बोद्धव्यमिति॥

कतमान्येतानि दीपकानीत्याह–

## हृदयङ्गमा

आदिद्रव्यदीपकमाह, विष्णुनेति।–विक्रमस्थेन विक्रमे पराक्रमे त्रिपादक्रमणे च, तिष्ठति इति तेन विक्रमस्थेन त्रिविक्रमेण, विष्णुना वामनरूपिणा, दानवानां बलिप्रभृतीनां, विभूतयः सम्पदः, क्वापि नीताः क्षयं प्रापिता इत्यर्थः, तथा देवतानाम् इन्द्रादीनाम्, ऋद्धयः ऐश्वर्य्याणि, कुतोऽपि आनीता आसन्। (अत्र पादादिगतेन एकव्यक्तिवाचितया विष्णुनेति द्रव्यपदेन सर्ववाक्यानामन्वयात् आदिद्रव्यदीपकमिदम्)॥१०१॥

## प्रभा

द्रव्यदीपकमाह–**विष्णुनेति।** विक्रमस्थेन त्रिपादविक्रम-माचरता त्रिविक्रमेण विष्णुना दानवानां बलिप्रभृतीनाम् विभूतयः

संपदः क्वापि नीता लयं प्रापिता इत्यर्थः। तथा देवतर्द्धय इन्द्रादीनां श्रियः कुतोपि आनीता अवितर्कितमेव संपादिता इत्यर्थः। आसन्निति शेषः। अत्र विष्णुशद्बस्य व्यक्तिवाचकतया द्रव्यत्वम्। तच्च पूर्ववाक्यस्थितं काकाक्षिन्यायेन अनुषङ्गेन वा अपरत्रान्वेति इति द्रव्यदीपकम्॥१०१॥

## विवृति

विष्णुनेति द्रव्योदाहरणम्; परवस्तुवाची विष्णुशब्दः अनुषक्तः। कुतोऽपि आनीता आसन् इति सम्बन्धः॥१०१॥

---

**इत्यादिदीपकान्युक्तान्येवं मध्यान्तयोरपि।**
**वाक्ययोर्दर्शयिष्यामः कानिचित् तानि तद्यथा॥१०२॥**

## रत्नश्री

इत्येवंरूपाणि वाक्यादौ प्रयुक्तान्यादिदीपकान्युक्तानि जात्यादिभेदेन चत्वारि वेदितव्यानि। एवमनेन प्रकारेण तानि दीपकानि का[नि]चित् कतिपयानि न सर्वाणि वाक्ययोः वाक्यद्वयस्य काव्यरूपस्य मध्येऽन्ते च दर्शयिष्याम उदाहरिष्यामः। तद् यथेति निदर्शयन्ति॥

## हृदयङ्गमा

इत्थमादिदीपकान्युक्त्वा मध्यान्तयोरपि दीपकानि वक्तुं प्रतिजानीते, इतीति।—इति उक्तप्रकारेण, आदिदीपकानि आदिपदगतानि जात्यादिदीपकानि, उक्तानि, एवम् आदिदीपकवत्, मध्यान्तयोरपि वाक्ययोः कानिचित् तानि दीपकानि, दर्शयिष्यामः। तद्यथेति वक्ष्यमाणोदाहरणार्थम्॥१०२॥

## प्रभा

उक्तानि आदिदीपकानि मध्यान्तदीपकानि दर्शयाम इति प्रतिजानीते—**इत्यादीति।** इति पूर्वोक्तप्रकारेण आदिदीपकानि उक्तानि। वाक्यान्तरसंबध्यमानजातिक्रियागुणद्रव्यवाचकानां पदानां प्रथमवाक्ये निवेशितत्वात्। एवम् अनेनैव प्रकारेण अन्यत्र परामृश्यमानजात्यादिपदनिवेशेन मध्यान्तवाक्ययोरपि कानिचित्

तानि दीपकानि दर्शयिष्यामः। तद्यथा तानि यथा। एतद्वक्ष्यमाणोदाहरणार्थम्।।१०२।।

## विवृति

इतीति। इति आदिदीपकानि जातिक्रियागुणद्रव्यवाचीनि चत्वारि दर्शितानि। मध्यदीपकत्वेन अन्तदीपकत्वेन च द्वे द्वे दर्शयिष्येते विरतरभयात्।।१०२।।

---

**नृत्यन्ति निचुलोत्सङ्गे गायन्ति च कलापिनः।**
**बध्नन्ति च पयोदेषु दृशो हर्षाश्रुगर्भिणीः॥१०३॥**

## रत्नश्री

कलापिनो मयूरा नृत्यन्ति गायन्ति च निचुलानाम् अभिनवमञ्जरीपुञ्जरञ्जितानाम् उत्सङ्गे विटपरूपे पयोदेषु जलधरोत्सवजन्महर्षाश्रु गर्भोऽन्तर्वर्ति यासां ता दृशश्चक्षूंषि बध्नन्ति नियच्छन्ति च। कलापिन इत्यपेक्षते। इह कलापिन इत्यनेन जातिवाचिना वाक्यमध्यवर्तिना सर्वमेतद्वाक्यमुपक्रियत इति जातिमध्यदीपकम् ईदृशं दृश्यमिति॥

## हृदयङ्गमा

जातिगतमध्यदीपकमाह, नृत्यन्तीति।–कलापिनः मयूराः, निचुलस्य स्थलवेतसस्य, उत्सङ्गे अधोभागे, नृत्यन्ति, गायन्ति केकाध्वनिं कुर्वन्ति, तथा पयोदेषु मेघेषु, हर्षाश्रुगर्भिणीः आनन्दवाष्पवाहिनीः, दृशः चक्षूंषि च, बन्धन्ति। (अत्र मध्यवाक्यगतेन कलापिन इति पदेन चकारबलात् वाक्यान्तरेऽपि अन्वयात् कलापिन इत्यस्य जातिवाचकत्वाच्च जातिगतमध्यदीपकमिदम्)॥१०३॥

## प्रभा

मध्यवाक्यगतं जातिदीपकमुदाहरति–**नृत्यन्तीति**। कलापिनः मयूराः। निचुलो वेतसवृक्षस्तस्य उत्सङ्गे अधोभूमौ नृत्यन्ति तथा गायन्ति केकाशब्दं कुर्वन्ति तथा पयोदेषु सजलमेघेषु हर्षाश्रुगर्भिणी आनन्दबाष्पपरिपूर्णा दृशो बन्धन्ति आसक्ताः कुर्वन्ति। अत्र

वाक्यान्तरैरन्वितं कलापिन इति जातिवाचकपदं मध्यवाक्यवर्ति इति मध्यगतं जातिदीपकम्।।१०३।।

## विवृति

**नृत्यन्तीति।** अत्र मध्यमवाक्ये कलापिनः इति जातिदीपकम्।।

जातिवाचिशब्दस्य मध्यगतस्य उदाहरणमाह–**नृत्यन्तीति।** जातिवाची कलापिशब्दः सर्वत्र अनुषक्तः। एवं गुणद्रव्यवाचिनावपि मध्यदीपकौ द्रष्टव्यौ।।१०३।।

---

**मन्दो गन्धवहः क्षारो वह्निरिन्दुश्च जायते।**
**चर्चावन्दनपातश्च शस्त्रपातः प्रवासिनाम्॥१०४॥**

## रत्नश्री

मन्दो गन्धवहो मृदुः पवनः प्रवासिनां विरहिणां क्षारो जायते, व्यथाहेतुत्वात्। इन्दुश्च वह्निः अग्निः जायते, दाहकत्वात्। चर्चारूपश्च स्थासकस्वभावः चन्दनस्य पातोऽनुलेपश्च शस्त्रपातोऽसिपातो जायते, दुःखजनकत्वात्। इह जायत इति क्रियापदेन मध्यवर्तिना सर्ववाक्योपकार इति क्रियामध्यदीपकमीदृशं वेदितव्यमिति। गुणदीपकं द्रव्यदीपकं च मध्यवर्ति नोदाहृतम्। अत एव कानिचिदित्युक्तम्। तत्तु यथा—

दहत्यपि नरेन्द्राणां मनांसि तव विक्रमः।
निर्वापयति चेतांसि सुदृशां संशयः श्रियः॥
कृतो [ज्ञान]मयः श्रीमान् प्रकाशः सर्वदर्शिना।
हतं च सर्वदिग्व्यापि दुर्जयं जगतां तमः॥

इति॥

## हृदयङ्गमा

क्रियागतमध्यदीपकमाह, मन्द इति।—मन्दः मृदुः, गन्धवहः वायुः, क्षारः क्षारवत् तीक्ष्णः इत्यर्थः, असह्यः इति भावः, इन्दुश्च वह्निः अग्निः, चर्च्चार्थं स्थासकार्थं, देहविलेपनार्थमित्यर्थः, चर्च्चा स्याच्चर्म्मुण्डायां चिन्तास्थासकयोरपि'' इति हैमः, चन्दनपातः चन्दनप्रक्षेपः, शस्त्रपातः शस्त्राघातसदृशपीड़ाकर इत्यर्थः, जायते,

प्रवासिनां विरहिणामिति सर्वत्र योज्यम्। (अत्र मध्यवाक्यगतेन जायते इति क्रियापदेन सर्ववाक्यान्वयात् क्रियागतमध्यदीपकमिदम्। गुणद्रव्यगतयोः मध्यदीपकयोः उदाहरणमिहानुक्तमपि किञ्चित् प्रदर्श्यते; तत्र गुणगतमध्यदीपकं यथा,–"तड़िद्भिर्वारिवाहाणां योगः स्त्रीभिः प्रवासिनाम्। लताभिः पादपानाञ्च समायाते घनागमे।।" अत्र योगशब्दस्य संयोगार्थत्वात् गुणत्वम्; मध्यवाक्यगतेन च तेन सर्ववाक्यान्वयात् गुणगतमध्यदीपकमिदम्। द्रव्यगतमध्यदीपकं यथा,–"मुहुर्विश्वं संसृजति बिभर्त्ति च मुहुर्हरिः। मुहुश्च नाशं नयति बालक्रीड़नकौतुकी।।" इति। अत्र एकव्यक्तिवाचिना मध्यवाक्यगतेन हरिणा इति द्रव्यपदेन सर्ववाक्यान्वयात् द्रव्यगतमध्यदीपकमिति बोध्यम्)।।१०४।।

## प्रभा

क्रियागतं मध्यदीपकमुदाहरति–**मन्दो गन्धवह इति**। प्रवासिनां विरहिपान्थानाम् मन्दः मृदुः गन्धवहः सुरभिवातः क्षारः क्षतपतितक्षारवत् क्लेशकरो जायते। इन्दुश्च वह्निः वह्निरिव संतापकरो जायते। चर्चा अङ्गचर्चनं तदर्थो यश्चन्दनः शीतलचन्दनरस इत्यर्थः। तस्य पातः संबन्धः शस्त्रपातः शस्त्रप्रहारो जायते। अत्र सर्ववाक्यान्वयिनो जायते इति क्रियापदस्य मध्यवाक्यगतत्वान् मध्यवाक्यगतं क्रियादीपकमेतत्। किं च रूपकमपि। अत उभयोः संसृष्टिसंकरः। मध्यगतं गुणद्रव्यदीपकं श्रीप्रेमचन्द्रशर्माण इत्थं दर्शयन्ति। यथा–

तडिद्भिर्वारिवाहाणां योगः स्त्रीभिः प्रवासिनाम्।
लताभिः पादपानां च समायाते घनागमे।। इति।

अत्र योगः संयोगः स च गुणः। मध्यवाक्यगतेन च सर्ववाक्यदीपनाद् गुणगतं मध्यदीपकमिदम्। तथैव–

मुहुर्विश्वं संसृजति बिभर्ति च मुहुर्हरिः।
मुहुश्च नाशं नयति बालक्रीडनकौतुकी।। इति।

अत्र हरिर्द्रव्यम्। तच्च मध्यवाक्यगतमिति मध्यगतं द्रव्यदीपकम्। इति।।१०४।।

## विवृति

(मन्दो गन्धवहः क्षारो) जायते। इन्दुश्च वह्निः जायते। चर्चाचन्दनपातश्च शस्त्रपातो जायते प्रवासिनाम्। 'जायते' इत्यनेन मध्यवर्तिना क्रियावाचिना शब्देन सर्व(म)त्र संबद्ध्यते।।

**मन्द इति।** अत्र मध्यवाक्ये जायते इति क्रियादीपकम्।।१०४।।

---

**जलं जलधरोद्गीर्णं कुलं गृहशिखण्डिनाम्।**
**चलं च तड़ितां दाम बलं कुसुमधन्वनः॥१०५॥**

## रत्नश्री

जलधरैः उद्गीर्णं विमुक्तं जलं गृहेषु शिखण्डिनां कुलं वृन्दं तड़ितां च दाम गुणः चलं सर्वमेतत् वस्तु मनोज्ञं कुसुमधन्वनः कामस्य बलम् अनीकं जगद्विजयिनः आत्मोदयानुगुणत्वात्। इह बलमात्रं जलधरोद्गीर्णजलादिभेदत्रयानुगत[मपोढप्रत्येक]विशेषं विवक्षितमिति ज़ात्यन्तदीपकमेतत्, तेन सर्ववाक्योपकारादिति॥

## हृदयङ्गमा

जातिगतमन्तदीपकमाह, जलमिति। –जलधरोद्गीर्णं जलं वृष्टिरित्यर्थः, गृहशिखण्डिनां गृहमयूराणां, कुलं तथा चलं चञ्चलं, तड़ितां दाम च एतत् त्रयं कुसुमधन्वनः कामस्य, बलं सैन्यम्, उद्दीपकत्वात् एतेषाम् इति भावः। (अत्र बलमिति जातिवाचकेन अन्तवाक्यस्थेन पदेन सर्ववाक्यसमन्वयात् जातिगतान्तदीपकमिदम्)॥१०५॥

## प्रभा

अन्त्यवाक्यगतजातिदीपकमुदाहरति–**जलमिति।** जलधरैः मेघैः उद्गीर्णं वान्तम् जलं वृष्टिजलम् गृहशिखण्डिनां प्रासादस्थितमयूराणाम् कुलं समूहः चलं चञ्चलम् तडितां विद्युताम् दाम सन्दानम् एतत् त्रयं कुसुमधन्वनो मदनस्य बलं सैन्यम्। अत्र बलमिति जातिवाचकेन अन्त्यवाक्यस्थितेन पदेन वाक्यत्रये समन्वयात् एतद् अन्त्यगतं जातिदीपकम्॥१०५॥

## विवृति

जलं जलधरोद्गीर्णं कुसुमधन्वनो बलम्। गृहशिखण्डिना(नांकुलं) यत्तदेव (द्)बलम्। चलं च तटितां दाम यत्तद्बलम्। च(ब)लमित्यनेन मध्य(अन्त)वर्तिना द्रव्यवाचिना सर्ववाक्योपकारः।।

**जलमिति।** अत्र कुसुमधन्वनः इति द्रव्यवाचकमन्तदीपकम्।।

अन्तदीपकस्य उदाहरणं दर्शयन् गुणवाचिना(?)उदाहरणमाह जलभिति। जलं कुलं दाम च कुसुमधन्वनो बलम् इत्युक्ते सिंहावलोकनन्यायेन उपकृतं द्रष्टव्यम्। द्रव्यवाचि(?)श्लोकान्तवर्ति पदं वाक्यान्तरस्य उपकारकमिति अन्तदीपकम्।।१०५।।

**त्वया कर्णोत्पलं कर्णे स्मरेणास्त्रं शरासने।**
**मयापि मरणे चेतस्त्रयमेतत् समं कृतम्॥१०६॥**

## रत्नश्री

वराङ्गि, त्वया कर्णे कर्णोत्पलम् अवतंसकुवलयं कृतं यदा तदैव स्मरेण शरासने धनुषि कृतम् अस्त्रं शरः, मया च रागवेगमूर्च्छितेन मरणे दशम्यां दशायां चेतः कृतमित्येतत्त्रयम्। त्रिभिरेभिरस्माभिरेतेषु त्रिषु समं युगपत् कृतमिति क्रियान्तदीपकमिदं कृतमित्यन्तवर्तिना क्रियावचनेन सर्ववाक्योपकृतेरिति॥

इहापि गुणद्रव्यलक्षणमन्तदीपकद्वयं न निदर्शितं तदपि यथा–

सम्भारमकसेद्बोधेस्तत्त्वज्ञानमजीजनत।

उज्जहार जगद् दुःखान्मुनीन्द्र भवतः कृपा॥

दिगन्तबद्धनिर्घोषं ममन्थ क्षीरसागरम्।

विगलन्मथनायासं लेभे लक्ष्मीमधोक्षजः॥

इति॥

## हृदयङ्गमा

क्रियागतान्तदीपकमाह, त्वयेति।–त्वया कर्णे नीलोत्पलं, स्मरेण कामेन, शरासने अस्त्रं, मयाऽपि मरणे चेतः चित्तम्, एतत् त्रयं समं युगपत्, कृतम्। मानिनीं प्रति नायकस्य उक्तिरियम्। (अत्रअन्तवाक्यस्थेन कृतमिति क्रियापदेन सर्ववाक्यसमन्वयात्

क्रियागतान्तदीपकमिदम्। गुणद्रव्यगते अन्तदीपके तु अत्राप्रदर्शितेऽपि अन्यतः समाहृत्य प्रदर्श्येते, तत्र गुणगतान्तदीपकं यथा, –"इदमुज्जृम्भते विम्बं भानोस्तापयितुं जगत्। ममैव हृदयं चण्डि! मुखञ्च तव लोहितम्।।" द्रव्यगतान्तदीपकं यथा,–"सत्यं विश्वं सन्तपति सत्यं कर्षति वै रसान्। तमांसि तु निहन्तीति प्रार्थनीयोदयो रविः।।" इति च क्रमेण अन्तगताभ्यां लोहितरविभ्यां गुणद्रव्याभ्यां सर्ववाक्यान्वयात् गुणद्रव्यगतत्वं बोध्यम्)।।१०६।।

## प्रभा

अन्त्यदीपकं क्रियागतमुदाहरति–**त्वयेति**। त्वया कर्णे नीलोत्पलम् स्मरेण शरासने अस्त्रम् मयापि मरणे चेतः चित्तम् एतत् त्रयं समं युगपत् कृतम्। मानिनीं प्रति नायकस्योक्तिरियम्। अत्र चरमवाक्यस्थेन कृतमिति क्रियावाचकेन इतरवाक्यसंबन्धात् क्रियागतमन्त्यदीपकमिदम्। गुणद्रव्यगतमन्त्यवाक्यदीपकं श्रीप्रेम-चन्द्रशर्माणो दर्शयन्ति। यथा–

इदमुज्जृम्भते बिम्बं भानोस्तापयितुं जगत्।
ममेव हृदयं चण्डि मुखं च तव लोहितम्।।

ममेव हृदयं लोहितमित्यत्र लोहितं आरक्तं अनुरक्तमित्यर्थः। अत्रान्त्यवाक्यगतं लोहितमिति गुणपदं वाक्यद्वयं दीपयति।

सत्यं विश्वं संतपति सत्यं कर्षति वै रसान्।
तमांसि तु निहन्तीति प्रार्थनीयोदयो रविः।।

अत्र रविरिति द्रव्यपदं सर्वाणि वाक्यानि दीपयति। इति द्रव्यगतमन्त्यवाक्यदीपकम्।।१०६।।

## विवृति

त्वया नीलोत्पलं कर्णे कृतं स्मरेणास्त्रं शरासने कृतं मयाऽपि मरणे चेतः कृतम्। कृतमित्यनेन क्रियावाचिनान्त्य(न्त)वर्तिना सर्ववाक्योपकारक(रः। कृतं) इत्यन्तं (न्ते) क्रियापदम्।।

**त्वयेति।** अत्र कृतं इति अन्ते क्रियादीपकम्। त्रयमेतत् समं समकालं कृतं इति चित्रहेत्वलङ्कारो द्रष्टव्यः (?)।।

**त्वयेति।** एतत् कृतम् इति श्लोकान्तवर्ति क्रियावाचिपदं वाक्यान्तरेण सम्बद्धं सत् तत्तदर्थं द्योतयतीति अन्तदीपकम्। इदं सिद्धक्रियादीपकम्; पूर्वं तु साध्यक्रियादीपकम्।।१०६।।

---

**शुक्लः श्वेतार्चिषो वृद्ध्यै पक्षः पञ्चशरस्य सः।**
**स च रागस्य रागोऽपि यूनां रत्युत्सवश्रियः॥१०७॥**

## रत्नश्री

शुक्लः पक्षः श्वेतार्चिषः चन्द्रस्य वृद्ध्यै उपचयार्थं प्रवर्तते। स श्वेतार्चिः पञ्चशरस्य वृद्ध्यै। स पञ्चशरो यूनां रागस्य वृद्ध्यै। रागोऽप्यसौ रत्युत्सवश्रियो वृद्ध्यै कल्पते। रतिः सम्भोग एवोत्सवः प्रीतिलक्षणत्वात्। तस्य श्रीः उत्कर्षः स एव वा श्रीः विभूतिरूपत्वात् इति योज्यम्॥

किमिदं दीपकमित्याह–

## हृदयङ्गमा

अथ मालादीपकमाह, शुक्ल इत्यादि। –शुक्लः पक्षः श्वेतार्चिषः श्वेतकिरणस्य चन्द्रस्य, वृद्धौ भवति, सः पक्षः, पञ्चशरस्य कामस्य, वृद्धौ, स च कामः, रागस्य अनुरागस्य, वृद्धौ, रागोऽपि यूनां तरुणानां; रत्युत्सवे श्रियः वृद्धै॥१०७॥

## प्रभा

मालादीपकमुदाहरति–**शुक्ल इति**। शुक्लः पक्षः मासस्य प्रथमः पक्षः श्वेतार्चिषः चन्द्रस्य वृद्ध्यै परिपोषाय भवति। सः श्वेतार्चिः पञ्चशरस्य मदनस्य वृद्ध्यै भवति। स च पञ्चशरो रागस्य अनुरागस्य वृद्ध्यै भवति। रागोपि यूनां तरुणानाम् रत्युत्सवश्रियो विलासोत्सवलक्ष्म्या वृद्ध्यै भवति॥१०७॥

## विवृति

शुक्लः श्वेतार्चिषो वृद्ध्यै पक्षः शुक्लः पक्षः श्वेतार्चिषश्चन्द्रः (स्य वृद्ध्यै)। स च शुक्लार्चिः पञ्चशरस्य वृद्ध्यै। स च रागस्य पञ्चशरो रागस्य वृद्ध्यै। रागोऽपि यूनां रत्युत्सवश्रियः। इदं तावदादिदीपकम्। आदौ पादे व्यवस्थितेन वृद्धिशब्देन क्रियावाचिना सर्वत्राभिसम्बन्धात् तथाऽपि आदिदीपकत्वेऽपि पूर्वपूर्वव्यपेक्षिणी पूर्वपूर्वं व्यपेक्षत इत्येवंशीला वाक्यमाला प्रयुक्ता यूनां रत्युत्सवश्री रागमपेक्षते। रागोऽपि पञ्चशरम्। सोऽपि चन्द्रमसम्। स तं (च) शुक्लं पक्षमिति हेतोर्मालादीपकमुच्यते।।

**शुक्ल इति।** अत्र वृद्ध्यै इति पदं क्रियावाचि। मालादीपकम्।।१०७।।

---

**इत्यादिदीपकत्वेऽपि पूर्वपूर्वव्यपेक्षिणी।**
**वाक्यमाला प्रयुक्तेति तन्मालादीपकं मतम्॥१०८॥**

---

## रत्नश्री

इत्येवंविधं यत्तन्मालादीपकं मतम् इष्टम्। ननु क्रियादिदीपकमेतद् वृद्ध्यै इति क्रियावाचिनादिवर्तिना सर्ववाक्योपकारादित्याह- आदिदीपकत्वेऽपीति। यद्यप्यादिदीपक-मेतत्तथापि विशेषापेक्षया मालादीपकमुच्यते। कः पुनरसौ विशेषः येनैवं व्यपदिश्यत इत्याह-पूर्वेत्यादि। वाक्यानां श्वेतार्चिषो वृद्ध्यै शुक्लः पक्षो भवति, स च पञ्चशरस्य वृद्ध्यै भवतीत्येवमादीनां माला पंक्तिः पूर्वं पूर्वं यथोक्तेन विधिना अपेक्षमाणा प्रयुक्तेति। अयमत्र विशेषोऽपेक्षितः। तस्मान्मालादीपकमीदृशमाख्यायते, नादिदीपकमिति॥

## हृदयङ्गमा

इति अत्र, आदिदीपकत्वेऽपि आदिवाक्यस्थेन शुक्लः पक्षः इति जातिगुणवाचकेन सर्ववाक्यान्वयेऽपीत्यर्थः, पूर्वपूर्वव्यपेक्षिणी पूर्वपूर्ववाक्यमपेक्षमाणा, वाक्यमाला वाक्यसमूहः, प्रयुक्ता इति वैचित्र्यातिशयात् इति भावः, तत् मालादीपकं मतम्। तथा च जात्यादीनां पूर्वपूर्वसापेक्षोत्तरोत्तरवाक्यगतत्वे मालादीपकमिति तात्पर्य्यम्। (अन्ये तु एकस्यां क्रियांया रूपान्तरेणान्वये मालादीपकमाहुः। उक्तञ्च अलङ्कारकौस्तुभे,-"माला तु पूर्वपूर्वे विध्यन्तरेणोत्तरान्वयिनि।" उदाहृतञ्च तत्र,-"लावण्येन भवत्कलेवरमिदं तेनोत्कटं यौवनं तेनासौ सुतनु! प्रसूनविशिखस्तेन द्रुतं कार्म्मुकम्। तेन प्रापि पुनः शिलीमुखगणस्तेनापि मन्मानसं

तेनोत्तापभयप्रमाथदलनभ्रान्तिप्रमोहोदयः।। इति। अत्र प्रापीति क्रियायां पूर्वं कर्म्मीभूतस्य पश्चात् तत्रैव कर्त्तृत्वमित्यादिरीत्या मालात्वम्'' इति। प्रकाशकृता तु, –''सङ्ग्रामाङ्गनमागतेन भवता चापे समारोपिते'' इत्यादौ क्रियापदस्य भिन्नवाक्यगतत्वेऽपि मालादीपकं स्वीकृतम्)।।१०८।।

## प्रभा

उदाहरणं विशदयति–**इतीति।** इति एवम्। आदिदीपकत्वेपि वृद्ध्यै इति सर्ववाक्यानुषक्तपदस्य प्रथमवाक्यस्थितत्वेन आदिदीपकसद्भावेपि पूर्वपूर्वव्यपेक्षिणी स्वोपकारकत्वेन पूर्वपूर्ववाक्यमपेक्षमाणा वाक्यमाला उत्तरीयो वाक्यसमूहः प्रयुक्ता ग्रथित इति एवं मालावैचित्र्यानुगतत्वाद् इदं मालादीपकं मतम्। शिष्टानामिति भावः। तथा च पूर्ववाक्यसापेक्षोत्तरवाक्येषु जात्याद्यन्यतमपदानुषङ्गो मालादीपकम् इति फलितम्। इदं सर्ववाक्येष्वनुषज्यमानं सापेक्षवाक्यस्थमेवेति नाग्रहः। अत एव प्रकाशकारेण मालादीपकस्य–

संग्रामाङ्गणमागतेन भवता चापे समारोपिते
देवाकर्णय येन येन सहसा यद्यत् समासादितम्।
कोदण्डेन शराः शरैररिशिरस्तेनापि भूमण्डलं
तेन त्वं भवता च कीर्तिरतुला कीर्त्या च लोकत्रयम्।।

इति निरपेक्षवाक्यगतेनापि आसादितम् इति क्रियावाचकेन सर्वेषां वाक्यानां दीपनान् मालादीपकोदाहरणं दत्तम्। भोजस्तु अत्र भावलक्षणाक्षिप्तस्य भावविशेषस्य द्वितीयपादे यत् संक्षेपेणाभिधानं

तदेतत् चक्रवालाद्रिणेव मालादीपकेन विस्तारवता वेष्टितमितीदं चक्रवालं नाम दीपकस्य भेद इत्याह।।१०८।।

## विवृति

मालादीपकमाह–**शुक्लः इति**। शुक्लः पक्षः चन्द्रस्य वृद्ध्यै भवति। स चन्द्रः पञ्चशरस्य वृद्ध्यै भवति। स पञ्चशरः रागस्य वृद्ध्यै। स रागः रत्युत्सवश्रियः वृद्ध्यै। इतीति–इति उक्तप्रकारेण श्लोकस्य आद्यंशगतेन वृद्ध्यै–शब्देन वाक्यमाला पूर्वपूर्वापेक्षया प्रयुक्तेति मालादीपकम्।।१०८।।

---

**अवलेपमनङ्गस्य वर्धयन्ति बलाहकाः।
कर्शयन्ति तु घर्मस्य मारुतोद्धूतशीकराः॥१०९॥**

## रत्नश्री

अनङ्गस्य अवलेपं दर्पं वर्धयन्ति उपचिन्वन्ति बलाहकाः। मारुतोद्धूतशीकराः [53b] मारुतैरुद्धूता विकीर्णाः शीकरा जलकणा येषां येरिति वा विग्रहः। घर्मस्य तु निदाघस्य पुनः अवलेपं कर्षयन्ति कृ[शं कुर्व]न्ति इति॥

## हृदयङ्गमा

विरुद्धार्थदीपकं निरूपयति, अवलेपमिति।–बालाहकाः मेघाः, मारुतैः वायुभिः, उद्धूतः प्रेरितः, शीकरः जलबिन्दुर्यत्र तथाभूताः सन्तः, उभयत्रापि हेतुभूता इति भावः, अनङ्गस्य कामस्य, अवलेपं वर्द्धयन्ति, घर्मस्य ग्रीष्मस्य तु, अवलेपं कर्शयन्ति ग्रीष्मं कृशीकुर्वन्तीत्यर्थः॥१०९॥

## प्रभा

विरुद्धार्थदीपकमुदाहरति–**अवलेपेति**। बलाहकाः मेघाः अनङ्गस्य अवलेपं दर्पम् वर्धयन्ति मारुतोद्धूतशीकराः वायूत्क्षिप्तजलकणाः। बलाहकविशेषणमेतत्। घर्मस्य ग्रीष्मस्य अवलेपं कर्शयन्ति कृशं कुर्वन्ति। अत्र हेतुर्मारुतोद्धूतशीकरा इति॥१०९॥

## विवृति

अवलेपं दर्पमनङ्गस्य वर्धयन्ति वलाहकाः मेघाः कथ(क्रश)यन्ति दर्पमदस्य (धर्मस्य) ग्रीष्मस्य स्वेदस्य वावलेपं मारुतेनोद्धूता शिरो (:शीकरा) येषां ते तथाविधाः वलाहकाः।। स्वयमेतव्द्याचष्टे। अवलेपपदेनात्र वलाहकपदेन (च)क्रिया(ये)विरुद्धे संयुक्ते। अवलेपपदेनादौ व्यवस्थितेन यद्यप्यखिलवाक्योपकारः वलाकपदेन च मध्ये व्यवस्थितेन सर्वं वाक्यमुपकृतम्। तथाऽपि क्रिये विरुद्धे विरुद्धार्थाभिधायके संयुक्ते वर्धनकर्शनलक्षणे। ततो विरुद्धार्थदीपनात् विरुद्धार्थदीपकम्।।१०९।।

---

**अवलेपपदेनात्र बलाहकपदेन च।**
**क्रिये विरुद्धे संयुक्ते तद्विरुद्धार्थदीपकम्॥११०॥**

## रत्नश्री

अवलेपपदेन व्याप्यभूतेन बलाहकपदेन कर्तृवाचिना सह विरुद्धे परस्परव्याहते क्रिये वर्द्धनकर्षणे संप्रयुक्ते सम्बद्धे अवलेपविषयत्वात्। बलाहककर्तृकत्वाच्च भवतः यतः तत्तस्मात् विरुद्धार्थदीपकमीदृशमिदम्। यद्वेदृशं तद् विरुद्धार्थदीपकमिति योज्यम्॥

## हृदयङ्गमा

अत्र अवलेपपदेन वलाहकपदेन च वर्द्धनकर्शनरूपक्रिययोः कर्मभूतेन कर्त्तृभूतेन च इत्यर्थः, विरुद्धे वर्द्धनकर्शनरूपे क्रिये, संयुक्ते कर्म्मतया कर्त्तृतया च अन्विते, तत् तस्मात्, विरुद्धार्थदीपकमिदम्। (अत्र वर्द्धनह्रासरूपविरुद्धक्रियाद्वयस्यापि एकस्मिन् कर्त्तरि बलाहके कर्म्मणि चावलेपे सम्बन्धात् वैचित्र्यातिशयजनकत्वेन तथाविधवर्णनादयमलङ्कारः। विरोधप्रशमनञ्च अनङ्गधर्म्मरूपसम्बन्धिभेदात् सम्भवतीत्यवधेयम्। एतच्च आदिवाक्यगतेन कर्म्मणा कर्त्ता च उत्तरवाक्यान्वयात् आदिदीपकमपि, ततश्च बलाहकस्य जातिवाचकत्वात् अवलेपस्य च गुणवाचित्वात् आदिगतजातिदीपकगुणदीपकयोः सङ्कर इति ध्येयम्)॥११०॥

## प्रभा

उदाहरणं व्याख्याति–**अवलेपेति।** अत्र अस्मिन्नुदाहरणे अवलेपपदेन कर्मभूतेन बलाहकपदेन कर्तृभूतेन च विरुद्धक्रिये वर्धनकृशीकरणरूपे सयुक्ते सामानाधिकरण्यं प्रापिते। एवं च विरुद्धक्रिययोर्वर्धनकृशीकरणरूपयोरपि एकस्मिन् कर्तरि कर्मणि च संबन्धेन वैचित्र्यविशेषाद् विरुद्धदीपकमिदम्। एतच्च आदिवाक्यस्थावलेपबलाहकपदाभ्याम् उत्तरवाक्यसमन्वयाद् आदिदीपकम्। तथैव च अवलेपम् इति गुणवाचकं बलाहक इति जातिवाचकम् इति गुणजातिगतयोस्तयोः संकरः।।११०।।

## विवृति

**अवलेपमिति।** वलाहकशब्दो जातिवाची। अवलेपशब्दो गुणवाची। एते द्वे पदे आदिवाक्यगते वर्धयन्ति कर्शयन्ति इति विरुद्धक्रियासम्बद्धे इति विरुद्धार्थदीपकम्।।११०।।

---

**हरत्याभोगमाशानां गृह्णाति ज्योतिषां गणम्।**
**आदत्ते चाद्य मे प्राणानसौ जलधरावली॥१११॥**

---

## रत्नश्री

आशानां दिशाम् आभोगं विस्तारं हरति गृह्णाति। ज्योतिषां नक्षत्राणां ... हरति। योऽहमेवं विरहविधुरः, तस्य मे मम प्राणान् आदत्ते गृह्णाति। असौ इयं जलधरावली मेघपंक्तिरिति।।

तद् विवृणोति–

## हृदयङ्गमा

एकार्थदीपकमुदाहरति, हरतीत्यादि।–असौ जलधरावली आशानां दिशाम्, आभोगं विस्तारं, हरति, ज्योतिषां गणं ग्रहनक्षत्रात्मकज्योतिर्मण्डलं, गृह्णाति, अद्य मे मम, प्राणांश्च आदत्ते।।१११।।

## प्रभा

एकार्थदीपकमुदाहरति–**हरतीति।** असौ जलधरावली मेघपङ्क्तिः आशानां दिशाम् आभोगं विस्तारम् हरति। ज्योतिषां नक्षत्राणाम्। गणं समूहम् गृह्णाति स्वस्मिन् निगूहति मे प्राणांश्च आदत्ते हरति।।१११।।

## विवृति

इदं हरति निरस्यत्याभोगं विस्तारमाशानाम्। गृह्णाति ज्योतिषां नक्षत्रतारकादित्यचन्द्र(द्रा?)वकीर्णकानां गणमाच्छादयति। आदत्ते

चाद्य मे मम प्राणानाक्षिपत्यसौ जलधरावली। स्वयं व्याचष्टे। अनेकशब्दोपादानात् क्रियैकैवात्र दीप्यते। हरति गृह्णत्यादत्ते इत्यनेकशब्दोपादानं तस्मादेकैव क्रियाऽभिन्नार्था जलघरावल्या अन्तस्थितया दीप्यते यतस्तस्मादेकार्थदींपकमेतत्।।

**हरतीति**। हरत्याद्यनेकक्रियापदोपात्ता एकक्रिया जलघरावल्या अन्तवाक्यगतया दीप्यते यत् तस्मादेकार्थदीपकम्।।१११।।

---

**अनेकशब्दोपादानात् क्रियैकैवात्र दीप्यते।**
**यतो जलधरावल्या तस्मादेकार्थदीपकम्॥११२॥**

## रत्नश्री

अनेकस्य हरत्यादेः शब्दस्य क्रियापदस्य पर्यायरूपस्य उपादानात् प्रयोगेण एकैवापघातलक्षणा क्रिया दीप्यते उपक्रियते जलधरावल्या कर्तृभूतया यतः तस्मादेकार्थदीपकमीदृशमवसेयमिति॥

## हृदयङ्गमा

अत्र अनेकेषां शब्दानां हरति गृह्णाति आदत्ते इति क्रियावाचकानाम्, उपादानात् उपस्थापनात्, अपिरत्र ऊहनीयः ; यतः जलधरावल्या एका एव क्रिया एकार्थकत्वात् त्रयाणामेव क्रियावाचकपदानामिति भावः, दीप्यते, तस्मात् एकार्थदीपकमिदम् ॥११२॥

## प्रभा

उदाहरणं विशदयति–**अनेकेति।** अत्र अस्मिन्नुदाहरणे । यतो जलधरावल्या अन्त्यवाक्यगतेन तत्पदेन एकैव क्रिया अदर्शनरूपा। अनेकशब्दोपादानाद् अनेकाः बहवः ये शब्दा हरणग्रहणादानरूपाः क्रियावाचकास्तेषां उपादानात् स्वीकारात्। हेत्वर्थे पञ्चमी। दीप्यते निर्व्यूढान्वयेनोज्ज्वलीक्रियते। तस्माद् अनेकपदप्रतिपाद्यस्य एकार्थस्य दीपनादेकार्थदीपकमिदम्। विभिन्नक्रियाणामेककारक-संबन्धरूपं नवीनैरङ्गीकृतं कारकदीपकम् अस्माद्भिन्नमेव। एकार्थनेकक्रियाभावात्। कारकदीपकं प्रकाशे दर्शितं यथा–

स्विद्यति कूणति वेल्लति विचलति
निमिषति विलोकयति तिर्यक्।
अन्तर्नन्दति चुम्बितुमिच्छति नवपरिणया
वधूः शयने।। (६४१ पत्रे) इति।।११२।।

## विवृति

**अनेकेति।** अत्र अस्मिन्नुदाहरणे जलधरावल्या हरति गृह्णाति आदत्ते इति त्रिभिः पदैः एकैव अदर्शनक्रिया दीपिता भवति। तस्मात् एकार्थदीपकम्।।११२।।

---

**हृद्यगन्धवहास्तुङ्गास्तमालश्यामलत्विषः।**
**दिवि भ्रमन्ति जीमूता भुवि चैते मतङ्गजाः॥११३॥**

---

## रत्नश्री

जीमूता मेघाः दिवि नभसि भ्रमन्ति अमी। मतङ्गजा हस्तिनश्च एते भुवि भ्रमन्ति। हृद्यो मनोहरो गन्धवहः पवनो येषाम् जीमूतानां ते, तथा हृद्यं गन्धं मदमयं वहन्ति क्षिपन्ति समन्तादिति हृद्यगन्धवहाः मतङ्गजा इति शब्दश्लेषः। हृद्यो वा मदमिश्रः गन्धवहः पवनो येषामित्यर्थश्लेषः। तुङ्गा महान्तः तमालवत् श्यामला नीला [त्विट् कान्तिर्येषां ते।] उभयेऽपीत्यर्थश्लेषः॥

तद् विभजते–

## हृदयङ्गमा

शिलष्टार्थदीपकमुदाहरति, हृ[illegible]त्यादिद्वाभ्याम्।–हृद्यः शीतलत्वात् मनोरमः, गन्धवहो येषु ते, इति जीमूतविशेषणम्; हृद्यं गन्धं मदजनितं वहन्तीति तथोक्ता इति मतङ्गजविशेषणम्; हृद्यगन्धवहाः, तमालवत् श्यामलाः त्विषः कान्तयः येषां तादृशाः, तुङ्गाः अत्युन्नताः, जीमूताः मेघाः, दिवि आकाशे, एते मतङ्गजाश्च करिणश्च, भुवि भ्रमन्ति॥११३॥

## प्रभा

शिलष्टार्थदीपकमाह–**हृद्येति**। हृद्यः निदाघसंतापदूरीकरणेन मनोरमः गन्धवहः वायुर्यत्र इति जीमूतपक्षे। हृद्यः घ्राणातर्पकः गन्धः दानोदकगन्धः तं बहन्ति धारयन्ति इति हृद्यगन्धवहा गजाः।

तुङ्गाः उच्चाः। तमालानामिव श्यामला मलिना त्विड् येषां ते तमालश्यामलत्विषः। उभयत्र समानम्। एतादृशा जीमूता मेघाः दिवि आकाशे भ्रमन्ति पर्यटन्ति। भुवि च एते मतङ्गजाः दन्तिनः।।११३।।

## विवृति

हृद्यो गन्धवहो वायुर्येषां ते हृद्यगन्धवहाः जीमूता मेघाः तथा तमालश्यामलत्विषः तमालतरुदलवत् कालाः दिवि व्योम्नि भ्रमन्ति भुवि चैते मतङ्गजाः किंभूता हृद्यं गन्धं वहन्तीति हृद्यगन्धवहाः सुगन्धिदानप्रवहाः तुङ्गाः महान्तः कृष्णाः गजाः भ्रमन्तीति।।११३।।

---

**अत्र धर्मैरभिन्नानामभ्राणां दन्तिनां तथा।
भ्रमेणैकेन सम्बन्ध इति श्लिष्टार्थदीपकम्॥११४॥**

---

## रत्नश्री

अत्र प्रयोगे धर्मैर्हृद्यगन्धवहत्वादिभिः गुणैरभिन्नानां समानामभ्राणां हस्तिनां च भ्रमेणैव एकेन कर्मणा दीपकेन सम्बन्धः साध्यसाधनलक्षणः प्रतीयत इति हेतोः श्लिष्टार्थदीपकमीदृशम्, श्लेषानुगतत्वात् इति॥

[54a]अनुक्तान् दीपकविकल्पान् अतिदिशन्निगमयति—

## हृदयङ्गमा

अत्र धर्मैः साधारणैः हृद्यगन्धवहत्वादिभिः, अभिन्नानां हृद्यगन्धवहादिपदानां श्लिष्टत्वेन उभयत्र योजनादेकधर्म्मवता-मित्यर्थः, अभ्राणां तथा दन्तिनां भ्रमणेनैव एकया भ्रमणक्रियया एव, वाक्यद्वये सम्बन्ध इति श्लिष्टार्थदीपकं श्लिष्टशब्दप्रतिपाद्यत्वात् इति भावः॥११४॥

## प्रभा

उदाहरणं विवृणुते—**अत्रेति।** धर्मैर्हृद्यगन्धवहत्वादि-धर्मैरभिन्नानाम् एकशब्दप्रतिपाद्यत्वेन भेदशून्यानाम्। तत्र प्रथमविशेषणे एकशब्दप्रतिपाद्यत्वम् उत्तरत्र एकार्थत्वमिति ज्ञेयम्। अभ्राणां तथा दन्तिनां भ्रमणेनैव भ्रमन्ति इति क्रिययैव संबन्धो वाक्यद्वये तस्या एव संबन्धाद् इति श्लिष्टशब्दप्रतिपाद्य-साधारणधर्मवतोर्जीमूतमतङ्गजयोः कर्त्रोर्भ्रमन्तीति क्रिमया दीपनाद्

इदं श्लिष्टार्थदीपकम्। तत्र हृद्यगन्धवहा इत्यत्र शब्दश्लेषः, अपरत्रार्थश्लेषः।।११४।।

## विवृति

मध्यवर्तिक्रियया यद्यपि सकलवाक्योपकारस्तथाऽपि धर्मैर्हृद्यगन्धवहा (हत्वा) दिति (भिर) भिन्नानां सदृशानामभ्राणां घनानां हस्तिनां च भ्रमणेनैव सम्बन्ध इति हेतोः श्लिष्टार्थदीपकम्

**हृद्येति।** हृद्यगन्धवहत्वं तुङ्गत्वं तमालश्यामलकान्तित्वं च श्लेषानुबद्धम्। भ्रमन्तीति क्रियापदमादिवाक्यगतं वाक्यान्तरमपि दीपयति। इति श्लिष्टार्थदीपकम।।

**हृद्येति।** हृद्यगन्धवहाः इत्यादि उभयत्र तुल्यम्। एते जीमूताः दिवि भ्रमन्ति। तस्मात्(?)मतङ्गजाश्च भुवि भ्रमन्ति। उभयश्लेषचुक्तत्वात् श्लिष्टार्थदीपकम्।।११४।।

---

**अनेनैव प्रकारेण शेषाणामपि दीपके।**
**विकल्पानामनुगतिर्विधातव्या विचक्षणैः॥११५॥**

## रत्नश्री

अनेनव अनन्तरोक्तेन प्रकारेण विधिना दीपके द्वीपकविषयाणां शेषाणामनुक्तानामपि विकल्पानां भेदानामनुगतिरवबोधः। विधातव्या क्रियतां विचक्षणैः कविभिरिति॥ सा चानुगतिरेवं विधातव्या–

अधरस्तव तन्वङ्गि! रागः साक्षादिवेक्ष्यते।
हृदयं रञ्जयत्येष प्राणान् हरति यन्मम॥ उपमादीपकम्।
हरन्ति हरिणाक्षीणां दृष्टयो रागलालसाः।
वदन्तीव जनान्मुक्तेरायता वयमर्गलाः॥ उत्प्रेक्षादीपकम्।
न खड्गधारा निशिता निशाता नापि सायकाः।
हरन्ति [च] मम प्राणान् मृगाक्षि तव विभ्रमाः॥ आक्षेपदीपकम्। एवमन्येऽपि दीपकविकल्पा अनुगन्तव्या इति॥

॥ इति दीपकचक्रम् ॥

आवृत्तिमधिकृत्याह–

## हृदयङ्गमा

दीपकमुपमंहरति, अनेनेति।–अनेन एव प्रकारेण वैचित्नाविशेषवशेन, दीपके शेषाणाम् उक्तावशिष्टानामपि, विकल्पानां भेदानाम्, अवगतिः ज्ञानं, विचक्षणैः सुधीरैः, विधातव्या॥११५॥

## प्रभा

दीपकमुपसंहरति–**अनेनेति**। अनेनैव प्रकारेण एकत्रान्वितेन पदस्य वाक्यान्तरसमन्वयरूपवैचित्र्यमुपजीव्य विविधदर्शित-रचनावैचित्र्येण शेषाणामपि उक्तेष्वशिष्टानाम् विकल्पानां प्रकाराणाम् आवलिसंपुटप्रभृतीनाम् अवगतिर्यथायथं निवेशो विधातव्या कर्तव्यः। तथा चोक्तं भोजराजेन–

अर्थावृत्तिः पदावृत्तिरुभयावृत्तिरावली।
संपुटं रसना माला चक्रवालं च तद्भिदाः।। इति।

तत्र अर्थावृत्तिः पदावृत्तिरुभयावृत्तिरित्येतानि आचार्यदण्डिना आवृत्त्यलंकारनाम्ना अग्रे एव दर्शितानि। तत आवली यथा–

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवह-
स्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च।
परिच्छिन्नामेवं त्वयि परिणतां बिभ्रति गिरं
न विद्मस्तत् तत्त्वं वयमिह हि यत् त्वं न भवसि।। इति।।

संपुटं यथा–

नवपल्लवेषु लोलति घूर्णति विटपेषु चलति शिखरेषु।
स्थापयति स्तबकेषु चरणे वसन्तलक्ष्मीरशोकस्य।। इति।

अत्र अशोकस्य नवपल्लवेषु वसन्तलक्ष्मीर्लोलति। अशोकस्य विटपेषु वसन्तलक्ष्मीर्घूर्णते। अशोकस्य शिखरेषु वसन्तलक्ष्मीश्चलति। अशोकस्य स्तबकेंषु वसन्तलक्ष्मीश्चरणे स्थापयति। इति संपुटक्रमेण मिथो वसन्तलक्ष्मीरशोक इति पदे द्रव्यवाचिनी संबध्यमाने मिथः संबद्ध एव दीपयतः। तदेतत् संपुटं

नाम दीपकम्। रसनादीपकं मालादीपकं प्रायः समानमेव। तच्च मूले दर्शितेन मालादीपकेन ज्ञातप्रायमिति न पुनरुदाहरणेन दर्शयामः। चक्रवालमपि न तथा मनोहारि। तत्स्वरूपं प्राक् दर्शितमेव। इति दीपकचक्रं दीपकसंघः।।११५।।

## विवृति

अनेनैव विधानेन श्ले(शे)षाणामनुक्तानामपि दीपकेऽलङ्कारे विकल्पानामनुगतिर्विधातव्या विचक्षणैः।।

अनेनेति। जातिक्रिययोः दीपकत्वं गुणद्रव्ययोः दीपकत्वं इत्यादयो दीपकभेदाः द्रष्टव्याः।।

अनेनेति। अनुक्तानामपि दीपकप्रकाराणां अनुगतिः अव(?)गमः अनेनैव प्रकारेण प्राज्ञैः कर्तव्या। एवेति अवधारणस्य प्रकारान्तरमुपायभूतं नास्ति इत्यर्थः।।११५।।

---

**अर्थावृत्तिः पदावृत्तिरुभयावृत्तिरेव च।**
**दीपकस्थान एवेष्टमलङ्कारत्रयं यथा॥११६॥**

## रत्नश्री

अर्थस्य अभिधेयस्य आवृत्तिः पुनः पुनरुद्भावनम्। पदस्य शब्दस्य आवृत्तिः भूयः समुच्चारणम्। उभयस्यार्थस्य पदस्य चावृत्तिरप्यावृत्तिश्चेति। एवंलक्षणम् अलङ्कारत्रयम् आवृत्तिविशेषात्मकमिष्टं दीपकस्य स्थाने विषय एव नान्यत्र। दीपकेनापि तादृशार्थप्रतीतिसम्भवात् नार्थतः तयोः भेद इति दीपकस्थान एवेष्टमित्युक्तम्। अन्ये त्वेकत्र दीपकस्थान इति विशेषेण व्याचक्षते तदसारम्। एवं हि अर्थावृत्तिरेव दीपकस्थाने स्यात्, न शेषमावृत्तिद्वयम्। आवृत्तित्रयमपि च दीपकस्थान इत्युक्तं शास्त्रकृता दीपकस्थान एवेष्टमलंङ्कारत्रयमिति साक्षादमिधानात्। ततः शास्त्रविरुद्धमेव व्याख्यानम्। तस्माद्दीपकावृत्त्योः समानो विषयः, उभयथापि तदर्थावगमसम्भवात्। प्रयोगतस्त्वनयोर्भेदः। न चैवमवगन्तव्यम्-यदि सोऽर्थो दीपकेनापि गम्यते किमनयेति दीपकसमानत्वादस्य पर्यनुयोगस्य। दीपकवच्चास्यापि शिष्टैरिष्टत्वात् कथमियमतिरिच्यते? तेषां सर्वथेह प्रमाणत्वात्। कथं न दिष्टातिक्रमः? तस्मात् अर्थाभेदेऽपि दीपकवदियमप्यनुगम्यते, द्वयोरप्यलङ्कारतयेष्टत्वात्। अत एवोक्तम-दीपकस्थान एवेष्टमिति। शिष्टैरितिगम्यते। तस्मादभिन्नस्थानत्वेऽपि प्रयोगभेदा[54b]दुभयमपीष्टं शिष्टैरित्यलमतिविमर्देन इति॥

## हृदयङ्गमा

अथ आवृत्तिं निरूपयति, अर्थावृत्तिरिति। –दीपकस्थाने दीपकस्य सम्भवे एव, अर्थावृत्तिः अर्थस्य एकस्य वाक्यार्थस्य, आवृत्तिः वाक्यान्तरे पुनरुपस्थितिः, पदावृत्तिः वाक्यान्तरीयपदस्य वाक्यान्तरे पुनरुपस्थितिः, च तथा, उभयावृत्तिरेव वाक्यार्थस्य पदस्य च वाक्यान्तरे पुनरुपस्थितिरेव, अलङ्कारत्रयम् इष्टं, कविभिरिति शेषः ; वाक्यान्तरे तत्पदस्यानुपादानेऽपि वाक्यान्तरीयपदस्य अनुषङ्गादिना अन्वयनिर्वाहात् दीपकं सम्भवति, तथा तत्रैव तदर्थकपदान्तरस्य तत्पदस्यैव वा समुपादाने अयमावृत्त्यलङ्कारः इति। (भोजराजेन तु आवृत्तित्रयं दीपकस्यैव भेद इत्युक्तम्। यथा दीपकनिरूपणे,–"अर्थावृत्तिः पदावृत्तिरुभया-वृत्तिरावली। सम्पुटं रसना माला चक्रवालञ्च तद्विदाः।।" इति)।।११६।।

## प्रभा

दीपकनिरूपणान्तरं तत्सजातीयमावृत्त्यलंकारं लक्षयति– **अर्थावृत्तिरिति।** दीपकस्थाने दीपकप्रसङ्गे अर्थावृत्तिः पदावृत्तिः उभयावृत्तिः इति एतत्संज्ञकम् अलंकारत्रयम् इष्टम्। कविभिरिति शेषः। यथेति उदाहरणप्रदर्शनाय। अर्थावृत्तिर्नाम एकस्य वाक्यार्थस्य पुनः वाक्यान्तरेणोपस्थापनम्। पदावृत्तिरेकस्मिन् वाक्ये स्थितानां पदानां पुनर्वाक्यान्तरे तेन रूपेणोत्थितिः। उभयावृत्ति-र्वाक्यार्थपदयोरेकतरस्मिन् वाक्ये निर्दिष्टयोः पुनरन्यत्रोभ-योरुत्थितिः। दीपके वाक्यान्तरे अपेक्षितपदस्यानुपादानेन पूर्ववाक्यस्थपदस्यानुषङ्गेणान्वयनिर्वाहः। अत्र तु तादृशवाक्ये

तत्तत्पदस्यार्थस्य वा पुनरुपादाने आवृत्तिरलंकार इति युक्तमेवोक्तं दीपकस्थानत्वम्। अस्य दीपकस्थाने एव इष्टमिति। एतेन पदावृत्तिरूपस्यास्य अलंकारस्य यमकादौ अतिप्रसङ्गो निराकृतः। यमके हि द्वितीयपदानुपादाने अन्यवाक्यीयपदसंबन्धस्य अनुपपन्नत्वेन विवक्षितार्थानुपपत्तिः। यत्र पूर्ववाक्यीयपदस्यानुषङ्ग उपयुक्तस्तत्र यमकालंकारबाधेन पदावृत्तेरेव प्रवृत्तिरिति प्रेमचन्द्रशर्माणः। भोजराजस्तु एते त्रयोपि अलंकारा दीपकविशेषा एव इति मन्यते इत्यनुपदमेव दर्शितमस्माभिः॥११६॥

## विवृति

इति दीपकचक्रम्॥

आवृत्तिलक्षणमाह–अर्थोऽभिधेयः सः आवर्त्यते यया स आ(साऽर्था)वृत्तिः। (यद्वा) अर्थस्यावर्तनमर्थावृत्तिः। पदं सुबन्तं तिङन्तं च तस्यावृत्तिः। पदावृत्तिः। उभयस्यार्थस्य पदस्य चावृत्तिरुभयावृत्तिरिति त्रिधात्मा (त्वा) वृत्तिः दीपकस्थानमे (न ए) वेष्टमलङ्कारत्रयं दीपकस्थानीयमेव। यथेत्युदाहरति॥

आवृत्तिं लक्षयति–**अर्थेति**। आवर्त्यते इति आवृत्तिः इति निरुक्तिरेव लक्षणम्। दीपकस्थाने अनेकवाक्यविषये इत्यर्थः। सा अर्थावृत्तिः, पदावृत्तिः, उभयावृत्तिः इति त्रिविधा॥

आवृत्त्यलङ्कारं लक्षयति–**अर्थेति**। एकस्यैव अर्थस्य भिन्नरूपैः शब्दैः आवृत्तिः अर्थावृत्तिः। समानरूपस्य पदस्य पुनरुक्तिः पदावृत्तिः। अर्थस्य च पदस्य च अविशेषेण पुनरुक्तिः उभयावृत्तिः। दीपकस्थान एवेति श्लोकादिमध्यान्तस्थानेषु इत्यर्थः॥११६॥

---

**विकसन्ति कदम्बानि स्फुटन्ति कुटजोद्गमाः।**
**उन्मीलन्ति च कन्दल्यो दलन्ति ककुभानि च॥११७॥**

## रत्नश्री

कदम्बानि मुकुलानि विकसन्ति। कुटजानां कुटजरूपा वा उद्गमाः कुड्मलानि स्फुटन्ति विकसन्ति। कन्दल्यश्च कुसुमान्युन्मीलन्ति विकसन्ति। ककुभानि कोरकाणि च दलन्ति विकसन्ति। इत्यर्थावृत्तिरियमुदाहृता। विकासलक्षणस्यैकस्यार्थस्यानेकैः पर्यायैरभीक्ष्णमाविष्करणादिति। दीपकेनाप्ययमर्थः प्रकाश्यते। तद्यथा–

**विकसन्ति कदम्बानि तथैव कुटजोद्गमाः।**
**सुगन्धयश्च कन्दल्यः कलानि ककुभानि च॥ इति।**

## हृदयङ्गमा

अर्थावृत्तिमुदाहरति, विकसन्तीति। –कदम्बानि विकसन्ति, कुटजद्रुमाः स्फुटन्ति, कन्दल्यश्च उन्मीलन्ति, च किञ्च, ककुभानि अर्ज्जुनफलपुष्पादीनि दलन्ति। वर्षावर्णनमिदम्। अत्र विकसन्तीत्यादिक्रियापदचतुष्टयं भिन्नप्रकृतिकमपि एकार्थमेवेति अर्थस्य पुनरावर्त्तनात् अर्थावृत्तिरियम्। (उदाहरणान्तरं यथा,– "हृष्यति चूतेषु चिरं तुष्यति वकुलेषु मोदते मरुति। इह हि मधौ कलकूजिषु पिकेषु च प्रीयते कामी॥" इति)॥११७॥

## प्रभा

अर्थावृत्तिमुदाहरति–**विकसन्तीति।** कदम्बानि कदम्बमुकुलानि। कुटजद्रुमाः स्फुटन्ति पुष्पविकासेनोद्भिन्ना इव भवन्ति। कन्दल्य उन्मीलन्ति पुष्पोद्गमेन विकसिता भवन्ति। ककुभानि अर्जुनवृक्षसुमनानि दलन्ति। प्रावृड्वर्णनमिदम्। अत्र

विकसन्तीत्यादिपदानि भिन्नरूपाण्यपि एकार्थानि इति अर्थस्यावृत्तेरर्थावृत्तिरलंकारः।।११७।।

## विवृति

पदावृत्तिमाह—

उभयावृत्तिमाह—

अत्र प्रावृषि विकसन्ति कदम्बानि कदम्बपुष्पाणि। स्फुटन्ति स्फुट विकसने। विकसन्ति कुटजानामुद्गमाः कुटजकुसुमानि। उन्मीलन्ति च कन्दल्यः। मील निमीलने। उनमीलनं च विकसनमेव। दलन्ति ककुभानि च। दल इत्ययं धातुर्विस (श?) रणे पठ्यते। विसरं (रणं) च विकसनमेव। तेन सर्वैरेतैर्विका (?)सनमेवाभिधीयत इत्यर्थावृत्तिः। विकसन्ति—स्फुटन्ति—उन्मीलन्ति—दलन्ति—पदभेदेऽप्यर्थाभेदात्।।११७।।

---

**जित्वा विश्वं भवानत्र विहरत्यवरोधनैः।**
**विहरत्यप्सरोभिस्ते रिपुवर्गो दिवं गतः॥११९॥**

---

## रत्नश्री

विश्वं जगत् जित्वा अत्र महीमण्डले अद्य च अधुना अवरोधनैः अन्तः पुरसुन्दरीभिः सह भवान् विहरति रमते। तव रिपुवर्गो दिवं स्वर्गं तवासिधारापथेन गतः सह अप्सरोभिः दिव्याङ्गनाभिः सह विहरति इत्युभयावृत्तिर्निदर्शिता, विहरति इत्यर्थस्य पदस्यावृत्तेरिति॥

इदमपि दीपकस्य स्थानम्। तद्यथा–

जित्वा विश्वं भवानत्र विहरत्यवरोधनैः।

रम्याभिरप्सरोभिस्ते रिपुवर्गो दिवं गतः॥ इति।

अत एव दीपकस्थान एवेष्टमलङ्कारत्रयमिति सामान्येनोक्तम्॥

॥ इति आवृत्तिचक्रम् ॥

आक्षेपमुपक्षिपन्नाह–

## हृदयङ्गमा

उभयावृत्तिमाह, जित्वेति।–भवान् विश्वं जित्वा अत्र पृथिव्याम्, अवरोधनैः अन्तःपुरिकाभिः, विहरति, ते तव, रिपुवर्गः दिवं गतः सन् अप्सरोभिर्विहरति, युद्धमरणे स्वर्गलाभादप्सरः प्राप्तिरिति भावः। अत्र विहरतीति पदस्य तदर्थस्य च उत्तरवाक्ये पुनरावृत्तेः उभयावृत्तिरिति बोध्यम्। (उद्देश्यप्रतिनिर्देश्यतायामेक–

शब्दप्रयोगस्यैवौचित्यात् नात्र उभयोरेकार्थत्वेऽपि कथित-पदतादोषः)।।११९।।

## प्रभा

उभयावृत्तिं दर्शयति–**जित्वेति**। अत्र मर्त्यलोके भवान् विश्वं भूमण्डलम् जित्वा अवरोधनैरन्तः पुरिकाभिर्विहरति। ते रिपुवर्गो दिवं गतः सन्। युद्धे सन्मुखमरणादिति भावः। अप्सरोभिर्विहरति। अत्र विहरतीति पदस्य तदर्थस्य च आवृत्तिः। वाक्यद्वयेपि द्वयोरेकार्थकत्वात्। अत उभयावृत्तिरलंकारः। ननु ईदृशस्थले अनेनैव कविना अग्रे निर्दिष्टस्य (३.१३५) एकार्थरूपदोषस्यापात इति वाच्यमिति चेन्न। तस्योद्देश्यप्रतिनिर्देश्यव्यतिरिक्तविषयत्वात्। उद्देश्यप्रतिनिर्दिश्यतायाम् एकप्रयोगस्यैव युक्तत्वम्। यथा–उदेति सविता ताम्रस्ताम्र एवास्तमेति च इत्यादौ। प्रकृते च राजोद्देशेन विधेयस्य विहरणस्य रिपुवर्गोद्देशेनापि विधेयत्वमित्युद्देश्य-प्रतिन्निर्देश्यत्वम् इति सर्वं समुचितमिति सुधीभिराकलनीयम्।।११९।।

## विवृति

विश्वं महीतलं जित्वा भवान् विहरति क्रीडति अवरोधनैः अन्तः पुरस्त्रीभिः त्वया सह संग्रामेऽभिमुखो भूत्वा मृतो यः शत्रुसमूहः स स्वर्गं गतः सन्नप्सरोभिः सह विहरतीति न शब्दो भिन्नः नाप्यर्थ इत्युभयस्य शब्दस्यार्थस्य चावर्तनात् उभयावृत्तिः।।

विकसन्तीति अर्थावृत्तिः। उत्कण्ठयतीति पदावृत्तिः। जित्वेति उभयावृत्तिः।।

क्रमेण उदाहरणमाह–**विकसन्तीति।** विकसन्तीत्यादिभिः क्रियापदैः कदम्बादीनां विकास एव केवमुक्तः। अतः अर्थावृत्तेः उदाहरणमेतत् पदावृत्तिमाह–**उत्कण्ठयतीति।** अत्र उत्कण्ठयतीति पदं आवृत्तम्। उत्कण्ठयति उद्ग्रीवं करोति। उत्तरत्र उत्कण्ठयति उत्कलिकोत्तरं करोति। उभयावृत्त्युदाहरणमाह–**जित्वेति।** जित्वा विश्वं भवानद्य विहरत्यवरोधनैः इत्यनेन वर्णनीयस्य जेतव्यशेषरहितः विश्वजयो नाम अर्थः उक्तो भवति। समरनिहतानामेव वैरिणां स्वर्गगमनमप्सरोभिः सह क्रीडा चेति, विहरत्यप्सरोभिस्ते रिपुवर्गो दिवं गतः इत्यनेनापि प्रागुक्त एवार्थः अभिहितः; इत्यर्थावृत्तिः। विहरति विहरति इत्युक्तत्वात् पदावृत्तिश्च॥११९॥

---

**प्रतिषेधोक्तिराक्षेपस्त्रैकाल्यापेक्षया त्रिधा।**
**अथास्य पुनराक्षेप्यभेदानन्त्यादनन्तता॥१२०॥**

## रत्नश्री

प्रतिषेधस्योक्तिर्वचनमित्यनूद्य आक्षेप इति विधीयते। स च त्रिधा त्रिभिः प्रकारैस्तावद् भिद्यते। कथम्। त्रयोऽतीतानागतवर्तमानाः कालास्त्रैकाल्यम्। तस्या पेक्षया आश्रयणेन हेतुना भूताक्षेपः, भविष्यदापेक्षः, वर्तमानापेक्ष इति। अत्र त्रिधाभेदानन्तरमस्याक्षेपस्य अनन्तता अनवसितभेदता। कुतः? आक्षेपस्य निषेधस्यार्थसा[55a]मान्यस्य भेदाः विकल्पा आक्षेपरूपा वा भेदाः। तेषामानन्त्यादपर्यवसानात् कारणादिति॥

## हृदयङ्गमा

आक्षेपं निरूपयति, प्रतिषेधेति।–प्रतिषेधस्य उक्तिः कथनं, वक्तुं प्रारब्धस्यापि विशेषद्योतनार्थं निषेधभाषणमित्यर्थः, न तु तत्त्वतः प्रतिषेधः, तात्त्विकत्वे वैचित्राभावात् अलङ्कारत्वाभावप्रसङ्गात् इति भावः, आक्षेपः तदाख्यालङ्कारः, विशेषविवक्षाप्रतिपत्तये इष्टार्थस्य प्रतिषेधाभास आक्षेपः इत्यर्थः। (उक्तञ्च, –"इष्टस्याप्यपि (भि?) धातुं योऽर्थस्य विशेषबोधाय। स्वयमेव प्रतिषेधः स वक्ष्यमाणोक्तविषयः आक्षेपः" इति अलङ्कारकौस्तुभे। तथा आग्नेयपुराणे,–"प्रतिषेध इवेष्टस्य यो विशेषाभिधित्सया। तमाक्षेपं ब्रुवन्ति–" इति)। स च त्रैकाल्यापेक्षया त्रैकालिकवस्तुगतत्वेन, त्रिधा वर्त्तमानाक्षेपः अतीताक्षेपः भविष्यदाक्षेपश्च इति, अथ अस्य च त्रिविधस्यापि आक्षेपस्य, पुनः आक्षेप्यस्य प्रतिषेध्यस्य, भेदाः

धर्म्मधर्म्मिकार्य्यकारणादयः, तेषाम् आनन्त्यात् अपरिसङ्ख्येयत्वात्, अनन्तता अनन्तप्रभेद इत्यर्थः। (नव्या अपि वक्तुमिष्टस्य विशेषप्रतिपत्तये निषेधवत् प्रकटनमाक्षेपमामनन्ति, तथा अनिष्टार्थस्य विधिरूपेणाक्षेपणमप्यपरं भेदमङ्गीकुर्वते च; तदुक्तं विश्वनाथेन,—"वस्तुनो वक्तुमिष्टस्य विशेषप्रतिपत्तये। निषेधाभास आक्षेपो वक्ष्यमाणोक्तगो द्विधा।। अनिष्टस्य तथाऽर्थस्य विध्यामासः परो मतः" इति)।।१२०।।

## प्रभा

आक्षेपालंकारं लक्षयति—**प्रतिषेधोक्तिरिति।** प्रतिषेधस्य निषेधस्य उक्तिः कथनमात्रम्। न तु वास्तवः प्रतिषेधः। तात्त्विके प्रतिषेधे चमत्काराभावादलंकारत्वाभावप्रसङ्गः। तथा च प्रतिषेधाभास आक्षेप इत्यर्थः। इयं च प्रतिषेधोक्तिरर्थविशेषाविष्करणायेति बोध्यम्। तत एव वैचित्र्यातिशयः। तथा चायं प्रतिषेध इंष्टार्थस्यैव। तत एव विशेषेण वैचित्र्यात्। उक्तं च अग्निपुराणे—

शब्देनार्थेन यत्रार्थः कृत्वा स्वयमुपार्जनम्।
प्रतिषेध इवेष्टस्य यो विशेषाभिधित्सया।।
तमाक्षेपं ब्रुवन्त्यत्र। (३४५.१५) इति।

उक्तिरित्यस्य प्रतिपादनमिति सामान्यार्थः। न तु शब्देनैव प्रतिपादनमपेक्ष्यते। व्यङ्ग्यप्रतिषेधेपि आक्षेपालंकारस्येष्टत्वात्। अन्यस्य अध्यवसानाभावान्नात्रापह्नुतेराशङ्का।। अयमाक्षेपस्त्रैकाल्यापेक्षया नाम त्रैकालिकवस्तुगतत्वेन त्रिविधो वर्तमानाक्षेपोतीताक्षेपो भविष्यदाक्षेपश्चेति। प्रकाशकारादयस्तु भूतभविष्यतोरेव प्रतिषेधोक्तिराक्षेप इति मन्वते। तदुक्तम्—

निषेधो वक्तुमिष्टस्य यो विशेषाभिधित्सया।
वक्ष्यमाणोक्तविषयः स आक्षेपो द्विधा मतः।। इति।

अस्य च त्रिविधस्याक्षेपस्य आक्षेप्यभेदानन्त्याद् आक्षेप्या निषेधनीयास्तेषां भेदा धर्मधर्मिकार्यकारणादयस्तेषाम् आनन्त्यात्। अनन्तता अपरिच्छिन्नता ज्ञेया।।१२०।।

## विवृति

इत्यावृत्तिचक्रम्।।

आक्षेपलक्षणमाह–

'निषेधवचनमाक्षेपम्(प') इत्याक्षेपालङ्कारस्य सामान्य-लक्षणम्। स एव आक्षेपालङ्कारः त्रैकाल्यापेक्षयाऽतीतानागत-वर्तमानापेक्षया त्रिधा त्रिविधः। अतीताक्षेपो वर्तमानाक्षेपो भविष्यदाक्षेपः (इति।) तथास्याक्षेपालङ्कारस्य आक्षेप्यभेदानन्त्याद-नन्तता। आक्षिप्यन्त इत्याक्षेप्याः धर्मधर्म्यादयः। तेषामानन्त्यं तस्मादनन्तता अपर्यन्तता।।

आक्षेपं लक्षयति–**प्रतिषेधेति**। आक्षेप्यभेदानन्त्यात् अनन्तता। उपलक्षणमेतत् आक्षेपहेतुभेदाच्च इति।।

आक्षेपालङ्कारमाह–**प्रतिषेधेति**। पूर्वं वस्तुविशेषमभिधाय पुनस्तस्यैव विषयवशेन वा हेतुवशेन वा नैवम् इत्यादिप्रतिषेधवचनैः अपाकरणमाक्षेपः। तस्य भूतभविष्यद्वर्तमान-कालवशेन त्रैविध्यं भवति। त्रिविधस्यापि अस्य पुनः आक्षेप्यविशेषाणां आनन्त्यात् आनन्त्यम् अस्तीति आहअथेति।।१२०।।

---

**अनङ्गः पञ्चभिः पौष्पैर्विश्वं व्यजयतेषुभिः।**
**इत्यसंभाव्यमथवा विचित्रा वस्तुशक्तयः॥१२१॥**

## रत्नश्री

पौष्पैः पुष्पमयैः एकान्तमृदुभिस्तैरपि पञ्चभिः स्वल्पैरिषुभिः शरैः स पञ्चेषुरनङ्गः विश्वं जगत् सर्वं व्यजयत विजितवानिति असम्भाव्यमयुक्तमेतत्। कथमस्याः सामग्र्याः कार्यमीदृशं संभाव्यते? अथवा किं न सम्भाव्यते? यतो वस्तूनां पदार्थानां शक्तयः विचित्रा नानाप्रकारा अचिन्त्यास्तदेषामपि तादृशी शक्तिर्भवेत्। न किञ्चिद्बाधकमिति॥

कोऽयमाक्षेप इत्याह–

## हृदयङ्गमा

वृत्ताक्षेपं निर्दिशति, अनङ्ग इत्यादि। –अनङ्गः कामः, इषुभिर्बाणभूतैः, पञ्चभिः पुष्पैः अरविन्दादिभिः, (उक्तञ्च, –"अरविन्दमशोकञ्च चूतञ्च नवमल्लिका। नीलोत्पलञ्च पञ्चैते पञ्चबाणस्य सायकाः"॥ इति) ; विश्वं व्यजयत विजितवान् इति असम्भाव्यम् अविश्वास्यमित्यर्थः, तथा च विजेतुस्तावदनङ्गत्वं, बाणानाञ्च पञ्चसङ्ख्याता, तेषाञ्च पुष्पमयत्वं न तु दृढत्वं, जेतव्यञ्च प्रकाण्डपदार्थो विश्वमिति विजयोऽश्रद्धेय एवेति भावः; अथवा वस्तूनां पदार्थानां, शक्तयः विचित्राः अचिन्त्यस्वरूपाः, वस्तुशक्त्या सर्वमेव सम्भाव्यते इति तत्त्वम्॥१२१॥

## प्रभा

तत्र त्रिविधाक्षेपमध्ये आदौ वृत्ताक्षेपमुदाहरति-**अनङ्ग इति।** अनङ्गः स्मरः। पञ्चभिः पुष्पैः तत्सरूपैः इषुभिर्विश्वं व्यजयत।

अनङ्गस्य-

अरविन्दमशोकं च चूतं च नवमालिका।
नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायकाः।।

इति पञ्चकुसुमबाणत्वं प्रसिद्धमेव। इति पञ्चकुसुमेषुभिर्विश्वविजयः अनुपपत्त्या असंभवनीय एव। तथा हि मदनः स्वयमनङ्गो बाणाः पञ्चैव ते च पुष्पमया जेतव्यं च विश्वं ब्रह्मेन्द्रादिधीरवीरैः परिपूर्णम् इति विजयोश्रद्धेय एव इति विजयानुपपत्तिं स्थिरीकृत्य निषेधति-**अथवेति।** अथवा वस्तूनां पदार्थानां शक्तयः कार्यसंपादनसामर्थ्यानि। विचित्रा अचिन्त्यस्वरूपाणि। न ता अन्वयव्यतिरेकादिना तर्कयितुं शक्या इति भावः। ततश्च संभवत्येव पञ्चेषुभिर्विश्वविजयः।।१२१।।

## विवृति

अनङ्गः पञ्चभिः पौष्पैरिषुभिः विश्वं जगव्द्यजयत जितवानिति इदमसम्भाव्यम्। न हि पञ्चभिर्बाणैः एकस्य पुंसः सकलजगत्पराजयः सम्भवतीत्यनङ्गजयायोगबुद्धिः प्रकृता केन चिदाक्षिप्यते। विचित्रा वस्तुशक्तय इत्यनेन हेतुना वस्तुशक्तिनां वैचित्र्यात् अचिन्त्यो हि मणिमन्त्रौषधीनां प्रभावः इत्यनेन हेतुनाऽनङ्गविजयायोगस्य प्रतिषेधात् प्रकृता (वृत्ता) क्षेपः।।१२१।।

**इत्यनङ्गजयायोगबुद्धिर्हेतुबलादिह।**
**प्रवृत्त्यैव यदाक्षिप्ता वृत्ताक्षेपस्तदीदृशः॥१२२॥**

## रत्नश्री

इत्येवमनन्तरोक्तस्य अनुरूपस्य च हेतोः कारणस्य पौष्पपञ्चशरत्वादेः। बलात् सामर्थ्यात् प्रवृत्ता भूतैवानङ्गजयायोगबुद्धिः। अनङ्गस्य जयो विश्ववशीकरणम्। तस्यायोगोऽसम्भावना तत्र बुद्धिः अनङ्गो व्यजयतेत्य-सम्भाव्यमित्येवाकाराक्षिप्ता निषिद्धा। हेतुबलादित्य-त्राप्यपेक्षणीयम्। भाववदभावस्यापि सहेतुकत्वात् हेतुबलं चात्र विचित्रवस्तुशक्तिदर्शनाम्। भाववदभावस्यापि सहेतुकत्वात्। हेतुबलं चात्र विचित्रवस्तुशक्तिदर्शनम्। यद् यतः तत् तस्मात् ईदृशः एवंप्रकारो वृत्तस्याक्षेपो भूतकालाक्षेपोऽवसेय इति॥

## हृदयङ्गमा

इति प्रागुक्तोदाहरणदर्शिता, प्रवृत्ता जाता, प्रागुद्भावितेत्यर्थः, अनङ्गेन कामेन, अङ्गाभाववता इति भावः ; यो जयः देवदानवपूर्णविश्वपराभवरूप इत्यर्थः, तस्य अयोगः असम्भाव्यत्वं, तस्य बुद्धिः इह अत्र स्थले, हेतुबलात् वस्तुशक्तेः विचित्रत्वरूपकारणात्, यत् आक्षिप्ता प्रतिषिद्धा, अतः ईदृशः एष इत्यर्थः, सः प्रसिद्धः, वृत्ताक्षेपः वृत्तस्य अतीतस्य, सञ्जातस्य असम्भवबुद्धिरूपस्य इत्यर्थः, आक्षेपः प्रतिषेधः इति॥१२२॥

## प्रभा

उदाहरणे आक्षेपलक्षणं संगमयति–**इतीति**। एवंप्रकारेण अनङ्गस्य जयो विश्वजयस्तस्य अयोगः असंभवस्तद्विषये बुद्धिः। हेतुबलाद् अनङ्गपञ्चेषुत्वादिहेतुसामर्थ्यात्। प्रवृत्ता एव उत्पन्ना एव। यद् आक्षिप्ता विचित्रा वस्तुशक्तय इति वस्तुमाहात्म्योद्घोषेण प्रतिषिद्धा। स ईदृशः। वृत्ताक्षेपो वृत्तस्य अतीतस्य आक्षेपो वृत्ताक्षेप इत्यर्थः। अत्र केचिद् हेतुबलाद् इति विचित्रा वस्तुशक्तिरिति हेतुसामर्थ्याद् आक्षिप्ता प्रतिषिद्धा इति हेतुबलादिति पदमाक्षेपे योजयन्ति। अत्र प्रतिषेधो वाचकशब्दयोगाद् व्यङ्ग्य एव।।१२२।।

## विवृति

**अनङ्ग** इति अङ्गरहितत्वं पञ्चेषुत्वं विश्वस्य जेतव्यत्वं च इति हेतुभिः अनङ्गजयायोगबुद्धिः जाता। प्रतिबद्ध्यते च सा अथ वा विचित्रा वस्तुशक्तयः इति।।

उदाहरणानि–**अनङ्ग** इति। पौष्पैः इत्युक्ते जयस्य असम्भावना। अथ वा विचित्रा वस्तुशक्तय इति समाधानहेतूपन्यासात् असम्भावनाऽपि वारिता। इत्यनङ्ग इति सुबोधमेतत्। उत्तरत्रापि दुर्बोधान्येव व्याख्यायन्ते।।१२२।।

---

**कुतः कुवलयं कर्णे करोषि कलभाषिणि।**
**किमपाङ्गमपर्याप्तमस्मिन् कर्मणि मन्यसे॥१२३॥**

## रत्नश्री

कलभाषिणि मञ्जुवचने! प्रियामन्त्रणम्। कर्णे कुवलयम् अवतंसोत्पलम् कुतः कस्मात् करोपि? वृथैव तत् क्रियते, अपाङ्गेन कर्णपूरकार्याचरणादित्याहकिमित्यादि। अपाङ्गं नयनोपान्तम् अस्मिन् प्रस्तुते कर्मणि कर्णावतंसोत्पलकृत्ये अपर्याप्तम् असमर्थम् मन्यसे? किमिति क्षेपे प्रश्ने वा। नैवं मन्तव्यं पर्याप्तमिदमस्मिन् कर्मणीति॥

तद् व्याचष्टे–

## हृदयङ्गमा

वर्त्तमानाक्षेपमुदाहरति, कुत इत्यादि। –हे कलभाषिणि! कर्णे कुवलयं नीलोत्पलं, कुतः कस्मात्, करोषि? धारयसि? कुवलयधारणं मा कुरु इत्यर्थः, अस्मिन् कर्म्मणि कर्णशोभाकर्म्मणि, अपाङ्गं किम् अपर्य्याप्तम् अक्षमं, मन्यसे? अपाङ्गेनैव कर्णशोभासम्पादनात् कुवलयधारणं व्यर्थमिति भावः॥१२३॥

## प्रभा

वर्तमानाक्षेपमुदाहरति–**कुत इति**। हे कलभाषिणि मधुरालापे। कर्णे कुवलयं कुतः किमिति करोषि मा कुरूः इत्यर्थः। अस्मिन् कर्मणि कर्णशोभासंपादनकर्मणि अथवा उत्पलभूषाविन्यासेन

नायकचेतोहरणकर्मणि अपाङ्गं नेत्रप्रान्तम् अपर्याप्तमसमर्थं मन्यसे किम्। अत्र कर्णे कुवलयधारणस्य कुत इत्यनेन कैमर्थ्येन प्रतिषेधो ज्ञेयः॥१२३॥

## विवृति

कुतः कुवलयं कर्णे करोषि कलभाषिणि किमपाङ्गपर्याप्तम्। अपाङ्गमेव कर्णावतंसोत्पलकार्यकरणा(ण)समर्थम्॥१२३॥

**स वर्तमानाक्षेपोऽयं कुर्वत्येवासितोत्पलम्।**
**कर्णे काचित् प्रियेणैवं चाटुकारेण रुध्यते॥१२४॥**

## रत्नश्री

सोऽयमीदृशो वर्त[मा]नस्य करणस्य आक्षेपः। वर्तमानकालविषयो निषेधः। कथम्? काचित् प्रिया कर्णे स्वस्मिन् असितोत्पलमिन्दीवरं कुर्वती कुर्वाणेव, न कृतवती करिष्यन्ती वा। रुध्यते आक्षिप्यते प्रियेण चाटुकारेण प्रियाचरणचतुरेण। एवमनन्तरोक्तेन प्रकारेण यतस्तस्माद्वर्तमानाक्षेपोऽयमिति निगमनीयम् इति॥

## हृदयङ्गमा

सः अयं वर्त्तमानाक्षेपः, यतः असितोत्पलं नीलोत्पलं, कर्णे कुर्वती एव, न तु कृतवती वा करिष्यन्तीति भावः, काचित् नायिका, चाटुकारेण प्रियेण एवं रुध्यते प्रतिषिध्यते, कुतः इत्यादि निषेधवाक्यस्य किमपाङ्गम् इत्यादिना प्रश्नपरेणापि निषेधपर्य्यवसायिना वाक्येन समर्थनात् प्रतिषेधप्रतीतिः तस्य च प्रतिषेधस्य वर्त्तमानकालवृत्तित्वात् वर्त्तमानाक्षेप इति भावः॥१२४॥

## प्रभा

वर्तमानाक्षेपमुदाहरणे योजयति–**स इति**। यतः काचिन् नायिका। कर्णे असितोत्पलं कुर्वती एव न तु कृतवती करिष्यमाणा

वा चटुकारेण मधुरभाषिणा प्रियेण एवम् कुत इति वैफल्यप्रदर्शनेन निषिद्धा। अतोत्र वर्तमानकालीनस्यासितोत्पलधारणस्य निषेधाद् वर्तमानाक्षेपोयं ज्ञेयः।।१२४।।

## विवृति

ततः किं कुवलयावतंसेनेति काचित् कर्णकुवलयं कुर्वत्येव प्रियेण भर्त्रा चाटुकारेण निरुद्ध्यते कर्णे कुवलयं माकार्षीः त्वमिति वर्तमानाक्षेपः।।१२४।।

---

**सत्यं ब्रवीमि न त्वं मां द्रष्टं वल्लभ! लप्स्यसे।**
**अन्यचुम्बनसंक्रान्तलाक्षारक्तेन चक्षुषा॥१२५॥**

## रत्नश्री

[55b]वल्लभ! सत्यं नियतमिदम् अहं त्वां ब्रवीमि मा अन्यथा मंस्थाः। किं तदित्यादि। नेत्यादि। अन्यया प्रतियोषिता अन्यस्या वा विलासलाक्षारागरञ्जिताधरपल्लवया। चुम्बनात् वक्त्रयोगात् संक्रान्तः संचरितो लाक्षारागो यत्र तेन चक्षुषा मां द्रष्टुं त्वं न लप्स्यसे नाहमीदृशं व्यतिकरमपरेव सोढुं शन्कोमि। तदैव मे लोकान्तरप्रस्थानम्। ईदृशीयं सृष्टिः किं करवाणीति॥

तद् विवृणोति–

## हृदयङ्गमा

भविष्यदाक्षेपमाह, सत्यमित्यादि।–हे वल्लभ! सत्यं ब्रवीमि, त्वम् अन्यस्या नायिकायाः, चुम्बनेन सङ्क्रान्तया लाक्षया रक्तेन चक्षुषा मां द्रष्टुं न लप्सासे मद्दर्शनं न प्राप्सासीत्यर्थः॥१२५॥

## प्रभा

भविष्यदाक्षेपमाह–**सत्यमिति**। हे वल्लभ अन्यचुम्बन-संक्रान्तलाक्षारक्तेन अन्यस्य नायिकान्तररूपजन्यस्य चुम्बनेन संक्रान्ता तदधरतः संप्राप्ता या लाक्षा तया रक्तेन लोहितीभूतेन चक्षुषा त्वं मां द्रष्टुं न लप्स्यसे मद्दर्शनं न प्राप्नोषीत्यर्थः।

तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् इति तुमुन्। एतत् सत्यं ब्रवीमि॥१२५॥

## विवृति

केन किंविशिष्टेन

परस्त्रीचुम्बनेन सङ्कान्तो यो लाक्षारसः तेन यद्रक्तं चक्षुस्तेन॥१२५॥

---

**सोऽयं भविष्यदाक्षेपः प्रागेवातिमनस्विनी।**
**कदाचिदपराधोऽस्य भावीत्येवमरुन्ध्द यत्॥१२६॥**

---

## रत्नश्री

यद् यस्मात् अतिमनस्विनी सर्वथा दोषमर्षणपराङ्मुखस्वभावा काचित् प्रणयिनी कदाचिदस्य पुनरपराधो व्यलीकं भावी भवेदिति शङ्कमाना प्रागेवानागतविधायितयारुन्ध्द आक्षिपत्। एवमनन्तरोक्तेन प्रकारेण। तस्मात्सोऽयमीदृशः भविष्यदाक्षेपो भविष्यत एव दर्शनलाभादेराक्षेपादिति॥

## हृदयङ्गमा

अत्र अतिमनस्विनी अतिमानवती काचित् नायिका, कदाचित् अस्य नायकस्य, अपराधो भावी भविष्यति, इति, आशङ्क्य इति शेषः, यत् एवं नायकम् अरुन्ध नायिकाऽन्तरप्रसक्तौ निषिद्धवती, अतः अयं स प्रसिद्धः, भविष्यतः नायिकाऽन्तरानुरागस्य आक्षेपात् प्रतिषेधात् भविष्यदाक्षेप इति निष्कर्षः॥१२६॥

## प्रभा

भविष्यदाक्षेपमुदाहरणेन संगमयति–**सोयमिति।** काचिद् अतिमनस्विनी अत्यन्तमानिनी नायिका अस्य नायकस्य कदाचिद् अपराधो भावी इति तं नायकं यद् यस्माद् एवम् अरुन्ध रुरोध तस्मात् सोयं भविष्यदाक्षेपः। अत्र सत्यं ब्रवीमीति वाक्येन नायकस्य भविष्यन्नायिकानुरागस्य प्रतिषेधादयं भविष्यदापेक्षः॥१२६॥

## विवृति

अयं भविष्यदाक्षेपः प्रागेव पूर्वम(मेव) परस्त्रीसङ्गमादतिमनस्विनी काचित् कान्ता प्रियं यस्मादरुणा(ण)त् रुरोधका(कदा)चिदपरोधे (घोऽस्य)प्रियतमस्य। भविष्यसी(ती)ति भावी। 'भविष्यति गम्यादय' इति भवतेरिन्णिच्च। इ(अ)नागतापरा(घ)प्रतिविधानकरणादयं भविष्यदाक्षेप उच्यते।।१२६।।

---

**तव तन्वङ्गि! मिथ्यैव रूढ़मङ्गेषु मार्दवम्।**
**यदि सत्यं मृदून्येव किमकाण्डे रुजन्ति माम्॥१२७॥**

---

## रत्नश्री

तन्वङ्गि! तवाङ्गेषु मार्दवं सौकुमार्यं मिथ्यैव असत्यमपि रूढ़ं प्रसिद्धमासीत्। मिथ्याप्रसिद्धिरेवेयं यत् तवाङ्गानि मृदूनि इति यावत्। तथाहि यदि सत्यं परमार्थतो मृद्वङ्गानि भवेयुः, नोपचारमात्रम्। सत्यमिति भवनक्रियाविशेषणम्। मां किं कस्मात् रुजन्ति पीडयन्ति। अकाण्डे अर्कस्मात्। क्रूरकार्यं हि पीड़नम्। तत्कथं मादवे युज्यत इति॥

कतमोऽयमाक्षेप इत्याह—

## हृदयङ्गमा

आक्षेपस्य भेदानामानन्त्येऽपि कतिचित् भेदान् दर्शयिष्यन् प्रथमं धर्माक्षेपमाह, तवेत्यादि। —हे तन्वङ्गि! तव अङ्गेषु मार्दवं रूढ़ं स्थितं, मिथ्यैव, यदि सत्यं तव अङ्गानि मृदूनि एव, तदा अकाण्डे अकारणं, मां किं रुजन्ति? तापयन्ति?॥१२७॥

## प्रभा

इत्थमाक्षेपस्य सामान्यभेदत्रयमुक्त्वा तस्य सूक्ष्मभेदानामानन्त्यात् संपूर्णतया निरूपणमशक्यमिति शिष्यशिक्षार्थं कांश्चित् प्रभेदान् दिदर्शयिषुर्धर्माक्षेपमुदाहरति— **तवेत्यादि**। तन्वङ्गि तव अङ्गेषु रूढं परिणतम् अथवा सार्वजनीनप्रवादगोचरम् मार्दवं

मिथ्यैव असत्यमेव। यदि सत्यं तर्हि तादृशानि तेङ्गानि मामकाण्डे सहसैव किं रुजन्ति व्यथयन्ति।।१२७।।

## विवृति

कुतो मिथ्यैतत्। अत आह–।।१२७।।

**धर्माक्षेपोऽयमाक्षिप्तमङ्गनागात्रमार्दवम्।
कामुकेन यदत्रैवं कर्मणा तद्विरोधिना॥१२८॥**

## रत्नश्री

यद् यस्मात् अत्र प्रयोगे कामुकेन केनचित् चाटुकारेण कर्तृभूतेन तद्विरोधिना प्रतिद्वन्द्विना कर्मणा[न]ङ्गरुजारूपेण करणभूतेनाङ्गनाया गात्रेषु मार्दवमेवमुक्तेन प्रकारेणाक्षिप्तं निषिद्धम्। तस्मादयमीदृशो धर्मस्याक्षेप इति॥

## हृदयङ्गमा

अत्र कामुकेन एवम् उक्तिनैपुण्येन इत्यर्थः, तद्विरोधिना मार्दवविरोधिना, कर्मणा तापनरूपेण, अङ्गनाया गात्रस्य मार्दवं यत् यस्मात्, आक्षिप्तं प्रतिषिद्धं, तस्मात् अयं धर्मस्य मार्दवरूपस्य, आक्षेपात् धर्माक्षेपः॥१२८॥

## प्रभा

उदाहरणं योजयति–**धर्माक्षेप इति।** यदत्र एवम् उक्तिनैपुण्येन। कामुकेन तद्विरोधिना मार्दवविरुद्धेन व्यथाकरणरूपेण कर्मणा अङ्गनायाः शुभाङ्ग्या गात्राणां मार्दवम् आक्षिप्तं निषिद्धम्। तस्मादयं मार्दवधर्मस्याक्षेपाद् धर्माक्षेपः॥१२८॥

## विवृति

अयं धर्माक्षेपः। मार्दवं नाम यो धर्मः स तद्विरोधिना कर्मणा यतोऽमुना कामुकेनाक्षिप्त इति।

**तवेति।** तवेत्यादीनि कालत्रयोदाहरणानि। धर्माक्षेपः मृदुगुणविरोधिन्या रुजाक्रियया मार्दवधर्मः आक्षिप्यत इति॥१२८॥

---

**सुन्दरी सा न वेत्येष विवेकः केन जायते।**
**प्रभामात्रं हि तरलं दृश्यते न तदाश्रयः॥१२९॥**

---

## रत्नश्री

सा विवक्षिता काचित् सुन्दरी भवतीति तावन्निश्चयरूपो विवेकः विभागप्रतिपत्तिः। न वा सा भवतीत्यभावनिर्णयलक्षणो विवेकः। एषोऽयं केन हेतुना जायते? न केनचिदित्यर्थः। किं कारणमित्याह-प्रभेत्यादि। हिर्यस्मादर्थे। तत्र तस्यां तरलम् उज्ज्वलम् प्रभा कान्तिः धर्म एव मात्रं न धर्मी दृश्यते गृह्यते। यदाह-नाश्रय इति। प्रभानाम्नो धर्मस्य आश्रयः अधिकरणं देहे न दृश्यते। [56a] तत्कथमयं विवेक इति प्रकृतमुपसंहार्यमिति॥

तद्विभजते-

## हृदयङ्गमा

धर्म्याक्षेपमुदाहरति, सुन्दरीत्यादि। -सा सुन्दरी नायिका, अत्र वर्त्तते इति शेषः, न वा इत्येषः विवेकः निश्चयज्ञानं, केन कथं, जायते? न कथमपीत्यर्थः, हि यतः, तरलं चञ्चलम्, इतस्ततः विसृमरमित्यर्थः, प्रभामात्रं केवलं ज्योतिरेव, दृश्यते, तस्य प्रभामात्रस्य, आश्रयः आधारभूता नायिका, न॥१२९॥

## प्रभा

धर्म्याक्षेपमुदाहरति-**सुन्दरीति।** सा प्रभाविशेषेण अनवगतस्वरूपा सुन्दरी नायिका न वा विद्यते न वा इत्येष विवेको निश्चयज्ञानम् केन जायते कथं जायते। ननु प्रत्यक्षविषये कथं

भ्रान्तोसीत्याह **प्रभामात्रमिति।** हि यतः। तरलं चञ्चलं सर्वतो दृष्टिविघातेन प्रसरत् प्रभामात्रं केवलं प्रभैव दृश्यते। तस्याः प्रभाया आश्रय आधारो नायिकाशरीरं न दृश्यते।।१२९।।

## विवृति

सुन्दरीशोभिना (सुन्दरी सा न वा) सुन्दरीत्येष विवेकः केन जायते यतः प्रभामात्रं हि तरलं दृश्यते। तेनात्र संशयः। सौन्दर्यासौन्दर्ययोराधारः शरीरम्। तच्च प्रभया व्याप्तम्। अतः प्रभैव केवला दृश्यते। न च प्रभाश्रयः शरीरमित्ययं धर्म्याक्षेपः। धर्मिणः शरीरस्याक्षेपात् निषेधादिति।।

**सुन्दरीति।** विलक्षणसंस्थानावयववती सुन्दरी। सा सुन्दरी वा न वा इति विवेक्तुं न शक्या, यतो विद्युत्प्रभासदृशं तरलम् उज्ज्वलं प्रभामात्रं दृश्यते। तत्र प्रभायां प्रभाश्रयोऽङ्गं न दृश्यते। आक्षेपविशेषलक्ष्यलक्षणानि स्पष्टानि।।१२९।।

---

**धर्म्याक्षेपोऽयमाक्षिप्तो धर्मी धर्मं प्रभाह्वयम्।**
**अनुज्ञायैव यद्रूपमत्याश्चर्यं विवक्षता॥१३०॥**

## रत्नश्री

यद् यस्मात् अत्र विषये रूपं वर्णसंस्थानात्मकं भूतगुणम् अत्याश्चर्यम् अत्यन्ताद्भुतम्, एवं नामेदं प्रतिविशिष्टं यदाश्रयोऽपि तत्र लावण्यराशौ निमग्नो न दृश्यते इति वक्तुम् इच्छता चाटुकारेण केनचिदाक्षिप्तो धर्मी आश्रयः। धर्मं गुणं प्रभाह्वयं कान्त्यभिधानम[नु]ज्ञाय अनाक्षिप्य। प्रभेत्याह्वयो नाम यस्येति विग्रहः। तस्माद्धर्मिण आक्षेपो निराशः॥

## हृदयङ्गमा

अत्र अत्याश्चर्य्यं रूपं प्रभूतप्रभाविशिष्टं नायिकासौन्दर्य्यं, विवक्षता प्रतिपादयितुमिच्छता नायकेन, प्रभाह्वयं प्रभारूपं, धर्मम् अनुज्ञाय एव संस्थाप्यैव, धर्मी तदाश्रयभूता नायिका, यत् यस्मात्, आक्षिप्तः प्रतिषिद्धः, तस्मात् अयं धर्म्याक्षेपः॥१३०॥

## प्रभा

धर्मिण आक्षेपं दर्शयति–**धर्म्याक्षेपोयमिति।** अत्याश्चर्यं रूपं प्रभातिशयेन विस्मयावहं नानिकाया रूपम् विवक्षता प्रतिपिपादयिषता नायकेन प्रभाह्वयं प्रभासंज्ञकं धर्मम् नायिकाधर्मम्

अनुज्ञायैव स्वीकृत्यैव यद् यस्माद् धर्मी नायिकारूप आक्षिप्तो निषिद्धस्तस्माद् धर्म्याक्षेपोयम्।।१३०।।

## विवृति

**धर्म्याक्षेप इति।** विवक्षता वक्तुम् इच्छता। अत्र धर्मशब्देन वर्णनीया उच्यते। अत्यद्भुतं वर्णनीयरूपं वक्तुकामः–प्रभामात्रं पश्यामः, प्रभायास्त्वाश्रयो न दृश्यते–इत्याह।।१३०।।

---

**चक्षुषी तव रज्येते स्फुरत्यधरपल्लवः।**
**भ्रुवौ च भुग्ने न तथाप्यदुष्टस्यास्ति मे भयम्॥१३१॥**

---

## रत्नश्री

चण्डि! चक्षुषी तव इमे रज्येते रोषरागमागच्छतः। अधरश्च पल्लवोऽयं स्फुरति कोपकम्पमनुगच्छति। भ्रुवौ च इमे भुग्ने जिह्मभावमाभजतः। कामं तथापि। अदुष्टस्यानिरागसो मे मम भयं त्रासो नास्ति। सापराधो हि बिभीयात्। किमहमवाच्यो बिभेमीति॥

तद्विवृणोति–

## हृदयङ्गमा

कारणाक्षेपमुदाहरति, चक्षुषी इत्यादि।–तव चक्षुषी रज्येते आरक्ते भवतः, अधरः पल्लव इव स्फुरति, भ्रुवौ च भुग्नौ कुटिलीभूतौ, तथाऽपि चक्षूरागादीनां क्रोधहेतुत्वेन अपराधहेतुकभयकारणे सत्यपीत्यर्थः, अदुष्टस्य निरपराधस्य, अपरनायिकासङ्गादिदोषहीनस्येत्यर्थः, मे भयं नास्ति॥१३१॥

## प्रभा

कारणाक्षेपमुदाहरति–**चक्षुषीति**। तव चक्षुषी नेत्रकमले रज्येते कोपादारक्ते भवतः। अधरपल्लवः स्फुरति रोषेण कम्पते। भ्रुवौ भ्रुकुट्यौ भुग्नौ क्रोधेन वक्रीभूतौ। तथापि एवंभूतेपि अदुष्टस्य नायिकान्तरानुरागदोषशून्यस्य मे भयं नास्ति॥१३१॥

---

**स एष कारणाक्षेपः प्रधानं कारणं भियः।**
**स्वापराधो निषिद्धोऽत्र यत् प्रियेण पटीयसा॥१३२॥**

## रत्नश्री

यद् यस्मात् पटीयसा दोषपरिहारचतुरेण प्रियेण भियो भयस्य प्रधानम् उचितं कारणम् अन्यद् भवदपि अनुचितं स्वस्य स्वो वा अपराधो दोषो निषिद्धः अत्र प्रयोगे। तस्मात् स एष ईदृशः कारणस्य [आ]क्षेपो विज्ञेय इति।।

## हृदयङ्गमा

अत्र पटीयसा सुनिपुणेन, प्रियेण भियः प्रधानं कारणं स्वापराधः निजकृतदोषः, यत् यस्मात्, निषिद्धः अतः एषः स प्रसिद्धः, कारणाक्षेपः ; अत्र न भयम् अस्तीति कथनेन भयरूपकार्य्यस्य प्रतिषेधात् अयं कार्याक्षेपश्चेत्यनयोः सङ्करः। (अत्रेदं मन्तव्यं, कारणनिषेधस्य कारणक्षेपालङ्कारत्वे कारणाभावेन कार्य्योत्पत्तिलक्षणा विभावनाऽप्यत्र सम्भवति, ततश्च द्वयोरैक्यमापतितमिति मनसि कृत्वा प्रधानं कारणमित्युक्तं, तेन च यत्र प्रधानकारणनिषेधेन कार्य्योत्पत्तिवर्णनं तत्र कारणाक्षेपः, यत्र तु अप्रधानकारणाभावेन कार्य्योत्पत्तिवर्णनं तत्र वक्ष्यमाणलक्षणा विभावनैवेत्यनयोर्भेदः)।।१३२।।

## प्रभा

उदाहरणं विशदयति–**स एष इति**। पटीयसा चतुरेण। प्रियेण नायकेन। भियः प्रधानं कारणं स्वापराधो यद् यस्मान्निषिद्धः अतः कारणाक्षेपोयम्। तथा च प्रधानकारणनिषेधः कारणाक्षेपस्य विषयः।

अप्रधानकारणाभावस्तु विभावनाया इति आक्षेपविभावनयोर्भिन्नो विषयः कल्प्य इति केचित्। अन्ये तु चक्षुषी तव रज्येते इत्यादिकारणान्तरस्य शब्दतः प्रतिपाद्यत्वात् तस्य विभाव्यत्वं नास्ति। विभावनायां कारणान्तरस्य विभाव्यत्वमपेक्ष्यते। तदुक्तम्–

प्रसिद्धहेतुव्यावृत्त्या यत्किंचित् कारणान्तरम्।
यत्र स्वाभाविकत्वं वा विभाव्यं सा विभावना।। इति।।

तथैवात्र नास्ति मे भयम् इत्यनेन भयरूपकार्यप्रतिषेधात् कार्यक्षेपोपि इत्यपि केचित्। परमत्र पूर्वाक्षेपेण कारणनिषेधे तत्फलकथनं नास्ति मे भयमिति अतो न प्राधान्येन एष आक्षेपश्चमत्कारशाली इति कारणाक्षेप एवालंकार इति भाति। शुद्धोदाहरणमाहुः श्रीप्रेमचन्द्रशर्माणः–

अस्माकं सखि वाससी न रुचिरे ग्रैवेयकं नोज्ज्वलं
नो वक्रा गतिरुद्धतं न हसितं नैवास्ति कश्चिन्मदः।
किंत्वन्येपि जना वदन्ति सुभगोप्यस्याः प्रियो नान्यतो
दृष्टिं निक्षिपतीति विश्वमियता मन्यामहे दुःस्थितम्।। इति।।

अत्रोत्तरार्धव्यङ्ग्यस्य वशीभूतपतिकत्वरूपकार्यस्य वासोरुचिरत्वादिरूपकारणान्येवाक्षिप्तानीति।।१३२।।

## विवृति

चक्षुषी तव रज्येते इत्यादि (यत्) स एष कारणाक्षेपः यतो ह भयं नामत(य)त्कार्यं तत्कारणमपराधः स च मे नास्त्येते(व)। न. ..(त)थाऽपयदुष्टस्यास्ति मे भयम्। 'त्यजति भयमकृतपाप' मिति।।

**स इति।** पटीयसा प्रगल्भेन।।१३१–१३२।।

**दूरे प्रियतमः सोऽयमागतो जलदागमः।**
**दृष्टाश्च फुल्ला निचुला न मृता चास्मि किं न्विदम्॥१३३॥**

---

## रत्नश्री

प्रियतमो दूरे प्रेषितो वर्तते। योऽसौ विरहिणीप्राणप्रयाणसमयः सोऽयं जलदागमोऽप्यागतः। फुल्ला निचुला वञ्जुला मञ्जुमञ्जरीजालजटिलशिरसो दृष्टा दृष्टिकटवः। एवं [सन्निहित]समग्रमरणकारणा साहं न च मृतास्मि। किं न्विदं विधिविलसितं दीर्घदुःखभाजनतां नीता वयम् अमुना दग्धदैवेनेति॥

तद् व्याचष्टे–

## हृदयङ्गमा

कार्य्याक्षेपं दर्शयति, दूरे इत्यादि।–प्रियतमः दूरे, तिष्ठति इति शेषः, सः अयं जलदागमः मेघोदयकालः, वर्षासमयः इत्यर्थः, आगतः, यतः फुल्लाः प्रफुल्लाः, सुस्निग्धश्यामला इति यावत्, निचुलाः स्थलवेतसाः, दृष्टाश्च, तथाऽपि न मृता च अस्मि, नु वितर्के, किमिदम्? अत्यसम्भाव्यमिदम् इति भावः। विरहिण्युक्तिरियम्।१३३॥

## प्रभा

कार्याक्षेपमाह–**दूरे प्रियतम इति**। प्रियतमो दूरे तिष्ठतीति शेषः। सोयं विरहिजनघातक इति प्रसिद्धः। जलदागमः वर्षाकाल आगतः। फुल्लाः निचुला वेतसा दृष्टाः प्रत्यक्षीकृताः। एवं स्थितेपि न मृतास्मि मदनानलेन न दग्धास्मि। किंनु इदम् अवश्यंभाविनि कार्ये कथं वैधुर्यम्। अत्याश्चर्यावहमेतत्॥१३३॥

---

**कार्याक्षेपः स कार्यस्य मरणस्य निवर्तनात्।**
**तत्कारणमुपन्यस्य दारुणं जलदागमम्॥१३४॥**

---

## रत्नश्री

तस्य मरणस्य कारणं दारुणम् अतिदुःसहं जलदागममुत्फुल्लनिचुलं प्रियवियोगसचिवमुपन्यस्य प्रतिपाद्य कार्यस्य मरणस्य निवर्तनात् न मृतास्मीति सोऽयमीदृशः कार्यस्याक्षेपः प्रतिपत्तव्य इति॥

## हृदयङ्गमा

प्रागुदाहरणं प्रदर्श्य लक्षणं सङ्गमयति, कार्य्याक्षेप इति। –तत् प्रसिद्धं, जलदागमस्य कामोद्दीपकत्वात् विरहिविनाशकत्वेनेति भावः, कारणं हेतुभूतं, दारुणं विरहिदुःखप्रदत्वेनातिकठोरं, जलदागमम् उपन्यस्य कार्य्यस्य मरणस्य निवर्त्तनात् प्रतिषेधात्, सः प्रसिद्धः, कार्य्याक्षेपोऽयम्। (अत्र पूर्ववत् प्रसिद्धकारणसत्त्वेऽपि कार्य्याभाववर्णने कार्य्याक्षेपः, अप्रसिद्धकारणे सत्यपि फलाभाववर्णने विशेषोक्तिरिति भेदः कल्पनीयः ; तदुक्तं दर्पणकारेण,–"सति हेतौ फलाभावो विशेषोक्तिस्तथा द्विधा" इति)॥१३४॥

## प्रभा

उदाहरणं विशदयति–**कार्याक्षेप इति**। तस्य मरणस्य कारणं प्रियतमदूरावस्थानादिकम्। अथवा तद् विरहिमारकत्वेन प्रसिद्धं कारणं कारणभूतम्। क्त्वाप्रत्ययान्तघटितवाक्यस्य प्रधानवाक्यात् पूर्वभावित्वेन तद्घटिततच्छब्देन मरणपरामर्शः कथं स्यादिति

दोषोस्मिन् पक्षे अपहृतो भवति। तच्छब्दस्य बुद्धिपरामर्शकत्वेन सकलश्लोकार्थावलोचनया अत्र मरणमेव तच्छब्देनाभिप्रेतमिति स्फुटं तस्य कविबुद्धिस्थमरणावेद्यत्वात् प्रथमार्थेपि न क्षतिरित्यन्ये। उपन्यस्य प्रथमं निवेश्य तत्कार्यस्य मरणस्य निवर्तनात् निषेधात् सः पूर्वश्लोकोदाहृतः कार्याक्षेपः। कारणमित्यस्य प्रसिद्धकारणमित्यर्थस्वीकारे अप्रसिद्धकारणोपन्यासे कार्याभावो विशेषोक्तिरिति विशेषोक्तेर्विषयः स्वतन्त्रो दर्शितो भवति। अन्यथा उभयोर्विषयैक्याद् दुरवस्था स्यात्।।१३४।।

## विवृति

अयं संस्का(का)र्याक्षेपः मरणं नाम यत्कार्यं तदाक्षेप(:) प्रतिषेधः मरणकारणस्य विरहिणा(णां) जलदागमनस्य सद्भावात्।।

दूर इति। वर्षासु प्रियतमेषु अनागतेषु कामिन्यः कथाशेषा भवन्ति इति कविसमयः। अहं प्रोषितदयिता प्राप्तेऽपि घनसमये प्राणिमि, इति कारणे सत्यपि कार्यं न दृश्यते, इति कार्याक्षेपः।।१३३–१३४।।

**न चिरं मम तापाय तव यात्रा भविष्यति।**
**यदि यास्यसि यातव्यमलमाशङ्कयात्र ते॥१३५॥**

---

## रत्नश्री

वल्लभ! तव यात्रा गमनं चिरं दीर्घं मम तापाय दुःखार्थं न भविष्यति। स्वल्पोऽपि तापस्त्वया विना मृताया न मे सम्भवति। जीवन्ती हि तमनुभवेत्। न च मरणसुखं परित्यज्य काचित्सचेतना दुःख[56b]भावमीदृशं प्रतीच्छतीति पञ्चतां सूचयतीति। अत्र च वस्तुनि ते तव शङ्कया अन्यथासम्भावनयालं नान्यथा शङ्कनीयं नियतमेतत्। तस्मात् यदि यास्यसि गम्यतां किं स्थीयत इति॥

तद् व्याचष्टे–

## हृदयङ्गमा

अनुज्ञाक्षेपमुदाहरति, नेत्यादि।–तव यात्रा प्रवासगमनं, मम चिरं तापाय न भविष्यति, विरहेण मम झटिति प्राणात्ययस्य अवश्यम्भावादिति भावः ; यदि यास्यसि, त्वमिति शेषः, तदा यातव्यं याहीत्यर्थः, ते तव, अत्र मद्विषये, आशङ्कया अलम्॥१३५॥

## प्रभा

अनुज्ञाक्षेपमुदाहरति–**न चिरमिति।** देशान्तरं जिगमिषुं नायकं

प्रति नायिका ब्रूते न चिरमिति। तव यात्रागमनं मम तापाय विरहवेदनायै चिरं बहुकालम् न भविष्यति। अचिरादेव त्वद्विरहेण लोकयात्रायाः परिसमाप्तेः। यदि यास्यसि यातव्यम् अवश्यं गन्तव्यम्। अत्र मद्विषये शङ्कया विरहपीडितेयं कथं दुःखं सहिष्यत इति शङ्कया अलम्।।१३५।।

---

**इत्यनुज्ञामुखेनैवं कान्तस्याक्षिप्यते गतिः।**
**मरणं सूचयन्त्यैव सोऽनुज्ञाक्षेप इष्यते॥१३६॥**

## रत्नश्री

इत्युक्तेन विधिना अनुज्ञामुखेन अनुमतिद्वारेणैवं यातव्यमिति कान्यस्य गतिः आक्षिप्यते मरणमात्मनः सूचयन्त्या भङ्ग्या कथयन्त्यैव प्रियया। इदमाक्षेपनिमित्तम्। तस्मात् स तादृशोऽनुज्ञाक्षेप इष्यते तज्ज्ञैरिति॥

## हृदयङ्गमा

इति उक्तरूपया विरहवेदनया, मरणं नायकविदेशयात्रायां म्त्रप्राणवियोगं, सूचयन्त्या एव कयाचित्, अनुज्ञामुखेन विदेशगमनानुमत्या एव, कान्तस्य गतिः विदेशगमनम्, आक्षिप्यते निषिध्यते, अतः सः अनुज्ञाक्षेप इत्युच्यते। (विश्वनाथस्त्वेतादृशस्थले विदेशगमनस्यानिष्टत्वात् विधिर्निषेधे एव पर्य्यवस्यति, तेन च गमनस्यात्यन्तपरिहार्य्यत्वं प्रतीयते इति विध्याक्षेपमङ्गीकरोति। उक्तञ्चात्र तेनैव यथा,-''अनिष्टस्य तथाऽर्थस्य विध्याभासः परो मतः'' इति)॥१३६॥

## प्रभा

उदाहरणं व्याख्याति-**इतीति**। इति अनुज्ञामुखेनैव गमनानुमत्यैवं। एवकारेण निषेधार्थकशब्देन निषेधस्य व्यावृत्तिः सूच्यते। केचित्तु अनुज्ञामुखेनैव इति मरणं सूचयन्त्यैव इत्यनेन संयोजयन्ति। कान्तस्य गतिराक्षिप्यते अतः सोयमनुज्ञाक्षेपः। मरणं

संसूचयन्त्यैवेतिं गतेराक्षेपस्य हेतुः। अनिष्टस्य विधेयत्वासंभवेन प्रतिषेधपर्यवसानात्। दर्पणकारास्तु एतादृशस्थले विध्याभासम-लंकारमाहुः। तदुक्तम्–अनिष्टस्य तथार्थस्य विध्याभासः परो मतः। इति।।१३६।।

## विवृति

यदि यास्यस्यवश्यं तर्हि यातव्यमित्यनुज्ञाक्षेपः। त्वयि गते क्षणमपि (न) जीविष्यामि ततस्तापो मे न भविष्यतीत्यात्मनो मरणं सूचयन्त्या प्रियया यात्रा निषिद्धा यतः।।

नेति। तव यात्रा न मे चिरं तापाय भवति; नात्र शङ्का कर्तव्या; यास्यसि चेत् याहि इत्यनुज्ञा। एवम् अनुजानत्याः तव यात्रा न मे चिरं तापाय इति वचनं मरणसूचनं(कं) यात्रा निवर्तयति। इत्यनुज्ञामुखेन गमनस्य आक्षेपात् अयम् अनुज्ञाक्षेपः।।१३५–१३६।।

---

**धनं च बहु लभ्यं ते सुखं क्षेमं च वर्त्मनि।**
**न च मे प्राणसन्देहस्तथापि प्रिय! मा स्म गाः॥१३७॥**

## रत्नश्री

बहु प्रभूतं धनं लभ्यं ते तवास्तु। अनेन योगो दर्शितः। क्षेमश्च लब्धधनरक्षणलक्षणः। सुखं च वर्त्मनि क्लेशाभावात् भवतु नाम। न च मे त्वद्वियुक्तायाः प्राणसन्देहो मरणमप्युपगतम्। तथाप्येवं गमनपरिपन्थिनिमित्ताभावेऽपि प्रिय मा स्म गाः न गन्तव्यम्। एवं तावन्मयेष्टमिति अव्याहतप्रणयप्रसरा काचिदाक्षिपति॥

तद् व्याचष्टे–

## हृदयङ्गमा

प्रभुत्वाक्षेपमुदाहरति, धनञ्चेत्यादि।–हे प्रिय! ते, विदेशगमने इति अध्याहार्य्यम्; बहु धनं सुखञ्च तथा वर्त्मनि पथि, क्षेमं कुशलञ्च, लभ्यम्, अत्र मे प्राणसन्देहश्च न, तव शीघ्रप्रत्यागमनस्य बहुधनलाभस्य च सम्भवादिति भावः, तथाऽपि मास्म गाः मा गच्छ॥१३७॥

## प्रभा

प्रभुत्वाक्षेपमाह–**धनं चेति।** अस्मिन् विदेशगमने ते धनं बहुलभ्यम्। व्यवहारनैपुण्यादिति भावः। चकारो भिन्नक्रमः। तथा चं ते वर्त्मनि सुखं च क्षेमं च स्यात् यात्रानुकूलसमयत्वात् सौराज्याच्चेति भावः। मे प्राणसंदेहोपि न त्वं सफलमनोरथोचिरादेव प्रत्यागमिष्यसीति मे दृढो विश्वासः। तथापि एवं सकलानुकूल्येपि हे प्रिय मा स्म गाः प्रेमभावार्द्राहं न त्वां मुञ्चामि त्वं मा गच्छ॥१३७॥

**प्रत्याचक्षाणया हेतून् प्रिययात्रां विबध्नतः।**
**प्रभुत्वेनैव रुद्धस्तत् प्रभुत्वाक्षेप इष्यते॥१३८॥**

## रत्नश्री

प्रियस्य यात्रां विबध्नतो विरुद्धान् हेतून् अयोगक्षेमादीन् तत्प्रतिपक्षप्रकाशनेन प्रत्याचक्षाणया निवारयन्त्या गन्तुकामस्य कस्यचित् प्रभुत्वेनैव कान्तविषयेण स्वातन्त्र्येण रुद्ध आक्षिप्तो यतस्तत् तस्मादीदृश एवंजातीयः प्रभुत्वाक्षेप इष्यत इति॥

## हृदयङ्गमा

इति एवं, प्रिययात्रायाः प्रियस्य विदेशगमनस्य, अनुबन्धिनः पोषकान्, हेतून् आचक्षाणया कीर्त्तयन्त्या, कयाचित् स्वाधीनपतिकया इति शेषः, प्रभुत्वेन स्वाधीनतया एव, रुद्धः विदेशगमनात् निवर्त्तितः, पतिरिति शेषः, तत् तस्मात्, एषः प्रभुत्वाक्षेप उच्यते ॥१३८॥

## प्रभा

उदाहरणं विशदयति–**इत्याचक्षाणयेति।** इति एवंप्रकारेण प्रिययात्रानुबन्धिनः प्रिययात्रानुकूलान् हेतून् धनलाभादीन् आचक्षाणया कथयन्त्या प्रभुत्वेनैव प्रेमभावस्वाधीनपतित्व-रूपसामर्थ्येनैव रुद्धः गमनान्निवारितः प्रिय इति शेषः। तत् तस्मात् प्रभुत्वाक्षेपः साधनानुकूल्येन अवश्यं करणीये गमने केवलं प्रभुत्वेनैव निषेधः प्रदर्शित इति प्रभुत्वाक्षेपः॥१३८॥

## विवृति

धनं च बहु लभ्यन्त इत्यादिकः प्रभुत्वाक्षेपः। कुतः प्रत्याचक्षणया निषेधन्त्या हेतून् कारणानि प्रिययात्राविबन्धिनः यैर्हेतुभिः प्रियप्रस्थानं निषिद्ध्येत स एकोऽपि नास्ति। तथाऽपि प्रिय मा स्म गा इति स्वप्रभुत्वेनैव प्रिययात्रा निषिद्धा यतः।।

**धनमिति।** गमनविरोधिनो हेतवो न विद्यन्ते, तथाऽपि मा गाः इति वचनं प्रभुत्वेन विना न घटते; इति प्रभुत्वेन गमनस्य आक्षिप्तत्वात् असौ प्रभुत्वाक्षेपः।।१३७–१३८।।

---

**जीविताशा बलवती धनाशा दुर्बला मम।**
**गच्छ वा तिष्ठ वा कान्त! स्वावस्था तु निवेदिता॥१३९॥**

## रत्नश्री

जीविते प्राणेष्वाशा आसक्तिः बलवती गरीयसी। मम धनेष्वाशा अभिलाषः पुनर्दुर्बला तन्वी। धनादपि मे जीवितं प्रियमित्यर्थः। ततो नाहं जीवितव्ययेन त्वद्यात्रासाध्यं धनमभिलषामि। त्वं पुनर्यथेच्छसि तथा कुरु। गच्छ वा तिष्ठ वा। न किंचित् मम अनया चिन्तया। तदपि किं त्वमीच्छसीत्याह-स्वावस्था तु निवेदितेति। स्वाभिप्रायः। पुनर्मया दर्शित एव, न मे जीविताद्धनं दयितम्, यतः प्राणमूल्येन तदुपादास्ये। जीवितमेवा[भिलषामि]। न किञ्चिन्मे तेन धनेनेति॥

तद्विभजते-

## हृदयङ्गमा

अनादराक्षेपमुदाहरति, जीविताशेत्यादि।-हे कान्त! मम जीविताशा जीवनेच्छा, बलवती दीर्घकालं जीवितुमिच्छामि इत्यर्थः, (एतेन तव विदेशगमने मम मरणस्यावश्यम्भावित्वं सूच्यते) अतः धनाशा मम दुर्बला तव विदेशगमने धनलाभो भविष्यति इत्येषा आकाङ्क्षा मम नास्तीत्यर्थः, अतः गच्छ वा तिष्ठ वा, स्वस्य अवस्था तु मरणरूपाभिप्रायस्तु इत्यर्थः, निवेदिता कथिता॥१३९॥

## प्रभा

अनादराक्षेपमाह–**जीविताशेति।** हे कान्त मम जीविताशा जीवनेच्छा। बलवती धनाशापेक्षया अधिकतरा। धनलाभापेक्षया त्वत्संनिधौ चिरं जीवितुमिच्छामि। धनाहरणाय त्वयि विदेशं गते न जीविष्यामि इति ध्वनिः। धनाशा दुर्बला जीविताशापेक्षया। अत एवं स्थिते त्वं गच्छ अथवा तिष्ठ। स्वावस्था मम भाविनी अवस्था मरणरूपा इत्यर्थः। अथवा मम वर्तमाना मनोवृत्तिर्निवेदिता।।१३९।।

---

**असावनादराक्षेपो यदनादरवद्वचः।**
**प्रियप्रयाणं रुन्धत्या प्रयुक्तमिह रक्तया॥१४०॥**

---

## रत्नश्री

[यत्] यस्मादिह प्रयोगे रक्तया कयाचित् प्रियस्य प्रयाणं रुन्धत्या आक्षिपन्त्या अनादरवदनादरोऽस्मिन्नस्तीति आस्थाशून्यं वचो वचनं गच्छ वा तिष्ठ वा इति प्रयुक्तम्, तस्मात् असौ ईदृशोऽनादराक्षेपः॥

## हृदयङ्गमा

इह रक्तया अनुरागिण्या, प्रियप्रयाणं पत्युर्विदेशगमनं, रुन्धत्या वारयन्त्या कयाचित्, यत् यस्मात्, अनादरवत् अनास्थाव्यञ्जकं, वचः गच्छ वा तिष्ठ वा इत्यादि वाक्यमित्यर्थः, प्रयुक्तम् अतः असौ अनादराक्षेप इति॥१४०॥

## प्रभा

उदाहरणं समर्थयते–**असाविति**। इह उदाहरणे प्रियप्रयाणं नायकस्य विदेशगमनम् रुन्धत्या परिहरन्त्या रक्तया अनुरागिण्या यद् अनादरवद् गच्छ वा तिष्ठ वेति अनादरसूचकं वचः प्रयुक्तम्। अतः असौ अनादराक्षेपः॥१४०॥

## विवृति

जीविताशा बलवतीत्यादिकः अनादराक्षेपः यतो गच्छ वा तिष्ठ वा कान्तेत्यनादरवद्वचःप्रयुक्तं रक्तया प्रियप्रयाणां रुन्धत्या निराकुर्वत्या।।

**जीवितेति।** गच्छ वा तिष्ठ वा इत्यनादरसहितं वचनं प्रियगमनं निरुणद्धि इत्यसौ अनादराक्षेपः।।१३९–१४०।।

---

**गच्छ गच्छसि चेत् कान्त! पन्थानः सन्तु ते शिवाः।**
**ममापि जन्म तत्रैव भूयाद् यत्र गतो भवान्॥१४१॥**

---

## रत्नश्री

[57a] कान्त, गच्छसि चेत्। यदि निश्चितं गमनम्, गच्छ। किं स्थीयते, [ते तव] पन्थानः शिवाः सुखावहाः सन्तु इदमाशास्महे। इदं चापरम्, ममापि तद्विरहग्रहापहृतजीविताया: जन्म प्रादुर्भावस्तत्रैव भूयात्, यत्र देशे गतो भवान्। न केवलं तव तत्र गमनमित्यपि शब्दः।।

तत्प्रतिपादयति–

## हृदयङ्गमा

आशीर्वचनाक्षेपमुदाहरति, गच्छेत्यादि। –हे कान्त! गच्छसि चेत् गच्छ, ते तव, पन्थानः शिवाः निर्विघ्नाः, सन्तु, किन्तु यत्र भवान् गतः तत्रैव ममापि जन्म भूयात्; अयं भावः,–तव गमनानन्तरमेव मम मरणं भविष्यति, मृतायाश्च अवश्यं जन्म भविता, तत् तु तव सन्निधौ भवति चेत् पुनस्त्वद्दर्शनं लप्स्ये इति।।१४१।।

## प्रभा

आशीर्वचनाक्षेपमुदाहरति–**गच्छेति।** हे कान्त गच्छसि चेद् यदि तव गमने निश्चयस्तर्हि गच्छ। पन्थानस्ते शिवाः कल्याणप्रदाः

सन्तु। यत्र भवान् गतो भविष्यतीति शेषः। तत्रैव ममापि जन्म भूयात् भवत्विति आशासे। त्वद्गमनानन्तरमचिरादेव त्वद्विरहवेदनया मरिष्यामि मृतायाश्च-पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम् इति क्रमेणावश्यं जननं भवेत्। तच्च यत्र भवांस्तिष्ठति तत्रैव भवतु। तथा सति पुनस्तत्र भवद्दर्शनं भविष्यतीति भावः।।१४१।।

---

**इत्याशीर्वचनाक्षेपो यदाशीर्वादवर्त्मना।**
**स्वावस्थां सूचयन्त्यैव कान्तयात्रा निषिध्यते॥१४२॥**

---

## रत्नश्री

यस्मादित्येवमाशीर्वादवर्त्मना इष्टाशंसनमुखेन कान्तस्य [यात्रा] गमनं निषिध्यते। स्वामवस्थां निधनप्राप्तिं कान्तप्रयाणकारणां सूचयन्त्या सव्याजमावेद्यन्त्या कयाचित् प्रियया। तस्मात् आशीर्वचनाक्षेपस्तादृश इति॥

## हृदयङ्गमा

अत्र आशीर्वादवर्त्मना आशीर्वचनरीत्या, "पन्थानः सन्तु ते शिवाः" इति वाक्येन इत्यर्थः, स्वावस्थां भाविमरणरूपां, सूचयन्त्या कान्तया, यत् यस्मात्, कान्तस्य यात्रा विदेशगनं, निषिध्यते अतः अयम् आशीर्वचनाक्षेपः, गच्छ इति विधिवाक्यस्य ममापि जन्म तत्रैव भूयात् इत्याशिषा अनुकूलतया मरणसूचनात् निषेधः प्रतीयते इति भावः॥१४२॥

## प्रभा

आशीर्वचनाक्षेपं विशदयति–**इतीति**। अत्र कान्तया आशीर्वादवर्त्मना आशीराशंसा सा चात्र सततप्रियदर्शनरूपा तस्या वादो ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान् इति प्रकारेण कथनम् तद्वर्त्मना तद्द्वारेणैव स्वावस्थां विरहेण मरणरूपाम् सूचयन्त्या तया कान्तस्य यात्रागमनं निषिध्यते। आशीर्वचनस्य ममापि जन्म तत्र स्यादित्यस्य भाविमरणसूचनद्वारा कान्तयात्राया आक्षेपाद् आशीर्वचनाक्षेपोयम्॥१४२॥

## विवृति

गच्छेत्यादिकः आशीर्वचनाक्षेपः यस्मादाशीर्वादवर्त्मना आशीर्वादव्याजेन कान्तया यात्रा निषिद्ध्यते ममापि जन्म तत्रैव देशे भूयाद्यत्र गतो भवान्। त्वयि गते क्षणमपि न जीवामीति स्वस्य मरणसूचनात्।।

**गच्छेति।** ममापि जन्म तत्रैव भूयात् इति मरणं सूचयन्त्या आशिषा कान्तयात्रानिरोधात् अयम् आशी-र्वचनाक्षेपः।।१४१–१४२।।

---

**यदि सत्यैव ते यात्रा काप्यन्या मृग्यतां त्वया।**
**अहमद्यैव रुद्धास्मि रन्ध्रापेक्षेण मृत्युना॥१४३॥**

## रत्नश्री

ते तव यात्रा गमनं सत्यैव नियतैव यदि [न] वचनमात्रं, तदा कापि काचिदन्या प्रिया मृग्यताम् अन्विष्यताम् त्वया स्त्रीवधवल्लभेन। पूर्णो ममावधिः। यदाह–अद्यैव न कालान्तरे साहं रुद्धा क्रोड़ीकृता अस्मि मृत्युना रन्ध्रं त्वद्विरहादिलक्षणम् अवकाशम् अपेक्षमाणेन। त्यज्यतामस्मत्प्रत्याशा। न चाहं तव किञ्चिदिति॥

तदभिधत्ते–

## हृदयङ्गमा

परुषाक्षेपमुदाहरति, यदीत्यादि।–यदि ते तव, यात्रा विदेशगमनं, सत्यैव, तदा त्वया अन्या काऽपि प्रियतमा, मृग्यताम् अन्विष्यताम्, अहं रन्ध्रापेक्षेण छिद्रानुसन्धायिना, तव विदेशयात्रारूपं छिद्रं लभमानेनेत्यर्थः, मृत्युना अद्यैव, न तु कालान्तरे इति भावः, रुद्धा आक्रान्ता, अस्मि, अद्यैव मम मृत्युर्भविष्यति इति भावः॥१४३॥

## प्रभा

परुषाक्षेपमुदाहरति–**यदीति**। यदि ते यात्रा सत्यैव तर्हि कापि अन्या तद्विरहेपि जीवितुं समर्था त्वया मृग्यतां सुखोपभोगाय अन्विष्यताम्। ननु त्वयि प्रेयस्यां सत्यां कोयमुपदेश इति चेत् कथयति। अहम् अद्यैव रन्ध्रापेक्षेण रन्ध्रस्य अपेक्षा यस्य तेन छिद्रान्वेषणतत्परेण मृत्युना रुद्धास्मि आक्रान्तास्मि॥१४३॥

**इत्येवं परुषाक्षेपः परुषाक्षरपूर्वकम्।**
**कान्तस्याक्षिप्यते यस्मात् प्रस्थानं प्रेमनिघ्नया॥१४४॥**

## रत्नश्री

इत्येवं परुषं निरपेक्षमक्षरं वचनं पूर्वं यस्मिन् आक्षेप इति क्रियाविशेषणम्। कान्तस्य प्रस्थानं यात्रा आक्षिप्यते। प्रेमनिघ्नया कयाचिदनुरागपरवशया यस्मात् ततः परुषाक्षेप एष इति॥

## हृदयङ्गमा

इति उक्तरूपः, प्रेमनिघ्नया अनुरागवशवर्त्तिन्या कयाचित्, यस्मात् परुषाक्षरपूर्वकं निष्ठुरवचनपुरः सरं, "काऽप्यन्या मृग्यताम्" "अद्यैव मृत्युना रुद्धाऽस्मि" इत्येवंरूपमित्यर्थः, कान्तस्य प्रस्थानं विदेशगमनम्, आक्षिप्यते निषिध्यते, अतः एष परुषाक्षेपः॥१४४॥

## प्रभा

उदाहरणं विशदयति–**इतीति**। प्रेमनिघ्नया प्रेमपराधीनया कान्तया। कान्तस्य यस्मात् परुषाक्षरपूर्वकम्–काप्यन्या मृग्यतां त्वया। अहमद्यैव रुद्धास्मि मृत्युना इत्यादिकठोरार्थकवाक्यपुरः सरम् प्रस्थानं देशान्तरप्रवास आक्षिप्यते निषिध्यते। तस्माद् अयं परुषाक्षेपः॥१४४॥

## विवृति

यदि सत्यैव यात्रा ते काऽप्यन्या पत्नी गृह्यतां ततो (त्वया अ)हं पुनरद्यैव रुद्धा स्वीकृताऽस्मिरन्ध्रापेक्षेण छिद्रान्वेषिणा मृत्युना। भवता सहेपि यामे (भवतो गृहान्निर्गभे) मम मरणं पश्यामीति परुषाक्षरं कुर्वन् किं (परुषाक्षरपूर्वकं)-स(स्व)मरणमावेदन्त्या यतः कान्तयात्रा निषिद्ध्यते ततोऽयं परुषाक्षेप उच्यते।।१४३–१४४।।

---

**गन्ता चेद् गच्छ तूर्णं ते कर्णौ यन्ति पुरा रवाः।**
**आर्तबन्धुमुखोद्गीर्णाः प्रयाणप्रतिबन्धिनः॥१४५॥**

---

## रत्नश्री

गन्ता गच्छसि चेत्। गच्छ तूर्णं शीघ्रं मा विलम्बिष्ठाः, यतोऽमङ्गलपरिहारः स्यात्। यदाह–आर्तानामेतन्मरणशोक तुराणां बन्धूनां मुखैरुद्गीर्णा मुक्ता रवा आक्रन्दाः प्रयाणं प्रतिबध्नन्तः तव कर्णं पुरा यन्ति यास्यन्ति यावत् ते नोत्तिष्ठन्ति तावदेव गच्छेति॥

तद्विभजते–

## हृदयङ्गमा

साचिव्याक्षेपमुदाहरति, गन्तेत्यादि।–हे कान्त! गन्ता गामी चेत्, गमिष्यसि यदीत्यर्थः, (भविष्यदर्थे तृन्) तूर्णं गच्छआर्तानां शोकाकुलानां, मन्मरणेनेति भावः, बन्धूनां मुखोदगीर्णा मुखोच्चरिताः, प्रयाणपरिपन्थिनः विदेशयात्राप्रतिरोधिनः, रवाः मन्मृत्युसूचका वर्णाः, ते कर्णौ पुरा यान्ति श्रवणगोचरीभविष्यन्ति इत्यर्थः। (पुरायोगे भविष्यदर्थे लट्)॥१४५॥

## प्रभा

साचिव्याक्षेपमाह–गन्ता चेदिति। भवान् गन्ता चेत् निश्चितभाविगमनश्चेत्। गन्तेति लुटः रूपम्। तूर्णं द्रुतम् गच्छ। किमिति त्वरयसे मामिति चेत् कथयति। आर्तबन्धुमुखोद्गीर्णां आर्ता मद्विनाशेन दुःखिता ये बन्धवस्तैर्मुखोद्गीर्णा मुखोच्चरिताः प्रयाणपरिपन्थिनो यात्राप्रतिबन्धका रवा मन्मरणसूचका ध्वनयस्ते कर्णौ कर्णयुगलम् पुरा यान्ति यास्यन्ति। यावत्पुरानिपातयोर्लट् इति पुरा शब्दयोगे भविष्यति लट्॥१४५॥

---

## विवृति

यदि सत्यैव यात्रा ते काऽप्यन्या पत्नी गृह्यतां ततो (त्वया अ)हं पुनरद्यैव रुद्धा स्वीकृताऽस्मिरन्ध्रापेक्षेण छिद्रान्वेषिणा मृत्युना। भवता सहेपि यामे (भवतो गृहान्निर्गभे) मम मरणं पश्यामीति परुषाक्षरं कुर्वन् किं (परुषाक्षरपूर्वकं)-स(स्व)मरणमावेदन्त्या यतः कान्तयात्रा निषिद्धयते ततोऽयं परुषाक्षेप उच्यते।।१४३–१४४।।

---

**गन्ता चेद् गच्छ तूर्णं ते कर्णौ यन्ति पुरा रवाः।**
**आर्तबन्धुमुखोद्गीर्णाः प्रयाणप्रतिबन्धिनः॥१४५॥**

## रत्नश्री

गन्ता गच्छसि चेत्। गच्छ तूर्णं शीघ्रं मा विलम्बिष्ठाः, यतोऽमङ्गलपरिहारः स्यात्। यदाह–आर्तानामेतन्मरणशोक तुराणां बन्धूनां मुखैरुद्गीर्णा मुक्ता रवा आक्रन्दाः प्रयाणं प्रतिबध्नन्तः तव कर्णं पुरा यन्ति यास्यन्ति यावत् ते नोत्तिष्ठन्ति तावदेव गच्छेति॥

तद्विभजते–

## हृदयङ्गमा

साचिव्याक्षेपमुदाहरति, गन्तेत्यादि।–हे कान्त! गन्ता गामी चेत्, गमिष्यसि यदीत्यर्थः, (भविष्यदर्थे तृन्) तूर्णं गच्छआर्त्तानां शोकाकुलानां, मन्मरणेनेति भावः, बन्धूनां मुखोदगीर्णा मुखोच्चरिताः, प्रयाणपरिपन्थिनः विदेशयात्राप्रतिरोधिनः, रवाः मन्मृत्युसूचका वर्णाः, ते कर्णौ पुरा यान्ति श्रवणगोचरीभविष्यन्ति इत्यर्थः। (पुरायोगे भविष्यदर्थे लट्)॥१४५॥

## प्रभा

साचिव्याक्षेपमाह–**गन्ता चेदिति।** भवान् गन्ता चेन् निश्चितभाविगमनश्चेत्। गन्तेति लुटः रूपम्। तूर्णं द्रुतम् गच्छ। किमिति त्वरयसे मामिति चेत् कथयति। आर्तबन्धुमुखोद्गीर्णा आर्ता मद्विनाशेन दुःखिता ये बन्धवस्तैर्मुखोद्गीर्णा मुखोच्चारिताः प्रयाणपरिपन्थिनो यात्राप्रतिबन्धका रवा मन्मरणसूचका ध्वनयस्ते कर्णौ कर्णयुगलम् पुरा यान्ति यास्यन्ति। यावत्पुरानिपातयोर्लट् इति पुरा शब्दयोगे भविष्यति लट्॥१४५॥

---

**साचिव्याक्षेप एवैष यदत्र प्रतिषिध्यते।**
**प्रियप्रयाणं साचिव्यं कुर्वत्यैवातिरक्तया॥१४६॥**

## रत्नश्री

यद्यस्मात्। अत्र प्रयाणे सा[चि]व्यं सहायभावं कुर्वत्यैव कयाचित् अतिरक्तया प्रियस्य प्रयाणं निपुणं प्रतिषिध्यते। ततः साचिव्ययोगादेष ईदृशः साचिव्याक्षेप एवेति॥

## हृदयङ्गमा

अत्र अनुरक्तया कयाचित, साचिव्यं सहायतां, तूर्णं गच्छेत्यनेनेति भावः, कुर्वत्या इव दर्शयन्त्या इव, यत् यस्मात्, प्रियप्रयाणं प्रियस्य विदेशयात्रा, प्रतिषिध्यते अत एव एष साचिव्याक्षेपः॥१४६॥

## प्रभा

उदाहरणं नामाक्षरेण योजयति–**साचिव्याक्षेप इति।** यदत्र यस्माद् अत्र एतादृशवर्णनायाम् साचिव्यं कुर्वत्या इव तूर्णं गच्छ इति साहाय्यम् आचरन्त्येव अतिरक्तया प्रेमासक्तया प्रियप्रयाणं नायकगमनम् प्रतिषिध्यते स्वमरणसूचनेन निषिध्यते। तस्मादेष साचिव्याक्षेपः साहाय्यपूर्वकनिषेधादिति भावः॥१४६॥

## विवृति

गन्ता चेद्गच्छ हे प्रिय यद्यवश्यं गन्ता भवान् तर्हि गच्छ त्वम्। गते हि (गन्तेति) भविष्यति लुटः प्रथमस्यैकवचने 'लुटः प्रथमस्य डा रौ रसः' इति डिति टिलोपे। तूर्णं शीघ्रं ते नच(तव) कर्णं

यास्यन्ति(यान्ति) पुरा रवाः शब्दाः। पुरा यान्तीत्ति भविष्यति काले पुरायोगे 'यावत् पुरा निपातयोर्लट्'। आर्तबन्धुमुखोद्गीर्णाः दुःखितबन्धुजनाननोदीरिताः प्रयाणप्रतिबन्धिनः प्रयाणं प्रतिबन्धति शीलाः एवंशीलाः (बन्धन्तीत्येवंशीलाः)। मयि मृतायां भवद्बन्धुषु रुदत्सु कथं भवान् यास्यसीति एष साचिव्याक्षपेः। सचिवोऽमात्यस्तस्य भावः साचिव्यं तेन प्रियप्रयाणप्रतिषेधात्।।

**गन्तेति।** साचिव्यं साहाय्यम्। साचिव्यानुज्ञाक्षेपयोः अयं भेदः—साचिव्याक्षेपे नियोगपूर्वः स्यात् अभ्युपगमः, अनुज्ञाक्षेपे तु अभ्युपगममात्रम्, इति।।१४५—१४६।।

---

**गच्छेति वक्तु मिच्छामि मत्प्रिय! त्वत्प्रियैषिणी।**
**निर्गच्छति मुखाद् वाणी मा गा इति करोमि किम्॥१४७॥**

---

## रत्नश्री

मम प्रिय वल्लभ! तव प्रियं प्रयाणमिच्छन्ती सती गच्छेति वक्तुमिच्छामि। तथाप्यनिच्छन्त्या एव मे मुखात् मा गास्त्वमिति वाणी [57b] वचनं निर्गच्छति। किंमहं करोमि। न मे कश्चित् तावद्दोषः। त्वत्प्रियं मत्प्रियैषिणीति पाठे गच्छेत्येतत् तव प्रियं वक्तुमिच्छामि मम प्रियमिच्छन्ती वाणी मा गा इति निर्गच्छतीति व्याख्येयमिति॥

तद्विवृणोति–

## हृदयङ्गमा

यत्नाक्षेपं निरूपयति, गच्छेत्यादि।–त्वत्प्रियं तव अनुकूलं, गच्छ इति वचः, वक्तुम् इच्छामि, किन्तु मुखात् मा गा न गच्छ, इति मत्प्रियैषिणी वाणी निर्गच्छति, किं करोमि? गृहे त्वदवस्थानस्यैव मत्प्रियत्वात् इति भावः॥१४७॥

## प्रभा

यत्नाक्षेपमाह–**गच्छेति**। हे मत्प्रिय जीवितेश्वर त्वत्प्रियैषिणी त्वत्प्रियानुसरणशीला अहमस्मि। अतो गच्छ त्वं याहि इति वक्तुमिच्छामि। परं मुखाद्वाणी मा गा इति निर्गच्छति। अन्तर्भावानुसारित्वाद् वाग्देव्या इति भावः। किं करोमि नास्ति अत्र कोप्युपायः। गच्छेति वक्तुं कृतप्रयत्नापि विफलपरिश्रमा

भवामीत्यर्थः। अत्र त्वत्प्रियं मत्प्रियैषिणी इत्यपि पाठः साधुः। अर्थस्तु स्पष्ट एव।।१४७।।

## विवृति

गच्छेति वक्तुमिच्छामि मा गा इति तु वाणी निर्गच्छति त(म)न्मुखादिह किं करोमि। स एष यत्नाक्षेप उच्यते। अनिष्टवस्तुनि कृतस्य यत्नस्यानर्थक्यं च विपरीतफलोत्पत्तेः गच्छेत्येतस्य विपरीतफलमाह इति। प्रस्थितस्य 'मा गाः प्रियतम' 'क्व यास्यती' त्यमङ्गलमेतद्यतः।।१४७।।

**यत्नाक्षेपः स यत्नस्य कृतस्यानिष्टवस्तुनि।**
**विपरीत फलोत्पत्तेरानर्थक्योपदर्शनात्॥१४८॥**

## रत्नश्री

स तादृशः यत्नाक्षेपो ज्ञेयः। अतः अनिष्टे वस्तुनि प्रियप्रयाणे तत्सिद्धये कृतस्य यत्नस्य श्रमस्ये[ति यावत्] गच्छेति वक्तुमिच्छामीति विपरीतं विरुद्धं मा गा इति वचनरूपं फलं कार्यमुत्पन्नम्। तस्योत्पत्तेः कारणात् स यत्नोऽनर्थको जातः। तस्मादानर्थक्योपदर्शनात् प्रकाशनाद् यत्नाक्षेपः स इति निगमयितव्यम्॥

## हृदयङ्गमा

अत्र अनिष्टवस्तुनि गच्छेति वचनविधाने, कृतस्यापि यत्नस्य विपरीतस्य फलस्य मा गा इति वाणीनिःसरणरूपस्य, उत्पत्तेः हेतोः, आनर्थक्योपदर्शनात् प्रयाणे अनर्थसम्भवद्योतनात्, किमः प्रश्नार्थत्वेऽपि युक्त्या निषेधार्थत्वस्य प्रतीयमानत्वेन विदेशगमनमाक्षिप्तत्वात् इति भावः, सः अयं यत्नाक्षेपः॥१४८॥

## प्रभा

नामार्थं उदाहरणेन संयोजयति–**यत्नाक्षेप इति।** अनिष्टवस्तुनि गच्छेति गमनविधानरूपानिष्टकार्ये कृतस्यापि यत्नस्य विपरीतफलोत्पत्तेर्विपरीतं मा गा इति वचननिः सरणरूपं यत् फलं तस्य उत्पत्तेर्हेतोरानर्थक्योपदर्शनाद् आनर्थक्यस्य गच्छेति वक्तुं कृतो यः प्रयत्नस्तस्य विफलताया उपदर्शनान् मा गा इति

विरुद्धवचननिःसरणेनावगमाद् यत्नाक्षेपः प्रियानुसरणकृतयत्नस्य आक्षेपो वैफल्येन निषेधः। इति यत्नाक्षेपालंकारः॥१४८॥

## विवृति

**यत्नाक्षेप** इति। यत्नाक्षेपः यत्ननिषेधः। अनभिमते कान्तगमनाभ्युपगमे कृतस्य यत्नस्य, मा गाः इति अनभ्युपगमकथनात् निषेधो जायते इत्ययं यत्नाक्षेपः। विपरीतफलोत्पत्तिः मा गाः इति वचनम्। यत्नस्य आनर्थक्यं वैयर्थ्यं निषेधः इति यावत्॥१४८॥

---

**क्षणं दर्शनविघ्नाय पक्ष्मास्पन्दाय कुप्यतः।**
**प्रेम्णः प्रयाणं ते ब्रूहि मया तस्येष्टमिष्यते॥१४९॥**

---

## रत्नश्री

ते तव प्रयाणक्षणं दर्शनस्य विघ्नाय पक्ष्मास्पन्दाय चक्षुर्निमेषाय कुप्यतः प्रेम्णः स्नेहस्य ब्रूहि कथय। वचनविषयस्य सम्बन्धित्वेन विवक्षितत्वात् षष्ठी। किमेवमित्याह-यत् तस्य प्रेम्णोपदिष्टमनुमतं किञ्चित् तन्मयेष्यते। नाहं स्वतन्त्रा किं तवाविदितम्? तस्मात् प्रेमैव भावय। तच्चेदनुमन्यते के वयमन्यथाकर्तुमिति॥

तदुद्भावयति-

## हृदयङ्गमा

परवशाक्षेपमुदाहरति, क्षणमित्यादि। -हे कान्त! त्वं क्षणं व्याप्य दर्शनविघ्नाय दर्शनप्रतिबन्धकाय, पक्ष्मस्पन्दाय नेत्रलोमस्पन्दनाय, कुप्यतः पक्ष्मस्पन्दनमपि सोढुमसमर्थतया तं प्रति क्रुध्यत इत्यर्थः, प्रेम्णः अनुरागापरनाम्नः, प्रयाणं यात्रानुमतिं, ब्रूहि प्रार्थय, मया तस्य प्रेम्णः एव, इष्टम् इष्यते प्रेमाधीनाया मम अनुज्ञया अलं, प्रेम्णः अभिमतञ्चेत् तव गमनं तदा गच्छ, क्षणवियोगविधुरस्य प्रेम्णस्तत्तु नाभिमतमिति भावः॥१४९॥

## प्रभा

परवशाक्षेपमाह-**क्षणेति**। हे नाथ क्षणं पलमात्रम् त्वद्दर्शनस्य त्वन्निरीक्षणस्य विघ्नो व्यत्ययो यस्मात् तस्मै पक्ष्मस्पन्दाय पक्ष्मणां

नेत्रलोम्नां स्पन्दाय निमेषोन्मेषरूपाय। कुप्यतः निमेषमप्यसहमानस्य। प्रेम्णोनुरागं प्रति। कर्मणि षष्ठी। प्रयाणं ब्रूहि निवेदय। ननु त्वामेव प्रार्थये किमिति प्रेमप्रार्थनामुपदिशसि चेत् तत्राह। मया प्रेमाधीनयेति भावः। तस्य प्रेम्ण इष्टम् अभिलषितम् इष्यते वाञ्छ्यते। प्रेमपराधीनाया मम प्रार्थनयालम्। यदि तस्यानुमतिस्तर्हि गच्छ। नाहं प्रतिकूला भवामि। परं त्वद्दर्शनस्य क्षणविच्छेदासहिष्णुः स प्रेमा कथमनुज्ञां दास्यति इति त्वमेव विचारय। सर्वथा तन्नानुमंस्यते इति भावः।।१४९।।

## विवृति

ते तव प्रयाण.... .... लभ्यस्य (?) यत् (क्रु)ध्यति प्रेम तत् किं विरहव्यथां सहिष्यते न च (तवे)ति स एष पारवश्याक्षेपः यत् यस्मात् प्रेमपरतन्त्रया प्रेमपराधीनया तया कान्तया निषिद्ध्यते यात्राप्रियमस्यान्यस्यार्थस्य मरणस्योपसूचनात्।।१४९।।

---

**अयं परवशाक्षेपो यत्प्रेमपरतन्त्रया।**
**तया निषिध्यते यात्रा तस्यार्थस्योपसूचनात्॥१५०॥**

---

## रत्नश्री

अयमीदृशः परवशाक्षेपः कुतः प्रेमपरतन्त्रया स्नेहनिघ्नया तया प्रियया कयाचित् यात्रा प्रियस्य निषिध्यते इति यदेतत् तस्येदृशस्यार्थस्य वस्तुन उपसूचनादुद्भावनादिति॥

## हृदयङ्गमा

प्रयाणानुमतिं कामयमानं पतिं प्रति कस्याश्चिदुक्तिरियम्। यत् यस्मात्, प्रेमपरतन्त्रया प्रेमपरवशया, तया नायिकया, अन्यार्थस्य प्रेमानुमतिग्रहणरूपस्य, उपदर्शनात् प्रदर्शनात्, उपदेशात् इति यावत्, इति उक्तरूपेण, यात्रा कान्तस्य विदेशगमनं, निषिध्यते अतः अयं सः प्रसिद्धः, परवशाक्षेपः॥१५०॥

## प्रभा

अलंकारसंज्ञार्थं योजयति–**अयमिति।** यद् यस्मात्। प्रेमापरतन्त्रया स्वस्य अत्यन्तं प्रेमपराधीनया तया नायिकया अन्यस्य स्वापेक्षया भिन्नस्य प्रेमानुज्ञारूपस्य अर्थस्य वस्तुन उपसूचनात् कथनाद् यात्रा निषिध्यते। अतोयं परवशाक्षेपः॥१५०॥

## विवृति

**क्षणमिति।** त्वद्दर्शने क्षणमात्रं विघातभूतं पक्ष्मस्पन्दमपि न सहते यत्, यस्य अहं अधीना प्रेम्णः, तस्य यदिष्टं, मया तदिष्यते; तस्य ते प्रयाणं ब्रूहि–इति वदन्त्या प्रेमपारतन्त्र्यं च आत्मनः, प्रेम्णः स्वभावश्चयात्राप्रतिबन्धी, सूचितः ; इति पारवश्यद्वारेण आक्षिप्तत्वात् अयं परवशाक्षेपः।।१५०।।

---

सहिष्ये विरहं नाथ! देह्यदृश्याञ्जनं मम।
यदक्तनेत्रां कन्दर्पः प्रहर्ता मां न पश्यति॥१५१॥

## रत्नश्री

नाथ! तव विरहं दुःसहमप्यहं सहिष्ये यापयामि। किं तु अ[दर्शनसाधन]मञ्जनं किञ्चिन्मे देहि। किं तेन? येनादृश्याञ्जनेनाक्ते स्पृष्टे नेत्रे यस्यास्तां मां न पश्यति कन्दर्पः कामः प्रहर्ता हन्ता। अपश्यतः कथं प्रहरेदिति॥

तत्प्रकाशयति–

## हृदयङ्गमा

उपायाक्षेपमाह, सहिष्ये इत्यादि। –हे नाथ! तव विरहं सहिष्ये, मम मह्यम्, अदृश्याञ्जनम् अदर्शनजनकं सिद्धकज्जलविशेषं, देहि; किं तत इत्याह, यदिति। –कन्दर्पः येन कज्जलेन, अक्ते लिप्ते, नेत्रे यस्याः तादृशीं, मां प्रहर्त्तुं न पश्यति, तव विरहे कन्दर्पो मां व्यथयिष्यति, यदि तस्याशङ्का न स्यात्, तदा तव प्रयाणे न हानिरिति भावः॥१५१॥

## प्रभा

उपायाक्षेपमाह–**सहिष्ये इति**। हे नाथ विरहं त्वद्वियोगम् सहिष्ये। किंतु तदर्थं अदृश्याञ्जनं अदर्शनसंपादकं कज्जलविशेषम्

देहि। किं तेनेति चेदाह। येन अञ्जनेन अक्ते म्रक्षिते नेत्रे यस्याः सा ताम् माम् प्रहर्ता प्रहारशीलः ताच्छील्ये तृन्-कन्दर्पो न पश्यति न पश्येत्। तेन च त्वद्विरहे स मां न पीडयेद् इति भावः। त्वयि प्रयाणाभिमुखे कन्दर्पबाधैव मां तरलीकरोति। तन्निवर्तनक्षमश्चेत् त्वं सुखेन याहीत्यर्थः।।१५१।।

---

**दुष्करं जीवितोपायमुपन्यस्योपरुध्यते।**
**पत्युः प्रस्थानमित्याहुरुपायाक्षेपमीदृशम्।।१५२।।**

## रत्नश्री

दुष्करं दुर्लभं जीवितस्योपायं अदृश्याञ्जनरूपमुपन्यस्य पत्युः प्रस्थानमुपरुध्यते इति हेतोरीदृशमुपायाक्षेपमाहुस्तद्विद इति।।

## हृदयङ्गमा

अत्र दुष्करं कथमपि साधयितुमशक्यं, जीवनोपायं कामादर्शनजनकसिद्धाञ्जनविशेषदानरूपम्, उपन्यस्य तदसम्भवात् पत्युः प्रस्थानं विदेशयात्रा, उपरुध्यते प्रतिषिध्यते, इति हेतोः, ईदृशम् उपायाक्षेपम् आहुः, कवय इति शेषः।।१५२।।

## प्रभा

दुष्करमिति–दुष्करं दुर्घटम् जीवनोपायं कामकर्तृकविलोकन–निवारणाय अदर्शनसंपादकसिद्धाञ्जनदानरूपम् उपन्यस्य कथयित्वा पत्युः प्रस्थानं यात्रा उपरुध्यते तादृशाञ्जनप्राप्तेरसंभवात् प्रतिषिध्यते। ईदृशम् एवंप्रकारकम् उपायाक्षेपम् उपायेन अशक्योपायेन आक्षेपो निषेधस्तम् उपायाक्षेपम्। कवय आहुरिति शेषः।।१५२।।

**प्रवृत्तैव प्रयामीति वाणी वल्लभ! ते मुखात्।**
**अयतापि त्वयेदानीं मन्दप्रेम्णा ममास्ति किम्॥१५३॥**

---

## रत्नश्री

वल्लभ! ते तव मुखात् प्रवृत्ता एव तावत्प्रयामीति वाणी वचनम्। तदेवं मन्द प्रेम्णा मन्दं प्रेमा अस्येति निरपेक्षेण त्वया कथञ्चित् अयता अगच्छतापि सता [58a] इदानीं मम किमस्ति कार्यम्? न किञ्चित्। [मनसि शिथिलादरस्य तव] गमनमगमनं चेदानीं तुल्यमिति॥

तद्विवृणोति–

## हृदयङ्गमा

रोषाक्षेपमुदाहरति, प्रवृत्तैवेत्यादि। –हे वल्लभ! ते तव, मुखात् प्रयामि गच्छामि, इति वाणी प्रवृत्ता उच्चरिता एव, अतिविशुद्धमावयोः प्रेम, तादृशे प्रेम्णि तव प्रयाणं दूरापास्तं, प्रयामीति तदर्थकवाणीनिःसरणमपि नैव सम्भवतीति भावः। अतः अनुरागस्तादृशोऽपि त्वया शिथिलीकृत इत्याशयेनाह, अयतेति। –इदानीं मन्दप्रेम्णा शिथिलितानुरागेण, अयता गच्छताऽपि, त्वया मम किम् अस्ति? न किमपि प्रयोजनमस्तीत्यर्थः। (अयतेति "इ गतौ" इत्यस्मात् भौवादिकात् शतरि निष्पन्नम्)॥१५३॥

## प्रभा

रोषाक्षेपमुदाहरति–**प्रवृत्तैवेति**। हे वल्लभ दयित। ते मुखात् प्रयामि गच्छामि इति वाणी प्रवृत्तैव निःसृतैव। अत्र एवकारेण

क्तप्रत्ययेन च अतिविस्मयो ध्वन्यते। मां प्राणेश्वरीति मन्यमानस्य तव वदनादीदृशं प्रयामीति वचनं प्राणवियोगवचनमिवातिदुःसहम्। तत्तु त्वयोच्चारितमेव। अतस्त्वया सर्वथा प्रेमबन्धः शिथिलीकृतः। तस्माद् इदानीं प्रयामीति उक्तेरनन्तरम् मन्दप्रेम्णा त्वया अयतापि अगच्छतापि मम किमस्ति किं प्रयोजनम्। त्वच्छिथिलप्रेम्णा सर्वथा दूये इति भावः।।१५३।।

---

**रोषाक्षेपोऽयमुद्रिक्तस्नेहनिर्यन्त्रणात्मया।**
**संरब्धया प्रियारब्धं प्रयाणं यन्निवार्यते॥१५४॥**

## रत्नश्री

यद् यस्मात् उद्रिक्तेनाधिमात्रेण स्नेहेन निर्यन्त्रण उद्दामः आत्मा चित्तं यस्याः तया अत एव संरब्धया आविष्कृतरोषया प्रियेणारब्धं कर्तुमभिप्रेतं प्रयाणं निवार्यते। तस्मादयमीदृशो रोषाक्षेपः, कोपावेशेन निषेधादिति॥

## हृदयङ्गमा

अत्र उद्रिक्तेन अतिरिक्तेन, स्नेहेन प्रेम्णा, निर्यन्त्रितः आक्रान्तः, आत्मा यस्यास्तादृश्या, संरब्धया कुपितया कयाचित्, प्रियेण आरब्धम् उद्युक्तं, प्रयाणं प्रियकृतविदेशगमनोद्योग इत्यर्थः, यत् यस्मात्, निषिध्यते अतः अयं रोषाक्षेपः॥१५४॥

## प्रभा

संज्ञार्थं घटयति–**रोषाक्षेपोयमिति**। उद्रिक्तः अतिशयस्य परं काष्ठां गतो यः स्नेहः प्रेमा तेन निर्यन्त्रितो विह्वलीकृत आत्मा अन्तः करणं यस्याः सा तया। संरब्धया संदर्शितकोपावेशया प्रियारब्धम् प्रियेण आरभ्यमाणम् प्रयाणं गमनम् यद् यस्मान्निषिध्यते तस्माद् अयं रोषाक्षेपो रोषेण आक्षपो रोषाक्षेपः। अस्मिन्नुदाहरणे निषेधो व्यङ्ग्यः॥१५४॥

**नाघ्रातं न कृतं कर्णे स्त्रीभिर्मधुनि नार्पितम्।**
**त्वद्द्विषां दीर्घिकास्वेव विशीर्णं जीर्णमुत्पलम्॥१५५॥**

## रत्नश्री

स्त्रीभिर्नाघ्रातं नच कर्णे कृतं श्रवणावतंसकृत्ये नियुक्तम्। मधुनि च नार्पितम्। एतावानेवोत्पलस्योपयोगः। केवलं तव द्विषामरातीनां हतानां दीर्घिकास्वेव शून्यासु विशीर्णं परिक्षतं जीर्णं परिणतं उत्पलमभवदिति॥

तदाविष्करोति–

## हृदयङ्गमा

मूर्च्छाक्षेपं निरूपयति, मुग्धेत्यादि।–मुग्धा सरलस्वभावा काचित्, कान्तस्य यात्राया विदेशगमनस्य, उक्तिश्रवणात् एव, न तु विदेशगमनात् इति भावः, मूर्च्छिता मोहं प्राप्ता, अथ बुद्धा संज्ञा लब्ध्वा, (बुद्धेति पाठे–सञ्जातचैतन्या) प्रियं दृष्टवा वक्ति, भवान् किं कथं, चिरेण आगतः?॥१५५॥

## प्रभा

मूर्छाक्षेपमुदाहरति–**मुग्धेति।** मुग्धा सुन्दरी। कान्तस्य यात्रोक्तिश्रवणादेव प्रयाणवचनश्रवणादेव न तु प्रयाणदर्शनान् मूर्छिता मोहं प्राप्ता। बुद्ध्वा मूर्छापगमात् संज्ञां लब्ध्वा प्रियं च दृष्ट्वा वक्ति किं चिरेण आगतो भवानिति। कथं चिरकालेन त्वमागतोसि इति पृच्छतीत्यर्थः॥१५५॥

## विवृति

**सहिष्ये** चिरमित्यादिरुपायाक्षेपः यतो (जीवनस्य यो दृश्याञ्जनं) नाम उपायः स दुष्करः तमुपन्यस्य पत्युः प्रस्थानं रूध्यते। ज्वरहरतक्षकचूडालङ्कार (मण्याहरणवद) शक्यानुष्ठानत्वात्।। १५१-१५२।।

प्रवृत्तैव तव मुखाद्वाणी प्रयामि गमिष्यामीति ''वर्तमानसामीप्ये वर्तमानवद्वा' इति वृद्धय (भविष्यद)र्थे लड्विधानम्। इदानीं हे वल्लभ! अयाताऽपि अगमिष्यतापि त्वया मयि मन्दप्रेम्णा विगतस्नेहेन स्थितेनापि किम्। रोषाक्षेपोयं नाम उद्रिक्तस्नेहनिर्यन्त्रणान्मा(न्त्रितात्मना) समधिकस्नेहनिबन्धान्मा (द्धात्मना)सा(सं)रब्धया कुपितया प्रियारब्धं प्रयाणं त(य)न्निषिद्धयते।।

**प्रवृत्तैवेति।** अगच्छताऽपि मन्दप्रियेण त्वया मम किम् इति सम्बन्धः।।१५५।।

---

**असावनुक्रोशाक्षेपः सानुक्रोशमिवोत्पले।**
**व्यावृत्य कर्म तद्योग्यं शोच्यावस्थोपवर्णनात्॥१५६॥**

## रत्नश्री

असौ तादृशः अनुक्रोशाक्षेपो ज्ञेयः। कुतः? उत्पले उत्पलविषये सानुक्रोशमिव सकरुणमिव। उत्पलेऽचेतने साक्षादनुक्रोशाभावादिव [शब्द] प्रयोगः। व्यावर्तनक्रियाविशेषणं चैतत्। यदाह-तस्योत्पलस्य योग्यमुचितं कर्म घ्राणादि व्यावृत्य निराकृत्य नाघ्रातमित्यादिना शोच्यायाः क्रियापदस्यावस्थाया विशीर्णत्वादेरुपदर्शनादिति॥

## हृदयङ्गमा

एतादृशं विलम्बं कृत्वा कथमागतोऽसीत्यर्थः। इति उक्तरूपेण, तत्काले गमनश्रवणकाले, सम्भूता मूर्च्छा यस्याः तया, कातराक्ष्या मुग्धया, कान्तस्य गतिः यत् अक्षिप्यते निषिध्यते, स ईदृशः मूर्च्छाक्षेपः॥१५६॥

## प्रभा

संज्ञार्थं योजयति-**इतीति।** इति एवंप्रकारेण। **तत्कालसंभूतमूर्छया** तत्काले प्रयाणकाले एव संभूता संजाता या मूर्छा मोहस्तया। करणे तृतीया। **कातराक्ष्या** चकितनयनया **कान्तस्य गतिराक्षिप्यते** निषिध्यते। **स** कविप्रसिद्धो **मूर्छाक्षेपो** मूर्छया आक्षेपों ईदृशोस्तीति शेषः। इदं श्लोकद्वयं प्राचीनेषु बहुषु पुस्तकेषु न दृश्यते। मुद्रितपुस्तकेषु तु वर्तते। न क्रमविसंगतं चातो व्याख्यातमिति ज्ञेयम्॥१५६॥

**अर्थो न सम्भृतः कश्चिन्न विधा काचिदर्जिता।**
**न तपः सञ्चितं किञ्चिद् गतं च सकलं वयः॥१५७॥**

---

## रत्नश्री

कश्चिद् विवक्षितोऽर्थो धनं न सम्भृतः नोपार्जितः। विद्यापि काचित् आन्वीक्षिक्यादिर्नार्जिता। तपश्च धर्मः किञ्चित् अभिमतं न सञ्चितम्। गतम् अतीतं च सकलं वयः पुरुषायुषम् अपुरुषार्थोपयोगेन। किमेवमात्मैवमात्मना वञ्चितः॥

तद्विभजते—

## हृदयङ्गमा

अनुक्रोशाक्षेपं निरूपयति, नेत्यादि।—तव द्विषां शत्रूणां, स्त्रीभिः नीलम् उत्पलं न आघ्रातं, न कर्णे कृतं, मधुनि मद्ये च, न अर्पितं, तद्वासनार्थमिति भावः, सुतरां दीर्घिकासु एव विशीर्णं विशुष्कम्; द्विषां पराजयेन मरणात् पलायनाद्वेति भावः॥१५७॥

## प्रभा

सानुक्रोशाक्षेपमाह—**नाघ्रातमिति।** त्वद्द्विषां त्वदरीणाम्। स्त्रीभिर्नीलमुत्पलं नाघ्रातम् नास्वादितम्। कर्णे भूषणार्थं न कृतम्। तथा मधुनि मद्ये सुवासार्थं नार्पितम्। दीर्घिकासु वापीषु तद् विशीर्णम् अनुपभोगेन कालपरिणामेन क्षयं गतम्। त्वदरिनृपस्त्रीणां विधवात्वात् वने गमनाद्वा इति भावः॥१५७॥

---

**असावनुशयाक्षेपो यस्मादनुशयोत्तरम्।**
**अर्थार्जनादेर्व्यावृत्तिर्दर्शितेह गतायुषा॥१५८॥**

## रत्नश्री

यस्मात् अर्थस्यार्जनमादिर्यस्य विद्यार्जनादेः तस्य व्यावृत्तिः अभावः [दर्शिता] कथम्? अनुशयः पश्चाताप उत्तरोऽधिको यस्मिन् दर्शन इति क्रियाविशेषणम्। गतायुषा गतवयसा पुंसा केनचित्। तस्मातं असौ ईदृशोऽनुशयाक्षेप इति॥

## हृदयङ्गमा

(अत्र राजविषया रतिर्ध्वन्यते)। अत्र उत्पले सानुक्रोशमिव सकरुणमिव यथा स्यात्तथा, तस्य उत्पलस्य, योग्यं कर्म स्त्रीजनकर्तृकाघ्राणादिकं, व्यावर्त्त्य निषिध्य, शोच्याया अवस्थाया अनुपभोगेन वापीषु विशीर्णतारूपायाः, उपदर्शनात् प्रदर्शनात्, असौ अनुक्रोशाक्षेपः, आक्षेपस्यानुक्रोशजनकत्वादिति भावः॥१५८॥

## प्रभा

उदाहरणं विशदयति–**असावनुक्रोशे इति।** उत्पले सानुक्रोशमिव सदयमिव। तद्योगं कर्म स्त्रीजनकृतम् आघ्राणादिकम् व्यावर्त्य प्रतिषिध्य शोच्यावस्थोपदर्शनात् शोच्यावस्था विशीर्णत्वरूपा तस्याः प्रकाशनाद् असौ अनुक्रोशाक्षेपः। अनुक्रोशपूर्वकं नाघ्रातमित्यादिनिषेधदर्शनादसौ सानुक्रोशाक्षेपः अपरे तु नीलोत्पलानुक्रोशेन त्वद्द्विषस्तत्र न सन्तीत्याक्षेपसूचनादनुक्रोशाक्षेपः। व्यपदेशकस्य व्यपदेश्यं प्रति साक्षात् परंपरया वा हेतुतासद्भावस्यौचित्यादिति व्याख्यान्ति॥१५८॥

## विवृति

तद्यच्च(मद्य च)षकेऽपि नु(न)क्षिप्तं नोच्छिङ्घितं(?) त्वद्विषां दीर्घिकास्वेव विस्ती(शी)र्णं जीर्णमुत्पलम्। असावनुक्रोशाक्षेपः सानुक्रोश इवाशोच्ये इव (?) उत्पले तद्योग्यमुत्पलयोग्यं यत् कर्णघ्राणावतंसकरणादि तव्द्यावर्त्याभावं प्रदश्र्य शोच्यावस्थोपदर्शनात्।।

**नाघ्रातमिति।** अनुक्रोशो नाम परदुरवस्थादर्शनादिजनित-दाक्षिण्यम्। अनुक्रोशसहितम् आक्षेपवचनम् अनुक्रोशाक्षेपः। अत्र सानुक्रोशम् उत्पलस्य शोच्यावस्थां दर्शयन् तद्योग्यं कर्म व्यावर्तयतीति अनुक्रोशाक्षेपः।।१५७–१५८।।

---

**अमृतात्मनि पद्मानां द्वेष्टरि स्निग्धतारके।**
**मुखेन्दौ तव सत्यस्मिन्नपरेण किमिन्दुना॥१५९॥**

---

## रत्नश्री

तव मुखे इन्दौ सति अस्मिन् प्रत्यक्षवर्तिनि इतरेण मुखेन इन्दुना किमधिकं कार्यम्? न किञ्चित्। अमृतमिवात्मा स्वरूपमेकान्तप्रीतिकरत्वात् यस्य मुखेन्दोः स तथा। अमृतं सुधैव 158b] आत्मा यस्येन्दोरिति शब्दश्लेषः। पद्मानां द्वेष्टा मुखेन्दुः तत्सदृशत्वादिन्दुश्च तत्सं[को]चकारित्वात्। अयमपि श्ब्दश्लेषः। स्निग्धे रक्ते तारके नेत्रमध्यभागे ततो वा समुदायोपलक्षणाच्चक्षुषी यस्य मुखेन्दोः। स्निग्धाः तारका रोहिण्यादयो यस्येन्दोरिति शब्दश्लेष एव। एवम[क्षी]णगुणे मुखेन्दौ सति किमितरेणेन्दुनेति प्रत्याम्नायः॥

तद् व्याचष्टे-

## हृदयङ्गमा

शिलष्टाक्षेपमुदाहरति, अमृतात्ममीत्यादि। -अमृतस्येव आत्मा स्वभावो यस्य तादृशे परमाह्लादके इत्यर्थः, अन्यत्र,-अमृतं जलं तदात्मनि तत्स्वरूपे, पद्मानां द्वेष्टरि पराजयकारिणि, अन्यत्र, -सङ्कोचकत्वात् शत्रौ, तथा स्निग्धे तारके अक्षिकनीनिके यस्य तस्मिन्, अन्यत्र, -स्निग्धाः प्रियाः, तारका नक्षत्राणि यस्य तस्मिन्, तव अस्मिन् मुखेन्दौ सति अपरेण इन्दुना किम्? न किमपि प्रयोजनमस्तीत्यर्थः॥१५९॥

## प्रभा

शिलष्टाक्षपमोह–**अमृतात्मनीति**। अमृतस्येव आत्मा स्वभावः स्वरूपं वा यस्य। तादृशे परमाह्लादके इत्यर्थः मुखपक्षे। चन्द्रपक्षे अमृतमेव आत्मा स्वरूपं यस्य। अमृतमये इत्यर्थः। पद्मानां द्वेष्टरि सौन्दर्यातिशयेनेति मुखपक्षे। चन्द्रपक्षे तत्संकोचनेन। स्निग्धे तारके अक्षिकनीनिके यस्मिन् इति प्रथमपक्षे। अन्यत्र स्निग्धा अनुरक्तास्तारका अश्विन्यादयो यस्मिन् भार्यात्वादिति भावः। एवं तव मुखेन्दौ सति अपरेण इन्दुना प्रसिद्धेन चन्द्रमसा किं प्रयोजनम् न किमपीति भावः॥१५९॥

---

**इति मुखेन्दुराक्षिप्तो गुणान् गौणेन्दुवर्तिनः।**
**तत्समान् दशयित्वेह श्लिष्टाक्षेपस्तथाविधः॥१६०॥**

## रत्नश्री

इति एवं तत्समान् मुखेन्दुसाधारणान् गुणान् अमृतात्मत्वादीन् गौणे मुखेन्दौ वर्तमानान् दर्शयित्वा प्रतिपाद्य मुखेन्दुराक्षिप्तः किमिन्दुनेति। तस्मात् श्लिष्टाक्षेपः तथाविधः तादृशोऽवगन्तव्यः श्लेषप्रयोगादिति॥

## हृदयङ्गमा

इह अत्र, इति उक्तप्रकारेण, तत्समान् तस्य मुख्येन्दोः सदृशान्, गौणेन्दुः गौणलक्षणया इन्दुपदबोध्यं मुखमित्यर्थः, तद्वर्त्तिनः तदीयान् अमृतात्मतादीन, गुणान् धर्मान्, दर्शयित्वा श्लिष्टैकशब्दप्रतिपाद्यत्वेन तत्समानधर्म्मान् प्रतिपाद्य इत्यर्थः, मुख्यः इन्दुः आक्षिप्तः प्रतिषिद्धः, इत्यतः, तथाविधः तादृशः, श्लिष्टाक्षेपः अयम्, अस्य श्लेषमूलकत्वात् इति भावः॥१६०॥

## प्रभा

उदाहरणं विशदयति—**इतीति**। एवंप्रकारेण इह रचनायाम् गौणेन्दुवर्तिनः अमुख्येन्दुवर्तिनो गुणान् अमृतात्मत्वादीन् तत्समान् मुख्येन्दुसमान् इह दर्शयित्वा श्लिष्टविशेषणोपन्यासमहिम्ना प्रकल्प्य मुखेन्दुः उपमानभूतेन्दुराक्षिप्तः प्रतिषिद्धः। इति श्लिष्टपदविन्यासेन आक्षेपः श्लिष्टाक्षेपः॥१६०॥

## विवृति

अमृतात्मनि अमृतस्वभावे पद्मानां द्वेष्टरि पद्मप्रतिस्पर्धिनि स्निग्धे तारके अक्षिगते यत्र सः स्निग्घतारकस्तत्र मुखेन्दौ एतस्मिन् सति इतरेण मुख्येन किमिन्दुना इति मुख्येन्दुराक्षिप्तः प्रतिषिद्ध इतरेण किमिन्दुनेत्यनेन गुणानमृतात्मकादीन् गौणचन्द्रवर्तिनः तत्समां(मान्) मुखचन्द्रसमां दर्शह....त्वे (मुख्यचन्द्रमःसदृशान् दर्शयित्वेति) श्लिष्टाक्षेपः तथाविधः।।

**अमृतात्मनीति।** मुख्ये पक्षे–अमृतात्मनि सुधामये, पद्मानां द्वेष्टरि पद्मानां सङ्कोचयितरि, स्निग्धतारके अनुरक्तदाक्षायणीके। गौणपक्षेआनन्दजनने पद्मसन्निमे स्निग्धकनीनिके। एवं चन्द्रसमे तव मुखे सति, न चन्द्रमसा कार्यम्; इति श्लेषकथनेन आक्षेपात् श्लिष्टाक्षेपः।।१५९–१६०।।

---

**किमयं शरदम्भोदः किं वा हंसकदम्बकम्।**
**रुतं नू पुरसंवादि श्रूयते तन्न तोयदः॥१६१॥**

---

## रत्नश्री

अयं दृश्यमानः किं शरदि शरदो वा अम्मोदः, किं वा आहोस्वित् हंसानां कदम्बकं वृन्दमिदम्? भवतु, विदितम्। नूपुरनिनादसदृशमनुरुतं श्रूयते यतः, तत् तस्मात् नायं तोयदः किं तु हंसकदम्बकमेवेति॥

तत् कथयति–

## हृदयङ्गमा

अनुशयाक्षेपमुद्दिशति, अर्थ इति। –कश्चित् अर्थः धनं, न सम्भृतः, काचित् विद्या च न अर्जिता, किञ्चित् तपः न सञ्चितं, सकलं वयश्च गतम्॥१६१॥

## प्रभा

अनुशयाक्षेपमाह–**अर्थो नेति।** कश्चिद् रत्नसुवर्णादिरूपोर्थो न संचितः। काचिदपि पदवाक्यप्रमाणादिरूपा विद्या न संपादिता। किंचिदपि तपः सान्तपनादिकम् न संभृतम्। सकलं वय आयुर्गतम्॥१६१॥

---

**इत्ययं संशयाक्षेपः संशयो यन्निवर्त्यते।**
**धर्मेण हंससुलभेनास्पृष्टघनजातिना॥१६२॥**

## रत्नश्री

यत् यस्मात् संशयः, शरदम्भोदो हंसकदम्बकं वेति सन्देहो न निवर्त्यते हंसे हंसेन वा सुलभेन तत्रैव सम्भवात्। धर्मेण गुणेन नूपुरसंवादिना रुतेनास्पृष्टा तत्रासम्भवात्, घनजातिः मेघो येन तेन हेतुना कर्तृभूतेन वा। तस्मादित्ययमीदृशः संशयाक्षेप इति॥

## हृदयङ्गमा

इह अत्र, यस्मात् अनुशयोत्तरं पश्चात्तापबहुलं यथा तथा, गतायुषा जनेन, अर्थार्जनादेः व्यावृत्तिः अभावः, दर्शिता, तस्मात् असौ अनुशयाक्षेपः॥१६२॥

## प्रभा

संज्ञा विवृणोति—**असाविति**। अस्माद् अनुशयोत्तरम् अनुशयः पश्चात्तापस्तस्मादनन्तरम्। अर्थार्जनादेर्व्यावृत्तिः विमुखता दर्शिता। अतोसौ अनुशयाक्षेपः अनुशयपूर्वक आक्षेपः अनुशयाक्षेपः॥१६२॥

## विवृति

अर्थो न संभृतः कश्चिदित्यादि। सयदन(अयमनु)शयाक्षेपः

पश्चात्तापाक्षेपः यस्माद(नुश)य उत्तरः समधिकं यथा भवत्येवमर्थार्जनादेर्व्यावृत्तिर्दर्शितेह गतायुषा वृद्धेन कोऽपि (केनापि)।।

**अर्थो नेति।** अनुशयः पश्चात्तापः। अभ्यधिकानुशयम् अर्थार्जनादेर्निषेधः क्षीणायुषा केनापि दर्शितः इति अयम् अनुशयाक्षेपः।।१६१–१६२।।

---

**चित्रमाक्रान्तविश्वोऽपि विक्रमस्ते न तृप्यति।**
**कदा वा दृश्यते तृप्तिरुदीर्णस्य हविर्भुजः॥१६३॥**

## रत्नश्री

चित्रमद्भुतमेतत्। आक्रान्तममिभूतं विश्वं जगद्येन स तथाभूतोऽपि तव विक्रमः शौर्यं न तृप्यति नाभिलाषपर्यन्तमधिगच्छति। अथवा किं चित्रम्? उदीर्णस्याधिमात्रस्य हविर्भुजोऽग्नेः कदा तृप्तिर्दृश्यते? न कदाचित्। तथा विक्रमस्तव जगदाक्रम्यापि न तृप्यतीति योज्यम्।

तद् व्याचष्टे–

## हृदयङ्गमा

संशयाक्षेपमुदाहरति, किमित्यादि।–अयं किं शरदम्भोदः? शरत्कालिकः जलदागमात् शुभ्रः मेघः? किं वा हंसानां कदम्बकं समूहः? किन्तु नूपुरसंवादि नूपुरध्वनिसदृशं, रुतं श्रयते, तत् तस्मात्, तोयदः मेघः, न॥१६३॥

## प्रभा

संशयाक्षेपमुदाहरति–**किमयमिति।** अयं वियति दृश्यमानः। शरदम्भोदः शरत्कालीनो मेघः। किम्। अथवा हंसकदम्बकम् शरत्समये मानसादागच्छतां हंसानां समूहः। किम्। नूपुरं तुलाकोटि तस्य संवादि शिञ्जितसदृशम् रुतं ध्वनिः श्रूयते। तत् तस्माद्। अयं तोयदो न॥१६३॥

---

**अयमर्थान्तराक्षेपः प्रक्रान्तो यन्निवर्त्यते।**
**विस्मयोऽर्थान्तरस्येह दर्शनात् तत्सधर्मणः॥१६४॥**

---

## रत्नश्री

यत् यस्मात्प्रक्रान्तः प्रस्तुतो विस्मयो निवर्त्यते अर्थान्तरस्याग्नेः। तेन विक्रमेण सधर्मणस्तुल्यस्य दर्शनादवगमात्। ततोऽर्थान्तराक्षेपोऽयम्, अर्थान्तरेण तादृशेन विस्मयस्य निषेधादिति॥

## हृदयङ्गमा

इति एवम्, अस्पृष्टा घनजातिर्येन तादृशेन, हंससुलभेन केवलहंससम्बन्धिना, धर्मेण तादृशरुतेन, यत् यस्मात्, संशयः निवर्त्त्यते तस्मात् अयं संशयाक्षेपः॥१६४॥

## प्रभा

अभिधां विशदयति–**इतीति**। अस्पृष्टघनजातिना अस्पृष्टा घनजातिर्येन तेन मेघेषु अनुपलभ्यमानेन हंससुलभेन हंसेषु सुलभतयावगतेन धर्मेण नूपुरसंवादिरुतरूपेण यद् यस्मात् संशयः प्रकृते मेधसंशयो निवर्त्यते। अतोयं संशयाक्षेपः संशयस्य आक्षेपः संशयाक्षेपः॥१६४॥

## विवृति

शरदम्भोदहंसकदम्बकयोर्धवलिम्ना सादृश्येन विभ्रान्तचित्तस्य

संशय उपजायते। तस्याक्षेपो निषेधः कुतः कूजितं नूपुररवानुकारि श्रूयते। तन्न तोयदः न शरदम्भोदः किं तु हंसकदम्बकमेव केन (इति रुतेन) नूपुर(रवानु)कारिणा संशयस्याक्षिप्तत्वात् संशयाक्षेपः।।

**इतीति। संशयस्य आक्षेपः संशयाक्षेपः।।१६३-१६४।।**

---

**न स्तूयसे नरेन्द्र! त्वं ददासीति कदाचन।**
**स्वमेव मत्वा गृह्णन्ति यतस्त्वद्धनमर्थिनः।।१६५।।**

---

## रत्नश्री

नरेन्द्र, ददासि त्वं धनमर्थिभ्य इति कथञ्चन केनापि प्रकारेण न स्तूयसे। किं कारणम्? यतः कारणात् [59a] तव धनमर्थिनः स्वम् आत्मीयमेव मत्वा गृह्णन्ति। नास्येदं धनम् अस्माकमेवेदम्, वयमुपभोक्तारः केवलमस्मदर्थं रक्षति। यद्वा अस्य धनं तदस्माकमपि सर्वसाधारणविभवत्वादस्येति।।

तद् ब्रवीति–

## हृदयङ्गमा

अर्थान्तराक्षेपमुद्दिशति, चित्रमिति।–ते तव, विक्रमः आक्रान्तं विश्वं येन तादृशोऽपि निखिलभुवनं समाक्रमन्नपीत्यर्थः, न शाम्यति आक्रमणाभिलाषात् न विरतो भवति, एतत् चित्रमाश्चर्य्यम्। चित्रत्वं प्रतिषेद्धुमर्थान्तरमुपन्यस्यति, कदेति।–वा अथवा, उदीर्णस्य उद्दीप्तस्य, हविर्भुजः अग्नेः, तृप्तिः कदा दृश्यते? न कदाऽपि इत्यर्थः।।१६५।।

## प्रभा

अर्थान्तराक्षेपमुपन्यस्यति–**चित्रमिति।** ते विक्रमः पराक्रमः आक्रमः आक्रान्तविश्वोपि आक्रान्तं व्याप्तं विश्वं येन तादृशोपि न तृप्यति तृप्तो न भवति इति आश्चर्यमेतत्। अर्थान्तरविन्यासेन परिहरति–**कदा वेति।** वा अथवा। उदीर्णस्य उद्दीप्तस्य हविर्भुजः अग्नेस्तृप्तिः कदा दृश्यते न कदापि। हविषा कृष्णवर्त्मा हि भूय एवाभिवर्धत इति भावः।।१६५।।

---

**इत्येवमादिराक्षेपो हेत्वाक्षेप इति स्मृतः।**
**अनयैव दिशान्येऽपि विकल्पाः शक्यमूहितुम्॥१६६॥**

## रत्नश्री

इत्येवमनन्तरोक्तः प्रकारः आदिर्यस्येति एवमादिराक्षेपः हेत्वाक्षेप इति स्मृतः तज्ज्ञैः। हेतूपन्यासेन निषेधात्। शेषानाक्षेपविकल्पानतिदिशन्ति मयन्ति। अनयैव अनन्तरदर्शितया दिशा आक्षेपविकल्पगत्या अन्येऽप्यनुक्ता विकल्पा आक्षेपप्रभेदा ऊहितुमनुगन्तुं शक्यम्।

ननु वाच्यलिङ्गत्वात् तव्यादेः विकल्पो इत्यपेक्ष्य शक्या इति युक्तम्। उच्यते, इह शक्यमिति सामान्यविवक्षया प्रयुज्यते। ततः किं शक्यमिति विशेषापेक्षायां विकल्पा इति सं[भ]न्त्स्यते। तत्र यद्यपि बहुत्वं पुंस्त्वं च गम्यते, तथापि पदसंस्कारकालापेक्षितमन्तरङ्गमव्यक्तपुंस्त्वम्, एकवचनं च उत्तरकालभावि। तेन बहिरङ्गं बहुवचनं च न बाधितुं शन्कोति। अयं च न्यायोऽन्यत्रापि यथासम्भवमनुसर्तव्य इति॥

ते चैवमभ्यूह्याः-

काचिदेषा सुरस्त्रीणां कथञ्चिदिह दृश्यते।

नाकलोकाश्रया नैषा निमेषाभिज्ञलोचना॥

विपर्यासाक्षेपः॥

इयमाद्या विधेः सृष्टिर्मर्त्यस्त्रीषु विलोक्यते।

रूपमीदृक् कुतस्तासामियं काचित्सुराङ्गना॥

निश्चयाक्षेपः।।

न प्रसीदसि तन्वङ्गि! प्राणैरपि ममार्पितैः।

किमतः परमादेयं यदेवमपि निष्ठुरा।।

प्रसादाक्षेपः।।

एवमपरेऽप्याक्षेपविकल्पाः समुन्नेयाः।।

।। इत्याक्षेपचक्रम् ।।

अर्थान्तरन्यासमुपन्यस्यति—

## हृदयङ्गमा

इह अत्र, तत्सधर्मणः तस्य विक्रमस्य, सधर्मणः समानधर्मस्य, अर्थान्तरस्य हविर्भुक्तृप्त्यभावरूपस्य, दर्शनात् प्रदर्शनात्, प्रकान्तः चित्रमिति पदेन प्रस्तुतः, विस्मयः यत् नित्रार्य्यते, तस्मात् अयम् अर्थान्तराक्षेपः अर्थान्तरेण प्रस्तुतस्याक्षेपात्। (अत्र राजविषयिणी रतिर्ध्वन्यते)।।१६६।।

## प्रभा

उदाहरणं विस्पष्टयति—**अयमिति**। इह उदाहरणे तत्सधर्मणो विक्रमसमानधर्मस्य अर्थान्तस्य उदीर्णस्य हविर्भुजस्तृप्त्यभावरूपस्य दर्शनात्। णिजन्तमेतत्। प्रकान्तः प्रस्तुतो विस्मयो यन्निवार्यते यस्मादपह्वियते अतोयम अर्थान्तरेण आक्षेपः अर्थान्तराक्षेपः।।१६६।।

## विवृति

अयमर्थान्तराक्षेप उच्यते। यतः आक्रान्तसकलमहीतलोऽपि विक्रमस्तव दशात्य(न तृप्य) तीत्यनेन प्रवृत्तो विस्मयो येन(?) निवर्त्यते निषिद्ध्यते। अर्थान्तरस्य अग्नेः प्रद(र्शनात्) तत्सधर्मणो विक्रमसमानस्य।।

**अयमिति।** अर्थान्तरमुपन्यस्य प्रस्तुतसम्बन्धिनो विस्मयस्य आक्षेपात् अयम् अर्थान्तराक्षेपः।।१६६।।

---

**ज्ञेयः सोऽर्थान्तरन्यासो वस्तु प्रस्तुत्य किञ्चन।**
**तत्साधनसमर्थस्य न्यासो योऽन्यस्य वस्तुनः॥१६७॥**

## रत्नश्री

विवक्षितं किञ्चिद्वस्तु अर्थरूपं प्रस्तुत्याभिधाय तस्य प्रस्तुतस्य वस्तुनः साधने समर्थस्य योग्यस्यान्यस्य वस्तुनः कस्यचित् न्यासः प्रयोगो यः, स एवंलक्षणोऽर्थान्तरन्यासो नामालङ्कारो ज्ञेयः प्रतिपत्तव्यः। प्रतिवस्तूपमा[या] अस्य च को भेदः उभयत्राप्यर्थान्तरोपन्यासात्? महान् भेदः। तत्र हि सदृशस्यार्थान्तरस्योपन्यासः केवल[59b]मपेक्षते, न साधनभूतस्य। अत्र तु साधनरूपस्यैवार्थान्तरस्य। सादृश्यं भवतु मा [वा] भूत्, न तदपेक्षते। अत एवोक्तं तत्साधनसमर्थस्येति॥

एवंलक्षणोऽर्थान्तरन्यासः किंप्रभेद इत्याह–

## हृदयङ्गमा

हेत्वाक्षेपमुद्दिशति, मेत्यादि। –हे नरेन्द्र! त्वं ददासीति कृत्वा कदाचन न स्तूयसे, यतः अर्थिनः तव धनं स्वं निजस्वत्वास्पदीभूतमेव, मत्वा बुद्ध्वा, गृह्णन्ति। (एतेन राज्ञोऽतीव दानशीलत्वं सूचितम्)। इति स्वमेवेति हेतुवशात् प्रस्तुतराजस्तवस्य आक्षेपात्, एवमादिराक्षेपः ईदृशाक्षेपः, हेत्वाक्षेपः इति स्मृतः कथितः, आक्षेपस्य हेतुसाध्यत्वात् इति भावः॥१६७॥

## प्रभा

हेत्वाक्षेपमाह-**न स्तूयसे इति**। हे नरेन्द्र त्वं ददासि इति कदाचन कदापि न स्तूयसे। जनैरिति शेषः। यतस्त्वद्धनं अर्थिनो याचकाः स्वमेव मत्वा आत्मीयमिति ज्ञात्वा गृह्णन्ति। अनेन राज्ञो लोकोत्तरो दानमाहात्म्यातिशयो ध्वन्यते।।१६७।।

---

**विश्वव्यापी विशेषस्थः श्लेषाविद्धो विरोधवान्।**
**अयुक्तकारी युक्तात्मा युक्तायुक्तो विपर्ययः॥१६८॥**

---

## रत्नश्री

विश्वं जगत्सर्वं व्याप्नोति सर्वत्र सम्भवादिति विश्वव्यापी। विशेषे क्वचित् विषये तिष्ठति न विश्वं व्याप्नोति विशेषस्थः। श्लेषः एकार्थता एकशब्दता वा तेनाविद्धोऽनुगतः श्लेषाविद्धः। विरोधः परस्परव्याघातो विद्यतेऽस्मिन्निति विरोधवान्। अयुक्तम् अनुचितं करोतीति अयुक्तकारी। अयुक्त इत्यर्थः। युक्तः समुचितः आत्मा स्वरूपं यस्य स तथा। युक्त इति यावत्। युक्तश्चासौ कथञ्चिदयुक्तश्चेति युक्तायुक्तः। विपर्ययोऽयुक्तयुक्त इति॥

## हृदयङ्गमा

अनया एव दिशा रीत्या, अन्योऽपि विकल्पः आक्षेपस्य भेदः, ऊहितुं निरूपयितुं, शक्यः, धीमद्भिरिति शेषः। (कारणाक्षेपे तु कारणस्यैव आक्षेपः, इह तु कारणेन आक्षेप इत्यनयोर्भेद इति बोध्यम्)॥१६८॥

## प्रभा

आक्षेपालंकारमुपसंहरति–**इतीति।** इत्येवमादिरेतत्प्रकारक आक्षेपो हेत्वाक्षेपः। प्रस्तुतस्य नरेन्द्रस्तवस्य स्वमेव मत्वा गृह्णन्ति इति हेतुमुपन्यस्य आक्षेपान् निषेधात् हेत्वाक्षेपो हेतुना आक्षेपो हेत्वाक्षेपः। पूर्वं दर्शितः कारणाक्षेपस्तु कारणस्य आक्षेपो न तु कारणेन इति उभयोर्भेदः। अनयैव दिशा पद्धत्या अन्येपि विकल्पा भेदा ऊहितुं कल्पितुम् शक्यम्। प्रज्ञावद्भिरिति शेषः॥१६८॥

## विवृति

(अ)दास्त्वमसीति न स्तोत्रमर्हसि स्वमेव ग(म)त्वा गृह्णन्ति यतस्त्वद्धनमर्थिनः। स्तवस्य त्यागो हेतुः। स च त्यागलक्षणो हेतुराक्षिप्तः यतो भवदीयं यद्वित्तं तत् स्वकीयमिति मत्वा स्वयमर्थिभिर्गृह्यते परकीयमर्थमादित्सुर्जनो घनिनं स्तौति न स्वकीयमिति हेत्वाक्षेपोऽयम्।।

इत्यल्पमिदमुक्तमस्माभिः। एवंविधा विकल्पा अपरेऽप्यभिहि(धा)तव्या अनयैव दिशा अनयै(नेनै)व न्यायेन शक्यमूहितुम्। किं तदिति बुभुत्सायां विकल्पा इत्यभिधीयते। अन्यथा विकल्पाः शक्या ऊहितुमिति स्यात्। तदुक्तं भाष्यकारेण तु पस्पशा, झज्जरस पृष्ठ ३४ः शक्यं चानेन श्वयमांसादिभिरपि क्षुत्प्रतिहन्तुम्।-'न शक्यं क्षुदपहर्तुम् (?) १६७-१६८।।

**इत्येवमादयो भेदाः प्रयोगेष्वस्य लक्षिताः।**
**उदाहरणमालैषां रूपयुक्त्यै निदश्यते॥१६९॥**

---

## रत्नश्री

इत्येवम् अनन्तरोक्तो विचित्रो भेद आदिर्येषां यथासम्भवमविरोधादीनां ते भेदाः विकल्पाः प्रयोगेषु काव्येषु लक्षिताः दृष्टाः कविभिः अस्य अर्थान्तरन्यासस्य सम्बन्धिनः। एषां भेदानां रूपस्य स्वभावस्य युक्त्यै प्रत्यवगमार्थम्। उदाहरणानां प्रयोगाणां माला वर्गो निदर्श्यते इति॥

## हृदयङ्गमा

अर्थान्तरन्यासमाह, ज्ञेय इति। –किञ्चन किमपि, वस्तु प्रकृतमिति भावः, प्रस्तुत्य उपन्यस्य, तस्य साधने प्रमाणीकरणे, समर्थस्य अन्यस्य अप्रकृतस्य, वस्तुनः विषयस्य, यो न्यासः कीर्त्तनं, सः अर्थान्तरन्यासः ज्ञेयः; एवञ्च समर्थकवाक्यात् पूर्वं पश्चाद्वा निर्दिष्टस्य प्रस्तुतवाक्यार्थस्य यदप्रस्तुतवाक्यार्थेन समर्थनं सोऽर्थान्तरन्यास इति लक्षणम्। (अत्र प्रस्तुत्य इति क्त्वाप्रत्ययेन प्रथमं प्रकृतस्य कीर्त्तनं ततस्तत्समर्थकस्य उपन्यास इति यद्यप्यायातं, तथाऽपि न तदादरणीयं, विदुषामनङ्गीकृतत्वात्; तदुक्तम् अलङ्कारसर्वस्वकृता वृत्तौ,–"निर्दिष्टस्याभिहितस्य समर्थनार्हस्य प्रकृतस्य समर्थकात् पूर्वं पश्चाद्वा निर्दिष्टस्य यत् समर्थनं सोऽर्थान्तरन्यासः" इति। समर्थकवाक्यस्य प्रागुपन्यासे तु भोजराजेन विपरीतार्थान्तरन्यास इत्यभिहितम्। यथा,– "प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता। अवलम्बनाय दिनभर्त्तुरभून्न पतिष्यतः करसहस्त्रमपि॥" इति। अत्र

सन्ध्यावर्णनस्य प्रस्तुतत्वात् परार्द्धवाक्यं समर्थनीयं, ततश्च पूर्वार्द्धवाक्यं परार्द्धस्य समर्थकमपि प्रागुपन्यस्तम्; एवञ्च क्त्वाप्रत्ययस्यानन्तर्य्यार्थो नात्र विवक्षणीयः, समर्थकवाक्यार्थात् पूर्वं पश्चाद्वा समर्थनीयस्य प्रकृतस्योपन्यास इति सिद्धान्तः। तथा समर्थ्यसमर्थकयोः सामान्यविशेषभावः कार्य्यकारणभावश्च विवक्षणीयः; तच्चोक्तमलङ्कारः सर्वस्वकृता,– ''सामान्यविशेषभावकार्य्यकारणभावाभ्यां निर्दिष्टप्रकृत-समर्थनमर्थान्तरन्यासः'' इति। स च कदाचित् साधर्म्येण क्वचिच्च वैधर्म्येण वा भवति; यदुक्तं विश्वेश्वरपण्डितेन,–''यदि सामान्यविशेषौ समर्थयेते विशेषसामान्ये। साधर्म्याद्वैधर्म्यादपि वा सोऽर्थान्तरन्यासः।।'' इति। तथा दर्पणकृताऽप्युक्तं,–''सामान्यं वा विशेषेण विशेषस्तेन वा यदि। कार्य्यञ्च कारणेनेदं कार्य्येण च समर्थ्यते। साधर्म्येणेतरेणार्थन्तरन्यासोऽष्टधा ततः।।'' इति। इत्थञ्च नवीनैरेवमष्टौ भेदाः दर्शिताः ; सामान्यं विशेषस्य विशेषः सामान्यस्य समर्थक इति भेदद्वयम्; तथा कार्य्यं कारणस्य कारणं वा कार्य्यस्य समर्थकमित्यपि भेदद्वयम्; भेदचतुष्टये च तत्र प्रत्येकं साधर्म्यवैधर्म्याभ्यां भेदद्वये भेदाष्टकमुपपद्यते इति। उदाहृतञ्च कार्येण कारणसमर्थने,–''सहसा विदधीत न क्रियाम्'' इत्यादि। तथा कारणेन कार्यसमर्थने,–''पृथ्वि! स्थिरा भव'' इत्यादिकञ्च। अन्यत् उदाहरणन्तु यथायथमूहनीयम्। स्वमतेऽपि भेदाष्टकं वक्ष्यमाणरीत्या बोध्यम इति)।।१६९।।

## प्रभा

अर्थान्तरन्यासं लक्षयति–**ज्ञेय इति**। किंचन किमपि वस्तु प्रकृतम् प्रस्तुत्य उपन्यस्य तस्य प्रस्तुतस्य अनुपपद्यमानतया

संभाव्यस्य साधनं सोपपत्तिकत्वेनोपपादनं तत्र समर्थस्य अन्यस्य कस्यचिदप्रस्तुतस्येति सूचितम्। न्यासः निवेशः। सोयमर्थान्तरन्यासः अलंकारः। अत्र प्रस्तुत्येति क्त्वाप्रत्ययेन प्रथमतः प्रस्तुतस्योपन्यासः पश्चात्समर्थकस्याप्रस्तुतस्येति प्राप्तम्। परं प्रायिकमेतत्। वैपरीत्येनापि दर्शनात्। यथा–

प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता।
अवलम्बनाय दिनभर्तुरभून्न पतिष्यतः करसहस्त्रमपि।।

अत्र सायंकालवर्णनस्य प्रस्तुतत्वाद् अवलम्बनाय दिनभर्तुरित्युत्तरार्धवाक्यार्थः प्रस्तुतः समर्थ्यः पूर्वार्धवाक्यार्थः तत्समर्थकः। भोजराजस्तु अमुं विपरीतार्थान्तरन्यासमाह।। तथा च प्रस्तुतस्य पूर्वत्र परत्र वा यत्रकुत्रापि स्थितस्य अप्रस्तुतेन समर्थनमर्थान्तरन्यास इति फलितम्। अत्र समर्थ्यसमर्थकयोः सामान्यविशेषभाव आदरणीय इति प्रकाशकारादयः। कार्यकारणभावे तु तन्मते स काव्यलिङ्गस्य विषयः। दण्डिना तु काव्यलिङ्गो न स्वीकृतः। अतः स उभयत्रापि अर्थान्तरन्यासं स्वीकरोति। स हि ज्ञापको निष्पादकः समर्थश्चेति हेतुं त्रिधा विभजति। तत्र ज्ञापको अनुमानालंकारस्य विषयः। निष्पादकः काव्यलिङ्गालंकारस्य। समर्थकश्चार्थान्तरन्यासस्य सामान्यविशेष-भावोपि साधर्म्यवैधर्म्येण द्विधा भवति। ततश्च सामान्यं विशेषेण विशेषः सामान्येन स च साधर्म्येण वैधर्म्येण च इति चतुर्विधोर्थान्तरन्यासः प्रकाशे उक्तः। उदाहरणानि तत एव ज्ञेयानि। यस्मिन् वाक्यार्थे न विशेषसामान्यभावो न वा कार्यकारणभावस्तत्र साधारणधर्मयोरभिन्नत्वे प्रतिवस्तूपमा भिन्नयोस्तयोर्बिम्बानुम्बिम्बत्वे दृष्टान्तः। इमौ द्वावपि आचार्यदण्डिना उपमायामेव अन्तर्भावितौ।

एको हि दोषो गुणसंनिपाते निंमज्जतीन्दोः किरणेष्विवाङ्कः इत्यादौ तु अर्थान्तरन्यासद्वयस्य संसृष्टिराचार्यदण्डिनो मतेन ज्ञेया। तेन यस्मिन् विशेषसामान्यविशेषाः स विकस्वरः। इति दीक्षितादिभिर्लक्षितो विकस्वरालंकारो न पृथग् गणनामर्हतीति बोद्धव्यम्। उद्योतकारास्तु अनुपपद्यमानतया संभाव्यमानस्यार्थ-स्योपादानार्थं यद् अर्थान्तरं न्यस्यते सोर्थान्तरन्यासः। दृष्टान्ते तु सामान्यं सामान्येन विशेषो विशेषेण समर्थ्यते इति ततो भेदः। साक्षात् व्याप्त्यादेरनभिधानादनुमानतो भेदः। इत्याहुः।।१६९।।

## विवृति

नेति। वर्णनीयस्य त्यागविषया स्तुतिः हेतुमुखेन आक्षिप्ता इति हेत्वाक्षेपः। आदिशब्देन ईदृशाः अन्येऽपि हेत्वाक्षेपतया गृह्यन्ते। आक्षेपविकल्पा अन्येऽपि दर्शितेन मार्गेण ज्ञातव्या इत्याह–अनयैवेति।।

इति आक्षेपचक्रम्।

अन्य(अ)र्थान्तरन्यासस्य लक्षणमाह–

वस्तु किञ्चित् प्रस्तुत्य तस्य प्रस्तुतस्य वस्तुनो यत्साधनं तस्य समर्थं यदन्यत् वस्तु तस्य न्यास उपन्यासः स्थापनं सोऽर्थान्तरन्यासः प्रकृतादर्थादन्योऽर्थोऽर्थोन्तरं तस्या (स्य न्यासो)ऽर्थान्तरन्यासः।।

अर्थान्तरन्यासं लक्षयति–**ज्ञेय इति**। विवक्षितं कञ्चिदर्थं उपन्यस्य तत्साधनक्षमस्य वस्त्वन्तरस्य न्यासः अर्थान्तरन्यासः।।

अर्थान्तरन्यासालङ्कारमाह–**ज्ञेय इति**। पूर्वं एकं साधयितुं इष्टं उक्त्वा तत्साधनार्थं वस्त्वन्तरकथंन अर्थान्तरन्यासलक्षणम्।।१६९।।

**भगवन्तौ जगन्नेत्रे सूर्याचन्द्रमसावपि।**
**पश्य गच्छत एवास्तं नियतिः केन लङ्घ्यते॥१७०॥**

---

## रत्नश्री

भगवन्तौ गुणराशा। जगतो लोकस्य नेत्र चक्षुषी, प्रकाशकरत्वात्। सूर्याचन्द्रमसावपि, किमुतान्यद् वस्तुजातम्? अस्तमुदयविपर्ययमभावं गच्छत एव। न पुनस्तत्रैव तिष्ठतः। पश्य। कथमेतत्? किमत्र चित्रम्! नियतिर्भावानामनपायिनी व्यवस्था काचित्, उदयः सर्व एव व्ययनिष्ठ इति। सा केन नाम वस्तुना लङ्घ्य विक्रमितुं शक्यते? न केनचित्। सर्वमेवेह वस्तूदितमवश्यं व्येति। ततः सूर्याचन्द्रमसोरपि तथाभावो नाद्भुत इति प्रस्तुतं वस्तु साधितम्। अयं च विश्वव्यापी, तथाभावस्य सर्वत्रगत्वादिति॥

## हृदयङ्गमा

अर्थान्तरन्यासस्य भेदानाह, विश्वव्यापीत्यादि। –विश्वव्यापी सर्वतः सम्भवशीलः, व्यापकधर्म्मावच्छिन्न इत्यर्थः, समर्थकवाक्यस्य सामान्यभावत्वे विश्वव्यापिनामार्थान्तरन्यास इति निष्कर्षः ; विशेषस्थः असर्वगः, व्याप्यधर्म्मावच्छिन्न इत्यर्थः, समर्थकस्य विशेषत्वे विशेषस्थनामायमिति फलितार्थः ; श्लेषाविद्धः श्लिष्टपदान्वितः, विरोधवान् विरुद्धधर्म्मद्वययुक्तः, अयुक्तकारी अनुचितकार्य्यकर्त्ता, युक्तात्मा औचित्ययुक्तः, युक्तायुक्तः कियदंशेन युक्तः कियता वा अयुक्तः, तथा विपर्य्ययः अयुक्तकार्य्यादित्रितयवैपरीत्यगुणयुक्तः इत्यर्थः॥१७०॥

## प्रभा

कथितसामान्यलक्षणस्य अर्थान्तरन्यासस्य समर्थकार्थभेदेन संभवतो भेदान् निर्दिशति–**विश्वव्यापीति**। विश्वव्यापी सर्वव्यापकः सर्वत्र संभवार्हः। विशेषस्थो वस्तुविशेषे एव विद्यमानः। श्लेषाविद्धः सामानवस्तूनामेव संश्लेषदर्शनाद्। अत्र श्लेषशब्देन वस्तुसाम्यं ग्राह्यम्। तेन आविद्धः युक्तः। अविरुद्धार्थसमर्थकेन समर्थितः इत्यर्थः। विरोधवान् प्रकृतविरोधी। अयुक्तकारी प्रकृत्यैवानुचितकरणशाली। युक्तात्मा औचित्ययुक्तः। युक्तायुक्तः युक्तोपि अयुक्तकारी। विपर्ययः एतद्विरुद्धोयुक्तोपि युक्तकारी।।१७०।।

**पयोमुचः परीतापं हरन्त्येव शरीरिणाम्।**
**नन्वात्मलाभो महतां परदुःखोपशान्तये॥१७१॥**

---

## रत्नश्री

एते पयोमुचो मेघाः शरीरिणां स्थावरजङ्गमानां परीतापं ज्वरं हरन्ति शमयन्ति। किमेतत्? न हि तेषाममी किञ्चित्प्रत्युपकुर्वन्ति। किमेवमुच्यते? ननु प्रसिद्धावनुमतौ वा। महताम् उत्ता[ना]नां न क्षुद्राणां तेषामात्मकल्याणेऽप्यकल्पत्वात् [60a] आत्मलाभ उदयः परेषां सर्वेषामेव सम्भूतानामसम्भूतानां च दुःखस्य तापस्य उपशान्तये निवर्तनार्थं जायते। स्थितिरेषा महताम्। इदमेव च तेषां माहात्म्यम्। अन्यथा स्वार्थपरे जगति कस्तेषां विशेषो यदि तेऽपि तथैव स्युः? ततः पयोमुचः प्रत्युपकारनिरपेक्षाः जगत्तापं नुदन्तीति उपपादितम्। अयं च विशेषस्थो महतामेव तथात्वात् [न] विश्वव्यापीति॥

## हृदयङ्गमा

अस्य अर्थान्तरन्यासस्य, प्रयोगेषु, इत्येवमादयः एवम्प्रकाराः, अष्टविधाः, भेदाः विभिन्नाः समर्थकार्थाः, लक्षिताः अनुभूताः, (आदिना भोजोक्तानामनीकप्रत्यनीकादीनां ग्रहणम्) एषाम् उक्तभेदानां तादृशानाम् अन्येषाञ्च, रूपस्य स्वरूपस्य, व्यक्तौ व्यक्तीकरणे, उदाहरणमाला, वक्ष्यमाणा इति शेषः, निदर्श्यते योगार्थबलादेव प्रोक्तभेदानां लक्षणप्रतीतेः लक्षणमन्तरेणापि तेषामुदाहरणानि निरूप्यन्ते इति भावः॥१७१॥

## प्रभा

**इत्येवमिति।** अस्य अर्थान्तरन्यासस्य इत्येवमादयः एवं प्रकाराः भेदाः समर्थकार्थविशेषाः। प्रयोगेषु कविप्रयोगेषु। लक्षिताः दृष्टाः। एषां रूपव्यक्त्यै स्वरूपावगमाय। उदाहरणमाला निदर्श्यते॥१७१॥

## विवृति

तमष्टधा उद्दिशन्ति(ति)

विश्वं कृत्स्नं व्याप्नोतीत्येवंशीलः तद्धर्मा तत्साधव (तत्साधुकारी वा) विश्वव्यापी। विशेषे कस्मिंश्चिद्विवक्षिते तिष्ठतीति विशेषस्थः। श्लेषेणानेकार्थवाचिना विद्धः। विरोधो विप्रतिषेधः सहानवस्थानलक्षणः परस्परपरिहास(रेण)-स्थितिर्वासोऽस्यास्तीति विरोधवान्। अयुक्तमसम्बद्धं करोतीत्युक्तकारी। अयु(यु)क्तः सन्बन्धः आत्मा यस्यां सा (यस्यासौ) युक्तात्मा। युक्तश्चासावयुक्तः। तथास्य (तस्य) युक्तायुक्तस्य विपर्ययो व्यत्ययः अयुक्तयुक्तः इत्येवमादयः इत्येवंप्रकार(रा)भेदा विशेषाः प्रयोगेष्वर्थान्तरन्यासस्य काव्यादिषुलक्षिताः। उदाहरणमाला एषां विश्वव्यापिप्रकृ(भृ)तीनां रूपव्यक्त्यै तत्स्वरूपस्पष्टनाय निर्दिश्य (दर्श्य)ते॥

**विश्वेति।** सः विश्वव्यापी विशेषस्थ इत्यादिभिः प्रकारैः अष्टप्रकारः॥

पृथगर्थनामवशेन तद्भेदान् दर्शयति–**विश्वेति।** विश्वव्यापी निखिलपदार्थानुगतः। विशेषस्थः कस्मिंश्चिदेव पदार्थे व्यवस्थितः। श्लेषाविद्धः वक्ष्यमाणश्लेषालङ्कारलक्षणोपेतः। विरोधवान् असङ्गतिमान्। अयुक्तकारी स्वस्वभावविरुद्धार्थकारी। युक्तात्मा स्वस्वभावयोग्यार्थः। युक्तायुक्तः स्वस्वभावविरुद्धाविरुद्धार्थोपेतः। विपर्ययः अन्यभावापत्तिः। क्रमेण एषां उक्तप्रकाराः भेदाः सर्वेऽपि अस्य प्रयोगेषु काव्यनाटकादिषु लक्षणीयाः।।१७०–१७१।।

---

**उत्पादयति लोकस्य प्रीतिं मलयमारुतः।**
**ननु दाक्षिण्यसम्पन्नः सर्वस्य भवति प्रियः॥१७२॥**

## रत्नश्री

मलयमारुतो दक्षिणः पवनः लोकस्य जगतः प्रीतिमुत्पादयति। किं पुनः कारणं येनायं सर्वेषां प्रिय इति साधयन्नाह-नन्वित्यादि। नन्वित्यनुमतौ। दाक्षिण्यं परच्छन्दानुवर्तित्वम्। सर्वप्रीतिजननानुगुणो गुणः पौरुषेयः, दक्षिणदेशभवत्वं चेति शब्दश्लेषः। तेन सम्पन्नः सुभगः सर्वस्य जनस्य प्रियो भवति। न कस्यचिदप्रियः। कथमनुकूलवर्ती कस्यचिदप्रियोऽप्रीतिकरः स्यात्। तस्मान्मलयजमारुतो दक्षिणः सर्वेषां प्रीतिमुत्पादयतीति समर्थितम्। अयं च श्लेषाविद्धो दाक्षिण्यसंपन्न इत्यस्य श्लिष्टत्वादुक्तेन विधिनेति॥

## हृदयङ्गमा

विश्वव्यापिनमुदाहरति, भगवन्ताविति। —भगवन्तौ षड़ैश्वर्य्यशालिनौ, जगतां नेत्रे नयनस्वरूपौ, सूर्य्याचन्द्रमसौ अपि, का कथा अन्येषामिति अपिना सूच्यते; अस्तं गच्छत एव, पश्य। इममर्थं समर्थयति, नियतिरिति। —केन नियतिर्भाग्यं, लङ्घ्यते? अतिक्रम्यते? न केनापीत्यर्थः। (अत्र चतुर्थपादवाक्यरूपस्य समर्थकस्य विश्वव्यापित्वं ब्रह्मादिकीटपर्य्यन्तानां सर्वेषामेव नियत्यधीनत्वात् बोद्धव्यं, तेन च सामान्येन पूर्वोक्तत्रिपादगतवाक्यस्य विशेषस्य समर्थनात् सामान्येन विशेषसमर्थनरूपो विश्यव्यापनिामार्थान्तरन्यासः)॥१७२॥

## प्रभा

क्रमेणोदाहरन्नादौ विश्वव्यापिनमुदाहरति–**भगवन्तौ इति।** भगवन्तौ षडैश्वर्यसंपन्नौ। जगन्नेत्रे विश्वनयनभूतौ सर्वपदार्थप्रकाशकत्वात्। सूर्यश्च चन्द्रमाश्च सूर्याचन्द्रमसौ। अपि शब्देन अस्तानर्हत्वं सूच्यते। अथवा एतादृशौ अस्तं गच्छतः अन्येषां का कथा इति सूच्यते। गच्छत एव इत्यनेन अयं क्रमः प्रचलित एव न विश्रान्त इति ध्वन्यते। अस्यार्थस्य असंभवमाशङ्क्य समर्थयति–**नियतिरिति।** नियतिः दैवम्। केन लङ्घ्यते न केनापि इत्यर्थः। अत्र समर्थकस्य चतुर्थपादवाक्यार्थस्य ब्रह्मादिपिपीलिकापर्यन्तानां सर्वेषां नियत्यधीनत्वाद् विश्वव्यापित्वम्। तेन सामान्यार्थेन पादत्रयगतविशेषार्थः समर्थितः। अतो विश्वव्यापी नामायमर्थान्तरन्यासः।।१७२।।

## विवृति

भगवन्तौ कृतिनौ। जगतस्त्रिभुवनस्य। नेत्रे उप (इव) नेत्रे सूर्याचन्द्रमसा(व)पि च गच्छत एवास्तं (अवश्यं) गच्छत इत्यर्थः। क्रियापदात्परत एवकारोऽत्यन्तायोगं व्यवच्छिनत्ति। तदुक्तम्–

'विशेषणविशेष्याभ्यां क्रि(य)या च सहोदितं(दितः)।
व्यवच्छिनत्ति धर्मस्य निपांतोऽप्य(व्य)तिरेचकः।।

अयोगं योगः परे(मपरै)रत्यन्तायोगमेव च।'

इति प्रस्तुत्य वस्तु तत्साधनसमर्थस्य न्यासः अन्यस्य वस्तुनः यथा–

नियतिः केन लङ्घ्यते

नियतिरभ(र्भ)वितव्यता केन लङ्घ्यते न केनापि इति किमा सर्वनाम्ना सामान्याभिधायिना नियतेरलङ्घनीयतां प्रतिपादयन् विश्वं व्याप्नोति।

**भगवन्ताविति।** नियतिः केन वा लङ्घ्यते? विधिः सर्वैः अनुवर्तनीयः, इति सर्वेषामपि अनिष्टेषु प्रस्तुतेषु, शासनसमर्थः इति असौ विश्वव्यापी।।

एषां भेदव्यक्त्यै उदाहरणान्याह। तत्र प्रथमं विश्वव्याप्युदाहरणम्–**भगवन्तौ इति।** अस्तं विनाशं एकत्र, अन्यत्र अस्ताचलं, गच्छत एव इति साध्यम्। नियतिः केन लङ्घ्यते इति अर्थान्तरमेतत्। ब्रह्मादिकीटपर्यन्तानां सर्वेषां विनाशनिष्ठता नियतिर्नाम।।१७२।।

---

**जगदानन्दयत्येष मलिनोऽपि निशाकरः।**
**अनुगृह्णाति हि परान् सदोषोऽपि द्विजेश्वरः॥१७३॥**

---

## रत्नश्री

एष निशाकरश्चन्द्रो मलिनोऽपिकलङ्कयोगात् अशुद्धोऽपि जगत् लोकमाह्लादयति प्रीणयति। विरुद्धमेतत्, कथं सकलङ्कः प्रीतिकरोऽदोषस्य तथाभावात्। तत्साधयतिभवत्येवम्। हिः यस्मादर्थे। यतः सदोषोऽपि कथञ्चित् कलङ्कवानपि न केवलमदोषः। द्विजेश्वरश्चन्द्रो विप्रश्चेति श्लेषः। स त्विह तु न विवक्षितः, विरोधस्यैवाभिधित्सितत्वात्। अनुगृह्णाति उपकरोति ह्लादयति परान् धर्मोपदेशादिना। तस्मान्मलिनोऽपि निशाकरो जगदाह्लदयतीत्युपपद्यते। अयं च विरोधवान्। उक्तेन विधिना विरोधर्शनादिति।।

## हृदयङ्गमा

विशेषस्थमुदाहरति, पयोमुच इति।–पयोमुचः जलदाः, शरीरिणां देहिनां, परीतापं सन्तापं, हरन्त्येव अपनयन्त्येव। उक्तमर्थं समर्थयति, नन्विति। –महतां महनीयचरितानां जनानाम्, आत्मलाभः जन्मग्रहणं, परेषां दुःखस्य उपशान्तये नाशाय, ननु निश्चितम्। (अत्र महताम् इत्युक्तेर्न साधारणप्राणिनामिति विशेषलाभात् विशेषस्थता ज्ञेया, तथा मेघापेक्षया महतां सामान्यत्वेन च उत्तरवाक्यरूपेण सामान्येन पूर्ववाक्यरूपस्य विशेषस्य समर्थनमिति सामान्यविशेषभावश्च तदयं विशेषस्थनामार्थान्तरन्यासः, किञ्च परीतापापहरणक्षमस्य जलदस्य

न्यसनं विधाय तत्साधनसाधर्म्येणैव तत्साधनक्षमं महापुरुषलक्षणं वस्त्वन्तरं न्यस्यति इति साधर्म्येण अर्थान्तरन्यासश्च इति निष्कर्षः)।।१७३।।

## प्रभा

विशेषस्थमर्थान्तरन्यासमुदाहरति–**पयोमुच इति**। पयोमुचः वारिदाः। शरीरिणां प्राणिनाम् परीतापं निदाघार्कसंतापं हरन्ति एव। अमुमर्थं समर्थयते–महतामात्मलाभः जन्मग्रहणं परदुःखोपशान्तये परेषां दुःखस्य उपशान्तये शमनाथ अस्तीति शेषः। ननु इति निश्चये। अत्र च सर्वमहद्वर्णनपरेणोत्तरवाक्यार्थेन महद्विशेषाणां पयोमुचां वर्णनपरस्य पूर्ववाक्यार्थस्य समर्थनं तेनार्थान्तरन्यासालंकारः। तत्र समर्थकवाक्ये महतामेवैतादृशी रीतिर्न प्राणिमात्रस्य इति विशेषस्थता बोध्या।।१७३।।

## विवृति

विशेषस्थत्वमुदाहरति–

इत्युपन्यस्य वस्तु तत्साधनसमर्थस्यान्यस्य वस्तुनो न्यासः

महतां स्वात्मलाभो न कनीयसामिति विशेषस्थः।।

**पयोमुच इति**। अत्र महतां आत्मलाभः इति महदुपादानात् विशेषस्थः। 'अवाप्तव्यान्यवाप्तानि यस्य सर्वाणि देहिनः। परोपकारव्यसनी स महानभिधीयते' इति पयोमुचां महत्त्वम्। अथवा महान् उदारः।।

परदु खोपशान्तिहेतुः शरीरपरिग्रहो महतामेव इति विशेषस्थोऽयम्।।१७३।।

**मधुपानकलात् कण्ठान्निर्गतोऽप्यलिनां ध्वनिः।**
**कटुर्भवति कर्णस्य कामिनां पापमीदृशम्॥१७४॥**

## रत्नश्री

मधुनः कुसुमासवस्य पानेन कलान्मधुरात् कण्ठान्निर्गतोऽलिनां मधुलिहां मधुरोऽपि ध्वनिः कामिनां विरहिणा[60b]मपि कर्णस्य कटुरुद्वेजनीयोऽत्यन्तोत्कण्ठाकरत्वाद् भवति। एतच्चायुक्तम्। कथमीदृशः प्रीतिकरो ध्वनिः उद्वेजयति तत्साध्यते किं न युक्तम्, यतः पापमीदृशं कामिनां रागिणाम् एवंरूपं कर्म यतोऽयमेवंविधो मधुरो ध्वनिः अन्यथा प्रतिभाति। किमत्र क्रियताम्! तस्मात्सम्भवत्येतदिति साधितम् अयमयुक्तकारी मधुरस्य ध्वनेः उद्वेगहेतुत्वायोगादिति॥

## हृदयङ्गमा

श्लेषाविद्धमुदाहरति, उत्पादयतीति। –दाक्षिण्यसम्पन्नः दक्षिणदिगागतः, अन्यत्र,–औदार्य्यगुणयुक्तः, मलयमारुतः लोकस्य प्रीतिम् उत्पादयति; तथा हि, दाक्षिण्यसम्पन्नः लोकः सर्वस्य प्रियो भवति ननु। (अत्र दाहिण्यसम्पन्न इत्यस्य श्लिष्टत्वेन उत्तरवाक्यस्य पूर्ववाक्यसमर्थकत्वमिति श्लेषाविद्धनामार्थान्तरन्यासः, अत्रापि सामान्यविशेषभावः बोद्धव्यः)॥१७४॥

## प्रभा

श्लेषाविद्धमुदाहरति–**उत्पादयतीति।** दाक्षिण्यसंपन्नः सारल्यादिः गुणान्वितः दाक्षिण्येन दक्षिणदिक्संबन्धेन संपन्नश्च सर्वस्य प्रियः भवति। अत्रापि समर्थ्यसमर्थकयोः सामान्यविशेषता।

तत्र समर्थकस्य दाक्षिण्यसंपन्नः सर्वस्य प्रियो भवति इति वाक्यार्थस्य दाक्षिण्यसंपन्नस्य प्रियभवनं समुचितमेवेति श्लिष्टानुविद्धोर्थान्तरन्यासः।।१७४।।

## विवृति

श्लेषाविद्धमुदाहरति–

(एत)दै (दे)वोत्तरार्धेन समर्थयते–

दक्षिणस्य भावो दाक्षिण्यं तेन सम्पन्नः कस्य प्रियं नावहति सर्वस्य सुखमाबहत्येवेति। दाक्षिण्यं दक्षिणादिभ्यो हस्तयोर (दक्षिणदिग्भवत्वं वायोः। अ)न्यत्र दाक्षिण्यमुपरोधशीलतात्मकं पापरता (सरलत्वं?) चेति श्लेषाविद्धः।।

**उत्पादयतीति।** दाक्षिण्यं दक्षिणदिग्भवत्वम्, अन्यच्छन्दानुवर्तित्वञ्च, इति श्लेषाविद्धत्वम्; 'देयभेदे तु दक्षिणा, त्रिष्वर्कसरलावामेष्वन्यच्छन्दानुवर्तिनिं इति।।

**उत्पादयतीति।** दाक्षिण्यशब्दस्य स्वाभाविकार्थाः बहवः–दक्षिणदिक्सम्भवो, दाक्षिण्ययुक्तः, समर्थश्च। तेषु अन्यतमः साध्यतया निर्दिष्टः। साधनभूतेन अन्यतमेन साध्यते, इति श्लेषाविद्धः।।१७४।।

---

**अयं मम दहत्यङ्गमम्भोजदलसंस्तरः।**
**हुताशनप्रतिनिधिर्दाहात्मा ननु युज्यते॥१७५॥**

---

## रत्नश्री

अम्भोजानां कमलानां दलानि पत्राणि तेषां तन्मयो वा संस्तरः तल्पम्। अयम् अनुभूयमानः मम अङ्गं देहं दहति तापयति। युक्तं चैतत्। कथम्? हुताशनस्य अग्नेः प्रतिनिधिः सदृशः पाटलत्वात् दाहात्मा दाहस्वभावो रक्तपद्मपत्रसंस्तरो युज्यते नन्विति साधितम्। अयं च युक्तात्मा कथितेन विधिना दाहकत्वयोगादिति॥

## हृदयङ्गमा

विरोधवन्तमुदाहति, जगदिति।—एष निशाकरः, मलिनोऽपि सकलङ्कोऽपि, जगत् आनन्दयति। तथा हि द्विजेश्वरः ब्राह्मणश्रेष्ठः, सदोषोऽपि, परान् अन्यान्, अनुगृह्णाति उपदेशदानादिना उपकरोति इत्यर्थः। सदोषा हि न खलूपकुर्वन्ति इति विरोधः। (अत्र निशाकरद्विजराजयोः निशाकरस्यापि द्विजराजत्वेन द्विजराजस्यैव सामान्यत्वमिति सामान्येन विशेषस्य समर्थनं, तच्च सदोषत्वानुग्रहकत्वरूपयोर्विरुद्धधर्मयोः सामानाधिकरण्यात् विरोधयुक्तमिति विरोधवदर्थान्तरन्यासः)॥१७५॥

## प्रभा

विरोधवन्तमुदाहरति—**जगदानन्दयतीति**। एष मलिनोपि कलङ्कितोपि। सदोषश्चेति ध्वनिः। निशाकरो जगदानन्दयति आह्लादयति। ननु मलिनस्य कथमेतदिति सामान्येन समर्थयति—**अनुगृह्णातीति**। द्विजेश्वरः ब्राह्मणश्रेष्ठः अत्र सदोषः

दोषा रात्रिः तया सहितः सदोषः। द्विजेश्वरः चन्द्रः। चन्द्रोपि द्विजराजत्वेन प्रसिद्धः। तेन च द्विजेश्वर इति सामान्यरूपेण निशाकर आह्लादयति इति विशेषार्थस्य समर्थनम्। मलिनत्वाह्लादनत्वयोर्विरुद्ध- धर्मत्वात्तयोरेकत्र संवेशः समर्थनीयः। स च सदोष द्विजेश्वररूपसामान्येन समर्थितः। एवं विरुद्धार्थस्य समर्थनादयं विरोधवानर्थान्तरन्यासः। समर्थ्यसमर्थकयोः सामान्यविशेषभावः। तत्र च समर्थकवाक्यार्थः सदोषत्वानुग्राहकत्वरूपविरुद्ध- धर्माभ्यामवस्कन्दितः। अतः विरोधवदर्थान्तरन्यासोयम्।।१७५।।

## विवृति

विरोधवानुदाह्रियते–

स्वयं मलिनस्य जगदाह्लादकारित्वं कथमिति विरोधः।

इति विरोधवान्।।

**जगदिति।** द्विजेश्वरः ब्राह्मणः चन्द्रश्च। द्विजराजः सदोषोऽपि अनुगृह्णाति इति विरोधः।।

जगदिति विरोधवतः उदाहरणम्। द्विजेश्वरः इति अर्थान्तरन्यासः। सदोषोऽपि ब्राह्मणमुख्यः परान् अनुगृह्णाति।।१७५।।

क्षिणोतु कामं शीतांशुः किं वसन्तो दुनोति माम्।
मलिनाचरितं कर्म सुरभेर्नन्वसाम्प्रतम्।।१७६।।

---

## रत्नश्री

कामं नामाभ्युपगमे शीतांशुश्चन्द्रः मां क्षिणोतु तापयतु युक्तमेतत्। वसन्तः किं कस्मात् मां दुनोति तापयति? नैतद् युक्तम्। इदं त्वयुक्तमिति साधयन्नाहमलिनेत्यादि। मलिनेन कलङ्किना शीतांशुना आचरितम् अनुष्ठितं कर्म क्रिया तापलक्षणम् असाम्प्रतम् अयुक्तम्। ननु कस्य? सुरभेर्वसन्तस्य सुरभेश्चाभिलषितस्येति श्लेषः। कथं दुष्टानुष्ठितं कर्म निर्दोषो जुषति। तस्मात् क्षिणोतु शीतांशुः। वसन्तः किं दुनोतीति पूर्वं समर्थितम्। अयं युक्तायुक्तः, शीतांशुना तापस्य योगात् वसन्तेनायोगादुक्तेन विधिनेति।।

## हृदयङ्गमा

अयुक्तकारिणमुदाहरति, मध्विति। –मधुपानेन कलात् मधुरात्, अलिनां भ्रमराणां, कण्ठात्, निर्गतोऽपि ध्वनिः, कामिनां विरहिणां, कर्णस्य, कटुर्भवति। तथाहि, पापम्, ईदृशं सुखप्रदस्यापि वस्तुनो दुःखदातृत्वरूपमित्यर्थः। एतेन कामित्वस्य पापत्वमुक्तम्। (अत्र मधुरस्यापि भ्रमरध्वनेः कटुत्वप्रतिपादनमयुक्तं पापञ्च तत्समर्थकमिति अयुक्तकारिनामार्थान्तरन्यासः, तथा सामान्येन पापपदार्थेन विशेषस्य भ्रमरध्वनेः समर्थनात्, सामान्येन विशेषसमर्थनरूपो नवीनोक्तोभेदश्च सम्भवतीति बोध्यम्; यद्वा पापरूपकारणेन तादृशध्वनेः कटुभवनरूपकार्य्यं समर्थितमिति कारणेन कार्य्यसमर्थनरूपोऽर्थान्तरन्यासः।।१७६।।

## प्रभा

अयुक्तकारिणमुदाहरति-**मधुपानेति।** मधुपानं मकरन्दास्वादस्तेन कलात् मधुरात्। अलीनां भ्रमराणाम् कण्ठात् निर्गतोपि ध्वनिः गुञ्जारवः। कामिनां विरहिकामुकानां कर्णस्य कटुर्भवति कर्णारुंतुदो भवति। एतत् सामान्येन समर्थयति-**पापमीदृशमिति।** ईदृशं सुखदवस्तुनोपि दुःखदत्वम्। अत्र कामिनां पापस्वरूपत्वं विषयासक्तत्वेन ज्ञेयम्। अत्र पापस्य दुःखकारित्वरूपसामान्येनार्थेन मधुरस्यापि भ्रमरध्वनेर्दुःखदत्व- रूपविशेषार्थस्य समर्थनादर्थान्तरन्यासः। तत्र च सामान्यपापरूपसमर्थकस्य मधुरध्वनेः कटुत्वसंपादना- दयुक्तकारिता।।१७६।।

## विवृति

अयुक्तकारी उदाह्रियते-

मधुपानकलात्कण्ठान्निर्गतोऽप्यलिनां ध्वनिः। किल [कलः] कर्णमधुरः इति युक्तम्। एतत्तु विपरीतमित्युक्तकारी।।

**मध्विति।** अलिनां मधुपानेन कलात् कण्ठात् निर्गतः श्रोत्रहारी अपि ध्वनिः कामिनां विरहिणां कर्णस्य कटुः भवति। पापं अयुक्तं करोति हि।।

**मध्विति।** पापोपहतानां सर्वमपि विपर्यस्यते इति अर्थान्तरस्य प्रदर्शितत्वात् अयुक्तकारिणः उदाहरणं इदम्।।१७६।।

---

**कुमुदान्यपि तापाय किमङ्ग! कमलाकरः।**
**नहीन्दुगृह्येषूग्रेषु सूर्यगृह्यो मृदुर्भवेत्॥१७७॥**

## रत्नश्री

तापाय पीड़ार्थं कल्पन्ते। अयुक्तमेतदिति अपिशब्देनायोगः सूच्यते। चन्द्रपक्षाणां तापकारित्वायोगात्। किमङ्ग किं पुनः कमलाकरः तापाय न भवेत्। भवत्येव। युक्तमेतत्। किं तदयुक्तमिदं तु युक्तमिति साधयति-नहीत्यादि। इन्दोःएकान्तशीतस्य गृह्येषु पक्षेषु कुमुदेषूग्रेषु तापकारिषु, सूर्यस्य एकान्ततप्तस्य गृह्यः आयत्तः कमलाकरो मृदुः शीतो भवेत्। कथमेवं सम्भवति? तस्मात् कुमुदानां तापकरत्वम् अयुक्तम्। कमलाकरस्य तु युक्तमिति साधितम्। अयं तु विपर्ययो युक्तायुक्त इति॥

[61a]आदिग्रहणसंगृहीताः केचिद्भेदा उदाह्रियन्ते॥

सुखाय सुधियां लक्ष्मीर्न कदाचिदशर्मणे।

किमुत श्रीः सुखप्राप्त्यै जायते न विपश्चिताम्॥

अविरुद्धोऽयम्॥

सुखाय विपदः सन्तु सम्पदोऽपि सुखाय ते।

दुर्नयप्रस्थितानां हि सम्पदोऽपि विपत्तयः॥

अविरुद्धविरुद्धोऽयम्॥

अपकारोऽप्युपात्तेषु हिताय किमु सत्कृतिः।

कृपाध्यासितचित्तानामीदृशी महतां स्थितिः॥

एवमन्येप्यादिशब्दसंगृहीताः प्रभेदा ऊहितव्या इति।।

।। अर्थान्तरन्यासचक्रम् ।।

व्यतिरेकमाविष्कुर्वन्नाह–

## हृदयङ्गमा

युक्तात्मानमुदाहरति, अयमिति। –अयं हुताशनप्रतिनिधिः अग्निसदृशः, अम्भोजानां पद्मानां, दलैः संस्तरः शय्या, मम अङ्गं दहति। तथाहि, दाहः दाहात्मकः, आत्मा स्वभावः, दाहकत्वरूपा प्रकृतिरित्यर्थः, अग्नेरिति शेषः, युज्यते। (अत्र पद्मदलरूपशय्यायाः शीतलत्वमेवयुक्तं, दाहकत्वं न युक्तं, हुताशनप्रतिनिधित्वेन अङ्गदाहकत्वं युक्तमेवेति समर्थकस्य युक्तात्मत्वात् युक्तात्मनामार्थान्तरन्यासः, सामान्यविशेषभावश्च पूर्ववत्)।।१७७।।

## प्रभा

युक्तात्मानमुदाहरति–**अयमिति**। अयम् अम्भोजदलसंस्तरः कमलदलैः कल्पिता शय्या मम अङ्गं दहति। शीतलानां कमलदलानां कथमेतदिति अनुपपत्तिं परिहरति–**हुताशनेति**। यो हुताशनस्य अग्नेः प्रतिनिधिः प्रतिकृतिः। अनेन उज्ज्वलारक्तकमलानां अग्निप्रतिनिधित्वं सूच्यते। स दाहात्मा दाहस्वरूप इति युज्यते। ननु इति निश्चये। अत्र हुताशनप्रतिनिधित्वरूपसामान्येन तत्प्रतिनिधिविशेषस्य अम्भोज–

दलसंस्तरस्य अङ्गदाहकसमर्थनात् सामान्येन विशेषस्य समर्थनम्। तत्र च समर्थके हुताशनप्रतिनिधौ दाहकत्वस्य समुचितत्वाद् युक्तात्मायमर्थान्तरन्यासः।।१७७।।

## विवृति

युक्तात्मा उदाह्रियते–

अयमम्भोजदलसंस्तरो ममाङ्गं दहतीति। तदेव समर्थयते। हुताशनप्रकृति(तिनिधि)रग्निसमानद्युतिर्दाहात्मा दहनस्वभावो भवतीति युक्तमेव।।

**अयमिति।** हुताशनप्रतिनिधिः– अम्भोजदलप्रस्तरस्य पीतवर्णतया हुताशनसादृश्यम्। इति युक्तकारी।।

**अयमिति।** अयं अम्भोजदलसंस्तरः मां दहतीति शीतलस्य दाहस्वभावं प्रकृत्य हुताशनप्रतिनिधिः हुताशनसदृशो दाहात्मा भवतीति युज्यते इति युक्तात्मनः उदाहरणम्।।१७७।।

---

**शब्दोपात्ते प्रतीते वा सादृश्ये वस्तुनोर्द्वयोः।**
**तत्र यद् भेदकथनं व्यतिरेकः स कथ्यते॥१७८॥**

## रत्नश्री

विवक्षितयोः कयोश्चिद् द्वयोर्वस्तुनोरर्थयोः सादृश्ये कथञ्चित् तुल्यत्वे शब्देन वाचकेन साक्षादुपात्ते प्रतिपादिते सति शब्दाद्वा उपात्ते गृहीते प्रतिपत्तिप्रतीते वा। अशब्दोपात्तेऽपि शब्दोपात्तार्थबलात् प्रकरणादेर्वा ज्ञाने न केवलं शब्दोपात्ते। द्वयी खलु प्रतीतिः सम्भवति। शाब्दी नैयायिकी च, अन्यथा प्रतीत्यसंभवात्। यदुक्तम्–

नहि प्रतीतिः सुलभा शब्दन्यायविलङ्घिनीइति।

[१.७५]

तत्र तयोर्वस्तुनोर्विषये भेदस्य कस्यचिद्विशेषणस्य तत्सम्बन्धिनः कथनमभिधानं यदीत्यनूद्य स व्यतिरेक; कथ्यत इति विधीयते॥

तमुदाहरन्नाह–

## हृदयङ्गमा

युक्तायुक्तमुदाहरति, क्षिणोत्वित्यादि।–शीतांशुः चन्द्रः, कामम् अत्यर्थं, क्षिणोतु पीड़यतु, तस्य कलङ्कित्वात् परपीडनं युक्तमिति भावः, वसन्तः, किं कथं, मां दुनोति तापयति। तथाहि, सुरभेः

सुविख्यातनामधेयस्य अथच वसन्तस्य, ("मधौ कामदुघायाञ्च विख्याते सुरभिर्द्वयोः" इति कोषः)। मलिनेन कलङ्किना, अथच पापिना, आचरितं, कर्म परपीड़नरूपम्, असाम्प्रतम् अयुक्तं, ननु। (अत्र उत्कृष्टस्य सुरभेः अपकर्मकरणेन युक्तायुक्तत्वम् इति युक्तायुक्तनामार्थान्तरन्यासः। तथा मलिनसुरभिशब्दयोः श्लिष्टत्वेन च श्लेषाविद्धोऽपीत्यनयोः सङ्करः)।।१७८।।

## प्रभा

युक्तायुक्तमुदाहरति–**क्षिणोत्विति।** शीतांशुः शीतकिरणो मृगाङ्को मां कामं पर्याप्तं क्षिणोतु हिनस्तु। परं वसन्तः माधवः मां किं दुनोति कथं पीडयति। नैतद्युक्तमिति सामान्येन दर्शयति। सुरभेः श्रेष्ठस्य वसन्तस्यापि मलिनाचरितं मलिनैः पापैराचरितम्। तथा मलिनेन कलङ्कितेन चन्द्रेणाचरितम्। कर्म परपीडकत्वम् असांप्रतम् अयुक्तम्। अत्र सामान्येन विशेषस्य समर्थनम् तत्रोत्कृष्टस्य सुरभेरपकृष्टकर्माचरणे युक्तेन अयुक्ताचरणम् इति युक्तायुक्तता तन्नामार्थान्तरन्यासः।।१७८।।

## विवृति

अयु(यु)क्तायुक्तदाहरति–

क्षिणोतु कामं शीतांशुरिति युक्तमेतत्। किं च(व)सन्तो दुनोतीति तु(?)मामित्ययुक्तम्। तदेव समर्थयते। मलिनाचरितं मलिनेन (स)लाञ्छनेन (आ) चरितं कर्म परपीडाकरणं

सुरभेर्वसन्तस्य निर्मलात्मनो नन्वसांप्रतमिति युक्तः एतत् (त्ययुक्तमेतत)।।

**क्षिणोत्विति।** सुरभिः सौम्यो वसन्तश्च। मलिनस्य युज्यते परपीडनम्, न सौम्यस्य इति युक्तायुक्तत्वम्।।

**क्षिणोत्विति।** मलिनः इन्दुः निकृष्टश्च। सुरभिः वसन्तः सत्पुरुषश्च। विरोधवति युक्तात्मनि युक्तायुक्ते च अर्थान्तरन्यासे श्लेषानुबन्धे सत्यपि, प्रागुक्तन्यायेन न तव्द्यपदेशः।।१७८।।

---

**धैर्यलावण्यमाहात्म्यप्रमुखैस्त्वमुदन्वतः।**
**गुणैस्तुल्योऽसि भेदस्तु वपुषैवेदृशेन ते॥१७९॥**

## रत्नश्री

धैर्यं निर्विकारत्वं लावण्यं सौन्दर्यं लवणरसत्वं च महात्म्यं गुणलक्षणं वैपुल्यं च प्रमुखम् आदिर्येषामेवमादीनां तैर्गुणैः त्वं विवक्षितः कश्चित्। उदन्वतः समुद्रस्य तुल्योऽसि। सादृश्यमुक्तम्। भेदं दर्शयन्नाह-भेदस्त्वित्यादि। भेदस्तु विशेषको वपुषा ईदृशेन दृश्यमाने[न] करचरणादिमता रुचिरेण वपुषा शरीरेणैव नान्यथा। तस्येदृशं वपुर्नास्तीति॥

तद् व्याचष्टे-

## हृदयङ्गमा

विपर्य्ययमुदाहरति, कुमुदानीति।-कुमुदान्यपि अतिशीतला-न्यपीत्यर्थः, दाहाय दाहकानीत्यर्थः, अयं कमलानामाकरः पद्मानीत्यर्थः, किं का कथा पद्मस्येत्यर्थः, सूर्य्यगृह्यत्वात् तस्य नातिशीतत्वमिति भावः। इन्दुगृह्येषु चन्द्रपक्षेषु, उग्रेषु दाहकेषु, सूर्य्यगृह्यः सूर्य्यपक्षः, न हि मृदुः शीतलः, भवेत्, यस्य शीतलः इन्दुपक्षोऽपि क्लेशावहः तस्य उग्रस्य सूर्य्यपक्षस्य क्लेशावहत्वं किमु वक्तव्यमिति भावः। (अत्र अयुक्तस्य कुमुदस्यापि अयुक्तकरणात् अयुक्तकारियुक्तात्मयुक्तायुक्तरूपत्वितयाद्विपर्य्यय इति विपर्य्ययनामार्थान्तरन्यासः। स च इन्दुगृह्यसूर्य्यगृह्यपदघटित-वाक्यरूपसामान्येन पूर्वार्द्धवाक्यरूपविशेषः समर्थित इत्यवधेयम्)॥१७९॥

## प्रभा

विपर्ययं दर्शयति–**कुमुदान्यपीति**। विरहिण्या उक्तिरियम्। कुमुदान्यपि चन्द्रविकासीनि कमलान्यपि दाहाय जायन्ते। अपिशब्देन शीतांशुरागिणां तेषां दाहकत्वमत्याश्चर्यास्पदमिति ध्वनितम्। अयं कमलाकरः सूर्यविकासिकमलसमूहः दाहाय भवेद् इति किं वक्तव्यम्। जगद्दाहकसूर्यानुरक्तत्वेन तस्य विरहिजनदाहकत्वं नाश्चर्यास्पदम्। उक्तार्थमेवार्थान्तरेण द्रढयति–**नेति**। इन्दुगृह्येषु इन्दुपक्षीयेषु उग्रेषु सत्सु सूर्यगृह्यः सूर्यपक्षीयो मृदुर्न भवेत्। अत्र सामान्येन विशेषस्य समर्थनम्। तत्र समर्थ्यवाक्ये कुमुदे अयुक्तकारिता कमले युक्तकारिता इति अयुक्तयुक्तकारिता। तथा च अयुक्तं च युक्तं च अयुक्तयुक्तं तस्य कारिता इति समासः। एतानि सर्वाण्यपि साधर्म्येणोदाहरणानि। वैधर्म्येण यथा–

वक्षोजकुम्भनिवहाद्वनिताजनानां
ग्रीष्मर्तुना विनिहितं ग्रहराजपुत्री।

तापं पितुः स्वमहरत् तरलोर्मिहस्तै-
रन्यं न याति हि विभूतिरपत्यभाजाम्।।

अत्र सामान्येन अपत्यभाजां विभूतिरन्यं न याति इति निषेधमुखेन ग्रहराजपुत्री तापं पितुरहरद् इति विधिमुखस्य वाक्यार्थस्य समर्थनाद् वैधर्म्येणायमर्थान्तरन्यासः।।१७९।।

## विवृति

विपर्ययमुदाहरति–

कुमुदान्यपि दाहाय कुमुदानां दाहकरणमयुक्तं किमङ्ग किं

पुनरहो कमलाकराः। कमलाकराः सुतराम्। कमलाकराणां दाहकरत्वमयु(यु)- क्तमेव। तदेव समर्थयते। न हीन्दुगृह्येषु उग्रेषु चन्द्रपक्षपातिषु कुमुदेषूग्रेषु सत्सु सूर्यगृह्यो मृदुर्भवेत् सूर्यपक्षपातिनः कमलाकरा नम्रदपसरस्वयच्छीलाभ्यस्य (?) प्रकृतयो भवन्ति। सकलजनाह्लादनकरशशधरबन्धुषु दहत्सु नितरां खरकरपक्षपातिनः कमलाकरा दहन्तीत्ययुक्तः (त्ययुक्तयुक्तः)।।

**कुमुदानीति।** किमङ्ग किं पुनः। कुमुदानां शीतलचन्द्रपक्ष्यत्वात् तापकरत्वं अयुक्तम्; कमलाकरस्य उष्णकरपक्ष्यत्वात् तापकरत्वं युक्तम्। इति अयुक्तयुक्तरूपः अर्थान्तरन्यासः।।

**कुमुदानीति।** शीतगुणयुक्तस्य तापकरणं विपर्ययो भवति। एनमर्थमुद्दिश्य अर्थान्तरन्यासः अभिहितः। इन्दुपक्षेषु उग्रेषु सत्सु, सूर्यपक्षा उग्रप्रायाः किल मृदुत्वे न समुपेता भवन्ति, इति विपर्ययार्थान्तरन्यासस्य उदाहरणम्।।१७९।।

---

**इत्येकव्यतिरेकोऽयं धर्मेणैकत्रवर्तिना।**
**प्रतीतिविषयप्राप्तेर्भेदस्योभयवर्तिनः॥१८०॥**

---

## रत्नश्री

इत्येवंप्रकारो यः सोऽयमेकव्यतिरेको विज्ञेयः। कुतः? एकत्रवर्तिना पुंसि एकत्र वर्तमानेन धर्मेण स्वभावेनेदृशेन वपुरात्मना शब्दोपात्तेन हेतुना उभयवर्तिनः पुरुषोदन्वतोः, तस्य भेदस्य विसदृशत्वस्य प्रतीतेः। [61b]प्रतीतिर्वा विषयो गोचरः, तस्य तत्र वा प्राप्तेः कारणात्। प्रतीयमानत्वादिति यावत्॥

## हृदयङ्गमा

व्यतिरेकमाह, शब्दोपात्ते इति। –द्वयोर्वस्तुनीः उपमानोपमेययोः, सादृश्ये, शब्दोपात्ते साधारणधर्मप्रतिपादक-शब्दप्रयोगेण बोधिते प्रतीते वा, साधारणधर्मवाचकशब्दानुपादानात् व्यञ्जनया सूचिते सति, तत्र इति षष्ठार्थे सप्तमी तयोरित्यर्थः, यत् भेदकथंन उत्कर्षाय अपकर्षाय वा केनचिदसाधारणधर्म्मान्तरेण वैधर्म्माप्रतिपादनम्, स व्यतिरेकः, कथ्यते व्यतिरिच्यते, उपमानाद्व्यावर्त्यते अनेनोपमेयमिति व्युत्पत्त्या व्यतिरेकनामा उच्यते। (तथा च,–यत्र केनचिद्धर्म्मेण उपमानापेक्षया उपमेयस्य उत्कर्षायापकर्षाय वा वैलक्षण्यं वर्ण्यते स व्यतिरेक इति लक्षणम्। वैलक्षण्यञ्च द्विधा सम्भवति, उपमानादुपमेयस्याधिकगुणत्वे न्यूनगुणत्वे च। तदुक्तमलङ्कारसर्वस्वकृता,–"भेदप्राधान्ये उपमानादुपमेयस्याधिक्ये विपर्य्यये वा व्यतिरेकः॥" इति। उत्कर्षापकर्षहेतोरुक्तयनुक्तयादिभेदादस्य चतुर्विंशतिभेदाश्च अन्यैरुक्ताः, तदुक्तं विश्वेश्वरपण्डितेन, यथा–

''हानिप्रकर्षहेत्वोरुक्तौ त्रेधा च तदनुक्तौ। शब्दार्थाक्षेपोत्थे साम्ये श्लेषे च दिग्युगमितः सः।।'' अस्यायमर्थः,– ''उपमानस्यापकर्षनिमित्तम्, उपमेयस्य उत्कर्षनिमित्तञ्च इत्युभयमपि यत्रोक्तं तत्रैकः, अपकर्षहेतुमात्रस्य उत्कर्षहेतुमात्रस्य चोक्तौ, द्वयोरप्यनुक्तौ च त्रयो भेदा इति चत्वारः। ते च प्रत्येकं शाब्दे आर्थे आक्षिप्ते च सादृश्ये द्वादशभेदाः सर्वेषां श्लिश्टाश्लिष्टाभ्यां द्वैविध्याच्चतुर्विंशतित्वम्'' इति। अत एवोक्तं विश्वनाथेन यथा,–''अधिक्यमुपमेयस्योपमानान्न्यूनताथवा। व्यातिरेकः– ''इति। तत्र उत्कर्षोदाहरणानि वक्ष्यमाणानि, अपकर्षोदाहरणं दर्पणकारेणोक्तम्। यथा,–''क्षीणः क्षीणोऽपि शशी भूयो भूयोऽभिवर्द्धते नित्यम्। विरम प्रसीद सुन्दरि! यौवनमनिवर्त्ति यातन्तु''।। अत्र उपमेयस्य यौवनस्य उपमानात् चन्द्रादचिरस्थायित्वेनापकर्षः। अत्र केचिदाहुः उपमेयगते वैशिष्टे एवायमलङ्कार इति, तन्मते चन्द्रयौवनयोरुपमानोपमेभावः विवक्षितः, किन्तु चन्द्रक्षययौवनक्षययोरेव। तत्र चन्द्रक्षयस्य वृद्धिप्रागभावसमानकालीनत्वेन न्यूनत्वं, यौवनक्षयस्य चाग्रे तच्छरीरावच्छेदेन यौवनाभावात् समानाधिकरण्यौवनप्रागभाव-समानकालीनत्वं नास्तीति आधिक्यम्। ननु तथापि तेषां ''हनुमदाद्यैर्यशसा मया पुनः द्विषां हमैर्दौत्यपथः सितीकृतः।'' इत्यत्र हनुमदादिदौत्यापेक्षया नलेन स्वकृदौत्ये हीनत्वं प्रदर्श्यते इति का गतिरिति चेत् प्रकृतश्चात्र नलनिर्वेदः तदुत्कर्षत्वञ्च दौत्यनिष्ठोक्तापकर्षकस्यापि सम्भवतीति दिक्)।।१८०।।

## प्रभा

व्यतिरेकं लक्षयति–**शब्दोपात्त इति।** द्वयोर्वस्तुनोः अर्थात्

उपमानोपमेययोः सादृश्ये शब्दोपात्ते साधारणधर्मवाचकेवादि-प्रयोगेण बोधिते। किंवा तुल्यसमादिशब्दप्रयोगे लक्षणया ज्ञाते। अथवा साधारणधर्मवाचकस्यानुपादाने पूर्वापरविमर्शेनावगते सति। तत्र सादृश्ये लक्षणया सादृश्यसंबधिनोः प्रतियोग्यनुयोगिभूतयोरुपमानोपमेययोर्यद्भेदकथनं केनचिद्धर्मविशेषेण उपमानादुपमेयस्योत्कर्षाय भेदप्रतिपादनम् स व्यतिरेको भवतीति शेषः। स च उपमेयोत्कर्षोपमानापकर्षोपादानाद् द्वयोरेकस्य वानुपादानाच्चतुर्विधः। उपमानोपमेययोर्भेदकथनं च क्वचिन् नञादिभिः क्वचिद् विरुद्धधर्मोपादानमात्रेण संभवति। क्वचिच्च तात्पर्यार्थपर्यालोचनया भवति। एतत् सर्वमुदाहरणेषु दर्शयामः। केचित्तु उपमानादुपमेयस्य भेदकथने उपमेयस्योत्कर्षकथनवदपकर्षकथनेनापि व्यतिरेकं मन्यन्ते उदाहरन्ति च–

क्षीणः क्षीणोपि शशी भूयो भूयोभिवर्धते नित्यम्।
विरम प्रसीद सुन्दरि यौवनमनिवर्ति यातं तु।।

अत्र उपमेययौवनस्योपमानचन्द्रापेक्षया अपकर्षः। परं नैतदाचार्यदण्डिसंमतम्। उदाहरणेषु तादृशभेदोदाहरणस्यानुपलम्भात्। तथैव मम्मटजगन्नाथादयोपि उपमानादुपमेयस्ये व्यतिरेक आधिक्यं तेन भेदश्चेत् तर्हि इममलंकारं स्वीकुर्वन्ति। अपकर्षे तु न। उक्तोदाहरणे व्यतिरेकविषये तु तेषामेवमाशयः। यदत्र उपमेये यौवनास्थैर्याधिक्यमपेक्षितम्। अतोस्त्येवोपमानादुपमेयस्याधिक्यम्। व्यतिरेकेस्मिन् भेदकथनं स्पष्टतया अपेक्ष्यते। तेन मुखमिव चन्द्र इति प्रतीपे उपमानीकरणप्रयुक्तस्याधिक्यस्य मुखे गम्यत्वेपि विशेषतस्तद्बोधकशब्दाभावान्नातिव्याप्तिरिति।।१८०।।

## विवृति

इत्यर्थान्तरन्यासचक्रम्।

व्यतिरेकलक्षणमाह–

शब्देनोपात्ते अभिहिते सादृश्ये सदृशयोर्भावः सादृश्यं तस्मिन् वस्तुनोर्द्वयोस्तत्र तयोर्मध्ये यदेकस्य वस्तुनो भेदकथनं विशेषाभिधानं व्यतिरेकः स कथ्यते। प्रतीते वा। शब्देनानुपात्ते किं तु प्रतीते सामर्थ्यादिनाऽवगते सति सादृश्ये द्वयोर्यदेकस्य भेदकथनं स च व्यतिरेक इति द्विधा व्यतिरेको भवति।।

व्यतिरेकं लक्षयति–**शब्देति**।।

व्यतिरेकालङ्कारलक्षणमाह–**शब्देति**। वाचकशब्देन वा सामर्थ्येन वा द्वयोः पदार्थयोः साम्ये परिज्ञाते सति भेदकथनं व्यतिरेको नाम।।१८०।।

---

**अभिन्नवेलौ गम्भीरावम्बुराशिर्भवानपि।**
**असावञ्जनसंकाशस्त्वं तु चामीकरच्छविः॥१८१॥**

## रत्नश्री

अम्बुराशिः सागरः। भवानपि त्वं चाभिन्नवेलौ। अभिन्ना अनतिक्रान्ता वेला मर्यादा याभ्यामिति। गम्भीरावगाधस्वभावाविति सादृश्यम्। भेदमाह–असावम्बुराशिरञ्जनसंकाशः अञ्जनेन तुल्यः। कृष्ण इति यावत्। त्वं तु भवान् पुनः चामीकरस्य सुवर्णस्येव च्छविर्वर्णोऽस्येति चामीकरच्छविर्गौर इति यावत्॥

तद्विवृणोति–

## हृदयङ्गमा

व्यतिरेकस्यास्य बहुषु भेदेषु सत्सु शब्दोपात्तसादृश्यभेदान् प्रथमं दर्शयन् तत्रैकव्यतिरेकमाह धैर्य्येत्यादि। –धैर्य्यम् अनौद्धत्यम्, अनतिक्रान्तवेलत्वञ्च, लावण्यं सौन्दर्यं लवणमयत्वञ्च, गाम्भीर्य्यं दुरवगाहस्वभावत्वम् अगाधत्वञ्च, इत्यादिभिर्गुणैः, त्वम् उदन्वतः समुद्रस्य, तुल्योऽसि, केवलम्, ईदृशेन अतिमनोहरेण इत्यर्थः, वपुषा शरीरेण, ते तव भेदः उदन्वत इति शेषः। अत्र एकत्र उपमेये एव, वर्त्तिना स्थितेन, धर्मेण अतिमनोहरवपुष्मत्त्वरूपेण, उभयवर्त्तिनः उपमेयोपमानस्थितस्य, भेदस्य उपमेयोत्कर्षस्य उपमानापकर्षस्य चेत्यर्थः, प्रतीतिविषयप्राप्तेः प्रतीतत्वात् इत्यर्थः, अयम् एकव्यतिरेकः॥१८१॥

## प्रभा

व्यतिरेकसामान्यलक्षणमभिधाय तत्प्रभेदान् दर्शयति। तत्रादौ एकव्यतिरेकमाह–**धैर्येति।** धैर्यं धृतिः अचाञ्चल्यं च। लावण्यं सौन्दर्यं लवणमयत्वं च। गाम्भीर्यम् गूढाशयत्वं गभीरत्वं च। एते प्रमुखा येषु तैर्गुणैः सरसत्वादिभिः। उदन्वतः महोदधेस्त्वं तुल्योसि। भेदस्तु वैधर्म्यं तु। ते ईदृशेन अतिसुन्दरकरचरणवदनवता वपुषा शरीरेणैवास्ति।।१८१।।

## विवृति

तत्र शब्दोपात्तं सादृश्यमभिधाय व्यतिरेकमाह–

धैर्यलावण्यमाहात्म्यप्रमुखैर्गुणैस्त्वमुदन्वतः समुद्रस्य तुल्यः समोऽसीति तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्यामिति षष्ठी। उदन्वानुधाविविता उदक(?स्य)मतुपि उदन्वानिति भवति। इति धैर्यादिभिः शब्दैः समुद्रेण समतामाप(ा)द्य भेदस्तु वपुषैवदृशेन सुमद्रात्तवेति भेदकथनात् व्यतिरेकः।।१८१।।

---

**उभयव्यतिरेकोऽयमुभयोर्भेदकौ गुणौ।**
**कार्ष्ण्यं पिशङ्गता चोभौ यत् पृथग् दर्शिताविह॥१८२॥**

## रत्नश्री

यत् यस्मात्कार्ष्ण्यं श्यामत्वं पिश[ङ्ग]ता गौरत्वं चेत्येतौ गुणौ धर्मौ उभयोरम्बुराशिपुरुषयोरसाधारणत्वेन भेदकौ विसदृशत्वकरौ पृथग् दर्शितौ शब्देनोपात्तौ इह प्रयोगे, तस्मादयमुभयव्यतिरेकः प्रतिपत्तव्य इति॥

## हृदयङ्गमा

(अत्र गुणैस्तुल्योऽसि इत्यनेन सादृश्यप्रत्यायनात् शब्दोपात्तसादृश्यस्यायं भेदः बोध्यव्यः, तत्र च एकमात्रोपमेयगतातिमनोहरवपुष्मत्वरूपधर्मेण उपमेयोपमानयोः भेदः प्रदर्शित इति एकव्यतिरेकसंज्ञक इत्यवधेयम्। तथा मनोहरवपुष्मत्वमेव उपमेयगतोत्कर्षस्य निमित्तं तच्च प्रयुक्तमेव, इति नवीनोक्ते उक्तहेतौ उदाहरणमिदं भवितुमर्हति इति दिक्)॥१८२॥

## प्रभा

**इत्येकेति।** एकत्र उपमेये एव वर्तिना स्थितेन धर्मेण सुन्दरवपुष्मत्त्वरूपेण। उभयवर्तिनः उपमानोपमेयवर्तिनः। प्रतियोग्यनुयोगित्वेनेति भावः। भेदस्य वैधर्म्यस्य प्रतीतिविषयप्राप्तेः प्रतीयमानत्वाद् हेतोरयं एकव्यतिरेकः। एकमात्रगतधर्मस्य द्वयोर्वैधर्म्यबोधकत्वादिति भावः। अत्र विरुद्धधर्मोपादानेन भेदप्रतीतिः॥१८२॥

## विवृति

इत्येकव्यतिरेकोऽयमिति। अनन्तरोक्त एकव्यतिरेकोऽयम्। कुतोऽयमेकव्यतिरेकमि (कं इ)त्याह प्रतीतिविषयप्राप्तेः। कस्य। भेदस्य विशेषस्य। किंविशिष्टस्येत्याह–उभयवर्तिनः उभयत्र समुद्रपुरुषयोर्वर्तत इति उभयवर्ती तस्य। समुद्रस्य भवतश्च वपुरेव भिन्नमन्थाभूतं नान्यदित्येकेन वपुषा व्यतिरिच्यते मा (च्यमा) नत्वादेकव्यतिरेक उच्यते।।

एकव्यतिरेकं दर्शयति–धैर्येति। एकव्यतिरेकं व्याचष्टे–इतीति।।

उदाहरति–धैर्येति। प्रतीतिविषयप्राप्तेः प्रतीतेः विषयतया प्राप्तेः ज्ञातत्वात् इत्यर्थः। एकत्र पुरुषे वर्तिना वपुराख्येन धर्मेण व्यतिरेकतया स्वीकृतेन उभयवर्तिनो भेदस्य प्रतीतिप्राप्तेर्हेतोः एकव्यतिरेकोऽयम्।।१८२।।

---

**त्वं समुद्रश्च दुर्वारौ महासत्त्वौ सतेजसौ।**
**इयता युवयोर्भेदः स जलात्मा पटुर्भवान्॥१८३॥**

---

## रत्नश्री

त्वं भवान् समुद्रश्च युवां दुर्वारौ। दुष्करं वाः पानीयं यस्य समुद्रस्य, पुरुषस्तु दुर्वारोऽव्याहतप्रसरः। शब्दश्लेषः। महासत्त्वौ महान्तः सत्त्वाः मकरादयः। महान्ति वा सत्वानि यत्र समुद्रे। महत्सत्वं वीर्यम् यस्य पुंसः। शब्दश्लेषः। सतेजसौ सह तेजसा वह्निना वाड़वेन वर्तते समुद्रः। पुरुषस्तु सह तेजसा अनुभावेन वर्तते। अत्रापि शब्दः श्लिष्यते। साम्यमेतत् भिन्दन्नाह। इयता एतावन्मात्रेण युवयोः समुद्रस्य तव च भेदो वैलक्षण्यं लक्ष्यते। समुद्रो जलात्मा जलमुदकमात्मा यस्य जडश्चाचिद्रूप आत्मा यस्येति शब्दच्छलम्। भवान् पटुः कुशलः प्राप्त इति॥

तद्विभजते–

## हृदयङ्गमा

उभयव्यतिरेकमुदाहरति, अभिन्नेत्यादि।–अम्बुराशिः भवान् अपि उभौ, अभिन्नवेलौ अनतिक्रान्तमर्य्यादौ, तथा गम्भीरौ दुरवगाहस्वभावः अगाधश्च इत्यर्थः। किन्तु असौ अम्बुराशिः, अञ्जनसङ्काशः कृष्णवर्णः, सामुद्रिकजलस्य कृष्णात्वादिति भावः, त्वन्तु चामीकरद्युतिः काञ्चनवर्णः, अतिसुन्दर इत्यर्थः॥१८३॥

## प्रभा

उभयव्यतिरेकमाह–**अभिन्नेति**। अम्बुराशिः भवांश्च उभावपि अभिन्नवेलौ अपरित्यक्तमर्यादौ गम्भीरौ च। किंतु असौ अम्बुराशिः अञ्जनसंकाशः कज्जलवन्मलिनाकारो नीलजलत्वादिति भावः। त्वं तु चामीकरद्युतिः सुवर्णप्रभोसि।।१८३।।

---

**स एष श्लेषरूपत्वात् सश्लेष इति गृह्यताम्।**
**साक्षेपश्च सहेतुश्च दर्श्यते तदपि द्वयम्॥१८४॥**

## रत्नश्री

स एष ईदृशो व्यतिरेकः सह श्लेषेण वर्तते सश्लेष इत्येवं गृह्यतां व्यवह्रियताम्। कुतः श्लेषो यथोक्तरूपः स्वभावो यस्य तस्य भावः तस्मात्। सहाक्षेपेण सह च हेतुना तिष्ठतीति साक्षेपश्च सहेतुश्चेति द्वावपरौ व्यतिरेको विद्येते। तदप्येतद् द्वयं न केवलमन्यत्। दर्श्यते उदाह्रियते॥

## हृदयङ्गमा

इह उभयोः उपमानोपमेययोः, कार्ष्ण्य, पिशङ्गता च, इमौ उभौ, भेदकौ भेदसाधने, गुणौ, यत् पृथक् दर्शितौ, अतः अयम् उभयव्यतिरेकः, उभयनिष्ठत्वादनयोर्भेदकयोरिति भावः। (अत्रापि पूर्व्ववत् अभिन्नवेलत्वादिना शब्देन सादृश्यप्रत्यायनात् शब्दोपात्तसादृश्यत्वमूहनीयम्। तथा उपमेयगतोत्कर्षनिमित्तस्य काञ्चनवर्णस्य, उपमानगतापकर्षनिमित्तस्य च कृष्णवर्णस्य उक्तत्वान्नवीनोक्तव्यतिरेकभेदश्च)॥१८४॥

## प्रभा

**उभयेति।** अयं उभयव्यतिरेकः। यत् यत उभयोः उपमानोपमेयभूतयोः समुद्रनृपयोः भेदकौ भेदसाधनभूतौ गुणौ कार्ष्ण्यपिशङ्गतारूपौ पृथग् दर्शितौ स्तः। अत्रापि विरुद्धधर्मोपादानेन भेदप्रतीतिः॥१८४॥

## विवृति

अभिन्नवेलावभिन्नमर्यादौ (अम्बु)राशिः समुद्रो भवानपीत्युभयोः सादृश्यमभिन्नवेलादिना। वाय(द्वयोः)व्यतिरेचकं धर्ममाह–असावञ्जनसङ्काशः समुद्रः कृष्णवर्णः त्वं तु त्वं पुनश्चामीकरच्छविः उत्तप्तकनकसमद्युतिरित्युभयव्यतिरेकोऽयं उभयोः समुद्रपुरुषयोर्भेदकौ विशेषकारिणौ गुणौ धर्मौ कार्ष्ण्यं कृष्णता पिशङ्गता गौरता च यद्यस्मात् पृथक् दर्शितौ यस्माद्भिन्नावुक्ताविह।।

उभयव्यतिरेकं दर्शयति–अभिन्नेति। उभयव्यतिरेकं व्याचष्टे–उभयेति ।।१८३–१८४।।

---

**स्थितिमानपि धीरोऽपि रत्नानामाकरोऽपि सन्।**
**तव कक्ष्यां न यात्येव मलिनो मकरालयः॥१८५॥**

## रत्नश्री

भवानिव स्थितिमान् मर्यादावानपि धीरोऽपि निर्विकारोऽपि रत्नानां मुक्ताप्रबालानाम् आकरो निलयोऽपि सन् तव कक्ष्यां समतां न यात्येव मकरालयः। समुद्रो मलिनः अशुद्धः। त्वं तु परिशुद्ध इति साक्षेपोऽयमीदृशो व्यतिरेकः प्रतिपत्तव्यः। न यातीति निषेधनादिति॥

## प्रभा

सश्लेषव्यतिरेकमुदाहरति–**त्वमिति**। त्वं समुद्रश्च। दुर्वारौ त्वमनभिभवनीयः स च अवार्यजलवेगः। त्वं महासत्त्वः महासामर्थ्यवान् स च महाजन्तुविशिष्टः। त्वं सतेजसः द्युतिमान् स च वाडवाग्निविशिष्टः। अयं तु युवयोर्मध्ये भेदः। सः समुद्रः जडात्मा मूर्खः डलयोरभेदात् जलस्वरूपः शीतलश्च। भवान् पटुः चतुरस्तीक्ष्णश्च॥१८५॥

**वहन्नपि महीं कृत्स्नां सशैलद्वीपसागराम्।**
**भर्तृभावाद्भुजङ्गानां शेषस्त्वत्तो निकृष्यते॥१८६॥**

## रत्नश्री

शैलैः समन्तकूटादिभिर्द्वीपैः। सिंहलप्रमुखैः सागरैर्दक्षिण-प्रभृतिभिः सह वर्तमानां कृत्स्नाम् अशेषां महीं त्वमिव वहन् विभ्रदिति श्लेषः। [शेषः] फणिपतिरनन्तः त्वत्तो निकृष्यते हीयते, भवानेव ततोऽतिरिच्यते। कुतः? भुजङ्गा नागा विटाश्चेति शब्दच्छलेन दोषोक्तिः। तेषां भर्तृभावात् स्वामित्वात् तस्य। त्वं तु साधूनां भर्ता इति सहेतुरयं व्यतिरेको भर्तृभावादिति हेतूपन्यासात्॥

शब्दोपात्ते प्रतीते व्रा सादृश्य [२.१७८] इत्युक्तं तत्र कतरोऽयं व्यतिरेक इत्याह—

## हृदयङ्गमा

सश्लेषव्यतिरेकमुदाहरति, त्वमित्यादि।—त्वं समुद्रश्च, दुर्वारौ दुर्धर्षः अवार्य्यवेगश्च, महासत्त्वौ सत्त्वगुणाधिकः प्रबलजलजन्तुश्च, सतेजसौ महाप्रतापः सबाड़वानलश्च इत्यर्थः, अयन्तु, युवयोः भेदः, स समुद्रः, जड़ात्मा जलमयस्वरूपः, अन्यत्र शीतलस्वभावः, भवांस्तु, पटुः सुनिपुणः, अन्यत्र अतिवेगवान्। श्लेषरूपत्वात् जड़ात्मेति पटुरिति भेदकधर्मयोः श्लिष्टत्वात् इत्यर्थः, स एषः, सश्लेषव्यतिरेक इति गृह्यतां स्वीक्रियतां, पण्डितैरिति शेषः। (न च अत्र दुर्व्वारावित्यादिसाधारणविशेषणानां श्लिष्टत्वे सश्लेषव्यतिरेक इति वाच्यं, तथात्वे सर्व्वत्रैव

सश्लेषव्यतिरेकत्वप्रसङ्गः सम्भवति, सादृश्यनिर्वाहकविशेषणानां शब्दार्थान्यतरश्लेषापेक्षित्वात्, अतो भेदकविशेषणस्य श्लिष्टत्वे अयमलङ्कार इति सुधीभिर्भाव्यम्)। पुनश्च अस्य श्लेषस्य भेदद्वयं दर्शयति साक्षेप इति।–साक्षेपः आक्षेपेण साम्यनिषेधेन, सह वर्त्तमानः, निषेधश्चात्र विरुद्धान्यधर्मोपादानादिति बोध्यम्। सहेतुश्च हेतुना हेत्यर्थविहितविभक्त्यन्तपदेन सहितः। तत् द्वयमपि दर्श्यते निरूप्यते। उदाहरणे तु अनयोर्वक्ष्यमाणे इत्यभिप्रायः)।।१८५।।१८६।।

## प्रभा

**स इति।** स एष उपरि दर्शितः व्यतिरेकः। श्लेषरूपत्वात् जडात्मा पटुरिति श्लिष्टपदेन वैधर्म्यदर्शनात् श्लेषस्वरूपत्वात् सश्लेषः एतत्संज्ञक इति गृह्यतां जानीहि। अभ्यस्यमानं छात्रं प्रति उक्तिरियम्। न चात्र साधारणधर्मवाचकदुर्वारादिपदानामपि श्लिष्टत्वात् तेनास्य सश्लेषता वाच्या। तैर्विशेषणैः सादृश्यबोधाद् वैधर्म्यावबोधे तेषामसंबन्धात्। वैधर्म्यचमत्कृतिप्रधाने व्यतिरेके वैधर्म्यबिशेषणे श्लिष्टे एव सश्लेषव्यतिरेकस्वीकारस्य युक्तत्वात्। अपरं च साधर्म्योपपादकविशेषणश्लेषस्वीकारे सर्वत्र व्यतिरेके श्लेषत्वापत्तिर्दुर्वारा भवेत्। अत्र प्रस्तुताप्रस्तुतयोर्विशेषणद्वयस्य श्लिष्टत्वम्। क्वचिदेकतरनिष्ठविशेषणेपि अयं भवति। एवं श्लिष्टं सप्रपञ्चमुपपाद्य पुनर्भेदद्वयं दर्शयति–**साक्षेप इति।** आक्षेपः विरुद्धधर्मोपन्यासेन सादृश्यप्रतिषेधः। सहेतुः हेतुश्चात्र हेत्वर्थबोधकपञ्चम्यन्तपदरूपः। तेन हेतुभूतविशेषणैः प्रतिषेधः साध्यते चेत् तत्र सहेतुव्यतिरेकः।।१८६।।

## विवृति

त्वं समुद्रश्च दुर्वारो दुःखेन वार्यत इति दुर्वारः। तथा दुष्टं वाः उदकं क्षारं यस्य स दुर्वाः तौ दुर्वारोदः (रौ। दुः) पापार्थे वर्तते। महत् सत्त्वं यस्य सः महासत्त्वः तं (?) तथा महान्तः सत्त्वाः कम(कूर्मम) करमत्स्यादयो यत्र स महासत्त्वस्तौ। तथा सह तेजसा क्षात्रेण परैरनभिभवनीयेन वर्तत इति सतेज(ा)स्तवं समुद्रोऽपि महातेजाः महत्तेजो बडबामुखप्रभवं यत्र तौ सतेजसौ। इत्थं समुद्रस्य भवतश्च दुर्वारादिभिर्धर्मैः साम्यमापाद्य व्यतिरेकमापादयति इयता युवयोर्भेदः स समुद्रः जलात्म (त्मा जल) स्वभावः पटुर्भवान्। स एष सश्लेष इति गृह्यताम्। कुतः श्लेषरूपत्वात्। श्लिष्टमिष्टमनेकार्थमिति वचनात्। साक्षेपश्च सहेतुश्च सहाक्षेपेण वर्तत इति साक्षेपः तथा सह हेतुना वर्तत इति सहेतुश्च निर्दिश्यते तदपि त्व(द्व)यम्।।

सश्लेषव्यतिरेकं दर्शयति–त्वमिति। दुर्वारः दुर्धर्षः ; महासत्त्वः महाव्यवसायः? सतेजाः–परिभवासहत्वं तेजः उच्यते, तद्वान्–इति वर्णनीयपक्षे। दुर्वारः दुष्टजलप्रदः, दुष्टं वाः जलं राति इति, रा दाने इत्यस्मात् कप्रत्ययः ;महासत्त्वः ग्राहादिमान्; सतेजाः बाडबसहितः–इति समुद्रपक्षे। जलात्मा जलरूपः, जडस्वभावश्च। एषः उभयव्यतिरेकोऽपि सश्लेषः इति पूर्वस्मात् भेदः। पूर्वस्मात् अस्य भेदं व्याचष्टेस इति। व्यतिरेकान्तरे कथयति–**साक्षेपश्चेति।।**

त्वमिति। श्लेषरूपेण साम्यं श्लेषरूपेण भेदश्च कथितः इति सश्लेष एषः। दुर्वारौ–एकत्र परैः वारयितुं अशक्यः, अन्यत्र

कुत्सितसलिलसमूहः। महासत्त्वौ–सत्त्वं क्वचित् बलमन्यत्र तिमिङ्गिलादि। सतेजसौ–तेजः दर्पः, अन्यत्र बाडबः। जडात्मा–सलिलात्मा, अन्यत्र भ्रान्तिप्रकृतिश्च। **साक्षेपश्चेति**–साक्षेपव्यतिरेकश्च।, सहेतुव्यतिरेकश्च। आक्षेपः प्रतिषेधोक्तिः, हेतुः कारणम्; ताभ्यां सह वर्तमानौ साक्षेपसेहतुकौ प्रदर्श्येते।।१८५–१८६।।

---

**शब्दोपादानसादृश्यव्यतिरेकोऽयमीदृशः।**
**प्रतीयमानसादृश्योऽप्यस्ति सोऽनुविधीयते॥१८७॥**

## रत्नश्री

शब्देनोपादानं प्रत्यय उपादीयतेऽनेनेति शब्दोपादानं यस्य तत् सादृश्यं वस्तुद्वयस्य तुल्यत्वं यत्र व्यतिरेके स तथोक्तः। अयं प्रक्रान्तः। ईदृशः उक्तप्रकारः प्रतिपत्तव्यः। प्रतीयमानः शब्दोपादानमन्तरेण अर्थप्रकरणादेर्गम्यमानं सादृश्यं यत्र सोऽप्यस्ति व्यतिरेको न केवलं पूर्वः। स प्रतीयमानसादृश्योऽनुविधीयते॥

इदानीमुदाह्रियते–

## हृदयङ्गमा

साक्षेपव्यतिरेकमुदाहरति, स्थितिमानिति। –मकरालयः समुद्रः, यतः मलिनः, अतः स्थितिमान् अनुल्लङ्घितमर्य्यादः अपि, धीरोऽपि गभीरोऽपि, अन्यत्र दुरवगाहस्वभावोऽपि, तथा रत्नानाम् आकरः उत्पत्तिस्थानमपि, अन्यत्र गुणरत्नानाम् आधारोऽपि इत्यर्थः, तव कक्षां सादृश्यं, न यात्येव न प्राप्नोति एव। (अत्र उपमानगतेन मालिन्यरूपधर्मेण साम्यप्राप्तेराक्षेपात् साक्षेप-व्यतिरेकः)॥१८७॥

## प्रभा

साक्षेपमुदाहरति–**स्थितिमानिति।** मकरालयः समुद्रः। स्थितिमानपि अनुज्झितमर्यादोपि धीरोपि प्रशान्तोपि रत्नानां महार्घमणीनां सद्गुणरत्नानां च आकर उत्पत्तिस्थानमपि सन् मलिन

इति तव कक्षां साधर्म्यं न यात्येव। अत्रोपमानगतेन मालिन्यरूपधर्मेण नृपसादृश्याक्षेपः। तेन च नृपस्योत्कर्ष इति साक्षेपव्यतिरेकः। अत्राक्षेपो नञा वाच्यः।।१८७।।

## विवृति

तत्र साक्षेपमुदाहरति–

मकरालयो भवानिव स्थितिमत्वात् (दि?) गुणसम्पन्नः तव कक्ष्यां भवता साम्यं न यात्येवेति प्रतिषेधोक्तिराक्षेप इति साक्षेपः। प्रतिषेधश्च मलिनो मकरालयः त्वं पुनर्निर्मलः (इति)।।१८७।।

---

**त्वन्मुखं कमलं चेति द्वयोरप्यनयोर्भिदा।**
**कमलं जलसंरोहि त्वन्मुखं त्वदुपाश्रयम्॥१८८॥**

## रत्नश्री

तव मुखं कमलं चेति [द्वे समाने हृद्ये] वस्तुनी, कान्त्याद्युपचारात् प्रतीयमानसादृश्ये, अनयोर्द्वयोः भिदा भेदः कथ्यते। कमलं जले संरोहति जायते [इति] जलसंरोहि। तव मुखं त्वदुपाश्रयं त्वमुपाश्रयोऽधिकरणं यस्येति आश्रयभेदकथन-मनयोर्वैसादृश्यम्। कान्त्यादिना तु सदृश इति॥

## हृदयङ्गमा

सहेतुव्यतिरेकमाह, वहन्निति। –सशैलद्वीपसागरां, कृत्स्नां समग्रां, महीं वहन्नपि, शेषः अनन्तः, भुजङ्गानां पन्नगानाम्, अथच विटानां, ("भुजङ्गो विटसर्पयोः" इति कोषः) भर्त्तृभावात् स्वामित्वात्, त्वत्तः निकृष्यते निकृष्टो भवति। (अत्र भुजङ्गपतित्वरूपधर्मस्य त्वदपेक्षया उपमानभूतानन्तापकर्षे भर्त्तृभावादिति पञ्चम्यन्तपदेन हेतुत्वकीर्त्तनात् सहेतुव्यतिरेकः)॥१८८॥

## प्रभा

सहेतुव्यतिरेकमुदाहरति–**वहन्निति**। सशैलद्वीपसागरां कृत्स्नां महीं वहन्नपि धारयन्नपि। भुजङ्गानां सर्पाणां जाराणां च भर्तृभावात् स्वामित्वात् हेतोः। शेषः अनन्तः। त्वत्तः त्वया निकृष्यते निकृष्टीक्रियते। अत्र भुजङ्गपतित्वरूपधर्मस्य उपमेयापेक्षया उपमानस्यापकर्षहेतुत्वाद् अयं सहेतुव्यतिरेकः॥१८८॥

## विवृति

साक्षेपो व्यतिरेको व्याख्यातः। सहेतुरुच्यते-

महीमेवं वि(महीं भूमिं)शेषो नागराजो वहन् दधानोऽपि त्वत्तो निकृष्यते। कस्मात्। भुजङ्गानामुरगाणां भर्तृभावात्। बिभर्तीति भर्ता भर्तुर्भावो भर्तृभावः तस्मात् भर्तृभावात् भुजङ्गाधिपतित्वादिति हेतुः। तं (त्वं)पुनर्भुजङ्गानां न भर्तासि किं तु आर्याणाम्।।

तत्र साक्षेपव्यतिरेकं दर्शयति-**स्थितिमानपीति।** सहेतुव्यतिरेकं दर्शयति-**वहन्नपीति।।**

**स्थितिमानपीति**-मलिनः समुद्रः त्वत्समो न भवतीति अयमाक्षेपसहितो व्यतिरेकः। वहन्निति-भुजङ्गः सर्पो धूर्तश्च; भुजङ्गानां भर्तृभावात् निकृष्यते शेष इति सहेतुरयं व्यतिरेकः।।१८८।।

---

**अभ्रूविलासमस्पृष्टमदरागं मृगेक्षणम्।**
**इदं तु नयनद्वन्द्वं तव तद्गुणभूषितम्॥१८९॥**

## रत्नश्री

मृगस्येवेक्षणं भ्रुवोर्विलासो नर्तनं विद्यतेऽस्मिन्निति भ्रूविलासमस्पृष्टोऽस्वीकृतो मदस्य मदकरो रागोऽनेनेति। अस्पृष्टमदरागमिदं प्रत्यक्षम्। तुशब्दो भेदं द्योतयति। तव नयनयोर्द्वन्द्वं युगलं ताभ्यां भ्रूविलासमद[62b]रागाभ्यां भूषितमलंकृतं मृगेक्षणनयनद्वन्द्वयोश्च लोहितादिसादृश्यं प्रतीयत इति॥

पूर्वस्य व्यतिरेकस्यास्य च को विशेष इत्याह–

## हृदयङ्गमा

इत्थं शब्दोपात्तसादृश्यव्यतिरेकमुक्तवा प्रतीयमानसादृश्यं निरूपयति, शब्दोपादानेति। –शब्दस्य साधारणधर्मवाचकस्य, उपादानेन, यत् सादृश्यं तस्य व्यतिरेकः, अयं दर्शितरूपः, ईदृशः पूर्वोक्तप्रकारः। प्रतीयमानं धर्म्मवाचकपदोपादानमन्तरेणापिं प्रतीतिगम्यं, सादृश्यं यत्र तादृशोऽपि, प्रसिद्धयोरुपमानोपमेययोः भेदप्रकटनरूपः अपि, व्यतिरेकोऽस्ति, अधुना सः अभिधीयते प्रदर्श्यते॥१८९॥

## प्रभा

एवं शब्दोपात्तसादृश्यव्यतिरेकमुपपाद्य प्रतीयमानसादृश्य-व्यतिरेकं प्रतिपिपादयिषुराह–**शब्देति**। अयं ईदृश एतावत्पर्यन्तं विवेचितः। शब्दोपादानसादृश्यव्यतिरेकोस्ति। शब्दस्य

साधारणधर्मवाचकस्य उपादानं यस्मिन् एतादृशं यत् सादृश्यं तत्पूर्वकः व्यतिरेकः उपमेयगुणातिशयवर्णनं तत्स्वरूपोस्ति। अत्र केचित् शब्दोपादानेन यत्सादृश्यं तत्पूर्वको व्यतिरेक इति समासं दर्शयन्ति। परं प्रतीयमानसादृश्येत्युत्तरपदसमासैक्यसंपादनाय प्रथमार्थ एव ज्यायान्। प्रतीयमानं सादृश्यं यत्र तादृशो व्यतिरेकोस्ति। सोऽपि अभिधीयते मया निवेद्यते।।१८९।।

## विवृति

इति शब्दोपादानसादृश्यव्यतिरेकोऽयमीदृशोऽनन्तरो व्याख्यातः। इदानीं प्रतीयमानसादृश्योऽप्यस्ति व्यतिरेकः सोऽनुविधीयते।।

एवं शब्दोपात्तसादृश्यव्यतिरेको . दर्शितः। प्रतीयमानसादृश्यं दर्शयाम्- इत्याह–**शब्देति।।**

**शब्देति।** अत्र पूर्वार्धेन उक्ता व्यतिरेका शब्दोपात्तसादृश्ये भवन्ति इत्याह; उत्तरार्धेन प्रतीयमानसादृश्येऽपि सन्तः प्रदर्श्यन्त इत्याह।।१८९।।

---

**पूर्वस्मिन् भेदमात्रोक्तिरस्मिन्नाधिक्यदर्शनम्।**
**सदृशव्यतिरेकश्च पुनरन्यः प्रदर्श्यते॥१९०॥**

## रत्नश्री

पूर्वस्मिन् त्वन्मुखं कमलं चेत्यादौ भेदो विसदृशत्वमात्रमेव। अतिशयप्रकाशशून्यत्वात्। तस्योक्तिः कथनं कमलं जलसंरोहि त्वन्मुखं त्वदुपाश्रयमिति। अस्मिन् प्रयोगे पुनराधिक्यस्यातिशयस्य दर्शनं प्रतिपादनं प्रतिपत्तिर्वा न पूर्ववद् भेदमात्रोक्तिः। भ्रूविलासादिलक्षणो गुणो नयनद्वन्द्वस्यास्ति न मृगेक्षणस्येति आधिक्यदर्शनम्। तस्मादनयोः प्रयोगयोः प्रतीयमानसादृश्य-योर्व्यतिरेके समानेऽपि अयं विशेषः सादृश्ये वस्तुद्वयस्य साम्ये शब्दोपात्ते सति व्यतिरेकः सदृशपक्षपाती। चकारः किञ्चिदित्यर्थे। पुनरन्यः केवलं पूर्वोक्तः। शब्दोपात्तसादृश्योऽयं चापरो विशिष्टः प्रदर्श्यत इति॥

## हृदयङ्गमा

त्वन्मुखमिति।–तव मुखं कमलञ्च, अनयोर्द्वयोः इति भिदा भेदः, कमलं पद्मं, जलसंरोहि जलजं, त्वन्मुखन्तु तव वदनन्तु, त्वदुपाश्रयं त्वदेकाधारम्। (अत्र साधर्म्यस्य अप्रयोगेऽपि मुखकमलयोः साम्यं प्रसिद्धिवशात् प्रतीयते इति प्रतीयमानव्यतिरेकः)॥१९०॥

## प्रभा

प्रतीयमानसादृश्यव्यतिरेकमुदाहरति–**त्वन्मुखमिति**। त्वन्मुखं कमलं च द्वयोरपि अनयोर्भिदा एवं भेदः। तं भेदमेव

दर्शयति—**कमलमिति।** कमलं जलसंरोहि जलजमित्यर्थः। त्वन्मुखं त्वदुपाश्रयं त्वमेव उपाश्रय आधारो यस्य तत्। अत्र विभिन्नाश्रयत्वेन कविप्रसिद्धं कमलमुखसादृश्यं प्रतिषिध्यते। समानधर्मस्यात्राकथनात् प्रतीयमानसादृश्यत्वं बोध्यम्।।१९०।।

## विवृति

त्वन्मुखं कमलं चेति द्वयोरप्यनयोर्भिदा भेदः। अत्राननारविन्दयोर्न शब्दोपात्तं सादृश्यम्। किं तु प्रतीयमानं कान्तत्वमिति प्रतीति(ते) सादृश्ये वस्तुनोर्द्वयोर्यद्भेदकथनं स (व्यतिरेकः)। व्यतिरेचकं धर्ममाह—कमलं जलसंरोहि जले संरोहति। न मुखं त (त्व) दीयं; किं तु त्वद(मु)पाश्रयो यस्य तत् त्वत्पदा (दुपा)श्रयं त्वदाधारम्।।

**त्वदिति।** अत्र फुल्लं सुरभिगन्धि चेति सदृशधर्मौ प्रतीयते।।१९०।।

त्वन्मुखं पुण्डरीकं च फुल्ले सुरभिगन्धिनी।
भ्रमद्भ्रमरमम्भोजं लोलदृष्टि मुखं तु ते॥१९१॥

---

## रत्नश्री

तव मुखं पुण्डरीकं पद्मं च द्वे इमे वस्तुनी फुल्ले प्रबुद्धे सुरभिरिष्टो गन्धोऽनयोरिति सुरभिगन्धिनी। समासान्त इकारः। शब्दोपात्तमीदृशं सादृश्यं तत्पदप्रयोगात्। अत एव प्रतीतसादृश्ये व्यतिरेकाधिकारेऽस्मिन् कथमकस्मादयमुत्तीर्णः शब्दोपात्तसादृश्यो व्यतिरेकः पतित इति शङ्कापरिहारार्थं पुनः प्रस्तावं कर्तुं सादृश्यव्यतिरेकश्च पुनरन्यः प्रदश्र्यत इति उक्तं विवरिष्यति। इमं व्यतिरेकं पूर्वत्रेत्यादिना भिनत्ति। भ्रमन्तौ भ्रमरौ यस्मिन् अम्भोजे तत्तथा लोले चञ्चले दृष्टी चक्षुषी यत्र तादृशं मुखं ते तव। तुशब्दो भेदं द्योतयति इति॥

## हृदयङ्गमा

अभ्रूविलासेति।–मृगस्य ईक्षणं नयनम्, अभ्रूविलास भ्रूविलासरहितं, तथा अस्पृष्टः मदरागो येन तादृशम् अप्राप्तमद्यपानजनितलौहित्यमित्यर्थः, तव इदं नयनद्वयन्तु, तद्गुणभूषितं भ्रूविलासयुक्तं, स्पृष्टमदरागञ्च इत्यर्थः। (अत्र उपमानमृगेक्षणोपमेयनयनद्वयानां विरुद्धधर्मवत्त्वमेव दर्शितं सादृश्यं तु शब्देनाप्रतिपाद्यमपि प्रसिद्धतया प्रतीयते इति प्रतीयमानव्यतिरेकः)॥१९१॥

## प्रभा

विरुद्धधर्मेण प्रतीयमानसादृश्यव्यतिरेकं दर्शयति— **अभ्रूविलासमिति।** मृगेक्षणं हरिणनयनम्। अभ्रूविलासं भ्रूकुटिनर्तनलीलाशून्यम्। तथा अस्पष्टमदरागं मदिरासेवनोद्भूत-लौहित्यवर्जितम्। इदं तु तव नयनद्वन्दं तौ गुणौ भ्रूविलासमदरागरूपौ ताभ्यां भूषितम्। अत्रापि उपमेयगतगुणविशेषेण कविप्रसिद्धं मृगनयनसादृश्यं निषिध्यते।।१९१।।

## विवृति

अविद्यमानो भ्रूविलासो यस्य तद्भ्रू(दभ्रू)विलासं अस्पृष्टो मदरागो येन तदस्पृष्टमदरागं मृगेक्षणम्। इदं तु नयनद्वन्द्वं तव तद्गुणभूषितं भ्रूविलासमदरागभूषितमिति व्यतिरेकः।।

**अभ्रूविलासमिति।** अप्रस्तुतमृगेक्षणे वर्णनीयनयने च दीर्घत्वं विशालत्वं चेति सदृशधर्मौ प्रतीयमानौ।।१९१।।

---

**चन्द्रोऽयमम्बरोत्तंसो हंसोऽयं तोयभूषणः।**
**नभो नक्षत्रमालीदमिदमुत्कुमुदं पयः॥१९२॥**

## रत्नश्री

अयं दृश्यमानश्चन्द्रोऽम्बरस्य नभस उत्तंसः शेखरः तत्सदृशत्वात्। अयमध्यक्षो हंसस्तोयस्य भूषणो भूषयतीति नन्दिग्रहीत्यादिनाल्युः। भूषणं वा अलङ्कारवस्तु करणे ल्युट्। नभ इदमन्तरीक्षं नक्षत्रमालि तारकाधारि। मलमल्लधारणे। नक्षत्राणां वा माला वृन्दं विद्यते अस्मिन्निति मत्वर्थोयः। इदमपरोक्षं पयः सरः उद्गतानि कुमुदानि अस्मिन्नित्युत्कुमुदमिति॥

अयं च प्रतीतसादृश्यो व्यतिरेको न पुनर्वचनोपात्तसादृश्य इति दर्शयन्नाह–

## हृदयङ्गमा

उक्तोदाहरणयोः फलं दर्शयति, पूर्वस्मिन्निति। –पूर्वस्मिन् उदाहरणे, त्वन्मुखमित्यत्र, भेदमात्रस्य उपमानोपमेययोर्भेदक-धर्ममात्रस्य उक्तिः, न तु साधारणधर्मबोधकविशेषणपदादिना सादृश्योक्तिरित्यर्थः। एतेन च प्रस्तुतस्योत्कर्षकथनमपि नैव भवति तस्य तु व्यङ्गत्वमेवेति भावः। (भेदश्च द्विधा सम्भवति विरुद्धधर्माध्यासः कारणभेदश्च, उक्तञ्च "अयमेव हि भेदो भेदहेतुर्वा यद्विरुद्धधर्माध्यासः कारणभेदश्च।" इति, अत्र तु कारणभेद एवेति बोध्यम्)। अस्मिन् अव्यवहिते उदाहरणे, अभ्रूविलासमित्यत्र, आधिक्यस्य उपमानोपमेय-योर्निकर्षोत्कर्षख्यापनेन उपमेयोत्कर्षमात्रस्य, दर्शनम् प्रतिपादनम्।

अत्र तु विरुद्धधर्माध्यास एव भेदकारणमित्यवधेयम्। अन्यश्च, सदृशव्यतिरेकः सदृशेन सादृश्यप्रयोगेन, व्यतिरेकः भेदः यत्र तथाविधः प्रदर्श्यते उदाह्रियते।।१९२।।

## प्रभा

उदाहरणद्वयप्रयोजनं दर्शयति–**पूर्वस्मिन्निति।** पूर्वस्मिन् त्वन्मुखमित्युदाहरणे भेदमात्रोक्तिः केवलं भेदस्य कथनम् न तु उपमेयोत्कर्षस्योक्तिः। तत्र त्वदुपाश्रयमित्यनेनोत्कर्षो व्यङ्ग्यः। तथा च तत्र भेदः कारणभेदाद्विज्ञेयः। ननु जलसंरोहि इत्यनेन जडसंरोहि इति प्रतीते कमलस्य जडोपादानत्वम्। अजडोपादानत्वं च मुखस्य। अत उत्कर्षः शाब्द एव इति चेन्न। तथाविधश्लेषे तात्पर्याभावात्। अस्मिन् अव्यवहितोदाहरणे आधिक्यदर्शनं तद्गुणभूषितम् इत्यनेन गुणाधिक्यस्य कथनं न तु साधारणविशेषणमहिम्ना केवलसादृश्यप्रतीतिः। भेदश्च विरुद्धधर्मवत्त्वेन प्रतीयते न तु शब्देनाभिहितोस्ति। पूर्वोदाहरणे कारण भेदाद्भेदः, अस्मिन्नुदाहरणे विरुद्धधर्माध्यासेन स इति बोध्यम्।। एतावता विरुद्धधर्मोपादानेन नञादिना वा सादृश्यप्रतिषेधेन परिस्फुटो भेदव्यतिरेको दर्शितः। इदानीं सदृशभेदकेन भेदव्यतिरेकं दर्शयति–**सदृशेति।** सदृशव्यतिरेकः सदृशेन भेदकेन व्यतिरेकः भेदः सदृशव्यतिरेक इत्यर्थः।।१९२।।

## विवृति

स्वयमेतत् द्वयमपि विभागीकृत्य(?)पौनरुक्त्यं परिहरव्द्या(न्व्या)चष्टे–

पूर्वस्मिन् त्वन्मुखं कमलं चेति द्वयोरप्यनयोर्भिदेत्यत्र

भेदमात्रोक्तिर्मुखकमलयोर्भेदमात्रमुक्तम् 'कमलं जलसंशेहि त्वन्मुखं त्वदपाश्रयम्' इति। अनेन पुनराधिक्यं दर्शितम्। 'अभ्रूविलासमस्पृष्टमदरागं मृगेक्षणं' इत्युक्त्वा 'इदं तु नयनद्वन्द्वं तव तद्गुणभूषितमि' त्यनेन मृगेक्षणा(त्) मुखस्य आधिक्यप्रदर्शनात् वैलक्षण्यम्।।

सदृशव्यतिरेकश्च सादृश्यं प्रदर्श्य द्वयोर्वस्तुनोस्ततो भेदकथनमिति सदृशयोर्व्यतिरेकः। स च पुनरन्यः पूर्वस्माद्भिन्नः प्रदर्श्यते।।

पूर्वस्मिन्निति। व्यतिरेकान्तरं लक्षयति–**सदृशेति।** सदृशयोः पदार्थयोः प्रदर्श्यमानो व्यतिरेकः, परस्परसादृश्याभ्यां (?) धर्माभ्यां इत्यर्थः।।

**पूर्वस्मिन्निति।** सदृशवस्तुकथनेन भेदः प्रतिपादित इति सदृशव्यतिरेकः। सदृशव्यतिरेको द्विधा भवति। शब्दोपात्तसादृश्ययोः शब्दोपात्तवस्तुकथनेन प्रतिपादितः, प्रतीयमानसादृश्ययोः प्रतीयमानसादृश्यवस्तुकथनेन प्रतिपादितश्च। सदृशव्यतिरेकस्य द्वैविध्यमेतत् प्रतीयमानेत्यादिना श्लोकेन पूर्वत्रेत्यादिना च प्रतिपादयिष्यति।।१९२।।

---

**प्रतीयमानसौक्ष्म्यादिसाम्ययोर्वियदम्भसोः।
कृतः प्रतीतशुद्ध्योश्च भेदोऽस्मिन् चन्द्रहंसयोः॥१९३॥**

---

## रत्नश्री

सौक्ष्म्यमच्छत्वमादिर्यस्य नीलत्वादेः। तेन तदेव वा साम्यं सादृश्यम् अशब्दोपात्तम् अम्बरादेर्वस्तुनः तदव्यभिचारादर्थात् प्रतीयमानं गम्यमानं ययोस्तयोर्वियच्चाम्भश्चेति। वियदम्भसोर्भेदो विशेषः कृतः। नक्षत्रमालि नभः पयः उत्कुमुदमिति साक्षात् प्रतिपादितः। प्रतीता न्यायलब्धा न वाचनिकी शुद्धिः शौक्ल्यं ययोस्तयोः। हंसश्च चन्द्रश्चेति तयोः हंसचन्द्रयोर्भेदः। कुतः? चन्द्रोऽयमम्बरोत्तंसः हंसोऽयं तोयभूषणः इति शब्दोपात्तः, न न्यायात् इति॥

नन्वयमपि सादृश्यव्यतिरेक एव, चन्द्रहंसयोर्नभः पयसोश्च शुद्ध्यादिना सदृशयोर्यथोक्तभेदकथनात्। तत्किं पूर्वक एव सादृश्यव्यतिरेक उच्यते इत्याशङ्क्याह–

## हृदयङ्गमा

अयमपि पूर्ववत् सादृश्यस्य शाब्दत्वेनार्थत्वेन च द्विविधस्तव सदृशव्यतिरेकं शाब्दमुदाहरति, त्वन्मुखमिति।–तव मुखं, पुण्डरीकं पद्मञ्च, फुल्ल, फुल्लत्वमेकत्र स्मितशोभित्वम् अन्यत्र विकसितत्वं, तथा सुरभिगन्धिनी, सुरभिगन्धित्वमुभयत्र समानम्, (अत्र फुल्लत्वसुरभिगन्धित्वरूपं धर्म्मद्वयं मुखपद्मयोः साधारणमिति सादृश्यस्य शब्दोपात्तत्वं बोध्यम्,) अम्भोजं, भ्रमन्तः

भ्रमरा यस्मिन् तत्, ते मुखन्तु लोले नेत्रे यस्मिन् तादृशम्। (अत्र भ्रमद्भ्रमरस्य पद्मधर्म्मतया लोलनेत्रत्वस्य च मुखधर्मतया धर्म्मद्वयस्योभयत्रासमानत्वेपि प्रणिधानेन सादृश्यमेव प्रतीयते, न तु विरुद्धत्वं, तेनापि मुखपद्मयोः भेदावगमात् प्रतीयमानसादृश्यव्यतिरेकादस्य भेदविधानं युज्यते एव। विरुद्धधर्मादिना भेदप्रदर्शने भेदस्य स्फुटत्वमिति तत्र प्रतीयमानसादृश्यव्यतिरेकादस्य भेदविधानं युज्यते एव। विरुद्धधर्मादिना भेदप्रदर्शने भेदस्य स्फुटत्वमिति तत्र प्रतीमानसादृश्यव्यतिरेकः। इह तु अस्फुटभेदत्वेऽपि वैचित्र्यमिति सदृशव्यतिरेक इति। सादृश्यस्य शब्दोपात्तत्वेनास्य शब्दोपात्तत्वम्। कथमेवंविधभेदवर्णने उपमेयमुखादेः उत्कर्ष इत्यपि न वाच्यं, पर्य्यालोचनया भ्रमरापेक्षया नेत्रस्योत्कर्षप्रतीत्या मुखस्याधिक्यात् इति लक्षणसङ्गतेः)॥१९३॥

## प्रभा

शब्दोपात्तसादृश्यं सदृशव्यतिरेकमुदाहरति–**त्वन्मुखमिति।** त्वन्मुखं पुण्डरीकं कमलं च। फुल्ले विकसिते। एकत्र स्मितलक्ष्म्या अन्यत्र दलविकासेन। तथा सुरभिर्घ्राणतर्पको गन्धः सुवासो ययोस्ते। फुल्लत्वसुरभिगन्धत्वयोः साधारण्यात् सादृश्यमत्र शब्दोपात्तम्। एवं सादृश्यं स्थिरीकृत्य सदृशभेदकेन व्यतिरेकं दर्शयति–**भ्रमद्भ्रमरेति।** अम्भोजम् भ्रमद्भ्रमरं भ्रमन्तो भ्रमरा यस्मिन् तत् ते मुखं तु लोलनेत्रं लोले विलासचञ्चले नेत्रे यस्मिन् तत्। अत्र भ्रमरनेत्रे भेदके। ते च भ्रमणचाञ्चल्यरूपधर्मेण समाने। इति सदृशाभ्यां ताभ्यां भेदः सदृशव्यतिरेकः॥१९३॥

## विवृति

त्वन्मुखं पुण्डरीकं च अप्येते (उभे एते)फुल्ले विकसिते तथा सुरभिगन्धिनी (इति) मुखकमलयोः फुल्लत्वादिना सादृश्यम्।

व्यतिरेकमाह–

सुगमम्।।

**त्वदिति।** अत्र फुल्ले सुरभिगन्धिनी इति अभिधीयमानसादृश्ययोः मुखपुण्डरीकयोः भ्रमदिति लोलेति च अभिधीयमानसादृश्याभ्यां भ्रमरदृष्टिभ्यां व्यतिरेकः ; इति अभिधीयमानसादृश्यव्यतिरेकः।।

अनयोरुदाहरणमाह–**त्वदिति।** सुरभिगन्धित्वविकसितत्वे समानधर्मौ मुखसरसिजयोरुक्तौ। पुनः तयोरेव लोलेन लोचनेन भ्रमता च भ्रमरेण परस्परसदृशेन भेद उक्तः। इति अभिधीयमानसादृश्यः सदृशव्यतिरेकः।।१९३।।

---

**पूर्वत्र शब्दवत्साम्यमुभयत्रापि भेदकम्।**
**भृङ्गनेत्रादितुल्यं तत् सदृशव्यतिरेकता॥१९४॥**

## रत्नश्री

पूर्वत्र त्वन्मुखं पुण्डरीकं चेत्यादौ, उभयत्रापि मुखे पुण्डरीके च सादृश्यं शब्दवत्। शब्दो वाचकोऽस्मिन् इति शब्दोपात्तमिति यावत्। चन्द्रोऽयमित्यादौ तु प्रतीतं न वचनलब्धम्। भृङ्गश्च नेत्रं च तदादिर्यस्य तल्लोलत्वस्य तत्तुल्यं सदृशं सत् भेदकं मुखपुण्डरीकयोरसाम्यनिमित्तमुक्तम्, तत्तस्मात् सदृशव्यतिरेकता-पूर्वक एव तन्मुखमित्यादिः सादृश्यव्यतिरेक उच्यते, नानन्तरश्चन्द्रोऽयमित्यादि। तत्र शब्दवत्सादृश्याभावात्। शब्दवता च सादृश्येन सदृशव्यतिरेकव्यवहारस्य कर्तुमिष्टत्वात्।

अथवा द्वयोरपि सदृशव्यतिरेकता व्याख्यायते। पूर्वत्रेत्यादि चन्द्रोऽयमित्यादौ प्रतीतं सादृश्यं न शब्दवत् यथा विवृतं पूर्वत्र। त्वन्मुखमित्यादौ च शब्दवत्। इयता भेदः। भेदकं भृङ्गनेत्रादि। नक्षत्रकुमुदाम्बरतोयपरिगृहीतिरादिशब्देन। तदेतदुभयत्रापि त्वन्मुखमित्यादौ चन्द्र इत्यादौ च तुल्यं सदृशं वर्तते। तस्मात् सदृशव्यतिरेकता उभयत्रापीत्यपेक्ष्यते। उदाहरणद्वयमपीदं सदृशव्यतिरेकः। सदृशपदार्थकृतो व्यतिरेकः सदृशव्यतिरेक इति कृत्वा। एतदर्थं च सदृशव्यतिरेकश्च पुनरन्यः प्रदर्श्यते इति [२. १९०] पादान्तरं द्रष्टव्यम्॥

## हृदयङ्गमा

सदृशव्यतिरेकमार्थमुदाहरति, चन्द्र इति।—अयम् अम्बरोत्तंसः

आकाशभूषणं, चन्द्रः, अयं हंसः, तोयस्य भूषणम्, इदं नभः आकाशं, नक्षत्रमालि ताराविराजितं, पयश्च उत्फुल्लानि कुमुदानि यस्मिन् तादृशम्। ''नभो नक्षत्रमालीदमिदमुत्कुमुदं पयः'' इति च पाठः क्वचित् दृश्यते। (अत्र चन्द्रहंसयोरुपमानोपमेययोः शुक्लतादिसाधारणधर्म्मस्याप्रयोगादप्यर्थतस्तत्प्रतीत्या प्रतीयमान-सादृश्य एवायं व्यतिरेकः, तत्रापि आकाशपयसोः नक्षत्रराजियुक्तत्वफुल्लकुमुदवत्त्वरूपधर्म्मद्वयं पूर्ववत् असाधारण-मपि सदृशमिति प्रतीतेः ततश्च भेदावगमात् सदृशव्यतिरेक इति विभाव्यम्)।।१९४।।

## प्रभा

शब्दानुपात्तसादृश्यं सदृशव्यतिरेकमुदाहरणद्वयेन उदाहरति– **चन्द्र इति।** अयं चन्द्रः अम्बरोत्तंसो वियद्भूषणम्। हंसस्तोयभूषणम् जलशोभासंपादकः। अथैव इदं नभः नक्षत्रमालि तारामालाविभूषितम्। इदं पयः उत्फुल्लकुमुदं विकसितारविन्दम्। अत्र चन्द्रहंसयोः सादृश्यं श्वेतत्वादि अनुभूततया स्फुटं प्रतीतं भवति। वियदम्भसोश्च शौक्ल्यादि वर्णनानुरोधेन यथाकथंचित्त् प्रतीयते। एवमुभयत्र शब्दानुपात्तस्य सादृश्यस्य अम्बरतोयाभ्यां नक्षत्रकुमुदाभ्यां च भेदो दर्शितः। तौ च परस्परतुल्यौ इति सदृशव्यतिरेकिता।।१९४।।

## विवृति

चन्द्रोयमम्बरस्योत्तंस इवोत्तंसः। शिरोमण्डनकुसुममुत्तंस उच्यते। हंसोऽयं तोयस्य भूषणं आभरणम्। नभो नक्षत्रमालास्व(स्या)

स्तीति नक्षत्रमाली(लि)प्रीत्या(व्रीह्या) दिषु पाठादिनिः। इदमुत्कुमुदं उद्गतकुमुदं पयः।।

प्रतीयमानसादृश्यं व्यतिरेकं दर्शयति–**चन्द्र इति।**

**चन्द्र इति।** प्रतीयमानसाम्यौ चन्द्रहंसौ भेदकौ इति सदृशव्यतिरेकः द्वितीयः। नभो नक्षत्रमालीति सदृशव्यतिरेकस्य प्रतीयमानसादृश्याश्रितस्य द्वितीयम् उदाहरणम्। अत्र उदाहरणद्वयं प्रदर्शयतः ईदृशम् अन्यदपि ऊह्यम् इत्यभिप्रायः।।१९४।।

---

**अरत्नालोकसंहार्यमहार्यं सूर्यरश्मिभिः।**
**दृष्टिरोधकरं यूनां यौवनप्रभवं तमः॥१९५॥**

---

## रत्नश्री

यूनां तरुणानाम्। प्रभवत्यस्मादिति प्रभवः। यौवनं द्वितीयं वयः प्रभवः कारणं यस्य तत्तमोऽन्धकारं सदसद्विवेकविबन्धकत्वाद् अज्ञानम्। रत्नानां मणीनामालोकैः दीप्तिभिः संहार्यं भेद्यं न तथा अरत्नालोकसंहार्यम्। सूर्यस्य रश्मिभिरभीषुभिः अवार्यमनपनेयम्। दृष्टेः सदसद्दर्शनस्य रोधं विबन्धं करोति [इति] दृष्टिरोधकरं यूनां विषममिदं तम इति॥

तद् व्याचष्टे–

## हृदयङ्गमा

स्फुटभेदात् प्रतीयमानसादृश्यव्यतिरेकात् अस्फुटभेदसदृश-व्यतिरेकस्य भेदं दर्शयन् लक्षणं सङ्गमयति, प्रतीयमानेति।–अस्मिन् चन्द्रोऽयमित्यत्र उदाहरणे, प्रतीयमानं वाचकशब्दाप्रयोगात् आर्थं, शौक्लयादि शुक्लत्वसितपक्षशोभितत्वादिकं, तेन साम्यं ययोः तादृशयोः चन्द्रहंसयोः प्रतीता प्रसिद्धा, शुद्धिः गम्यमानसादृश्यबोधिका स्वच्छता इत्यर्थः, ययोस्तथाभूतयोः, वियदम्भसोः आकाशजलयोः, आश्रयतासम्बन्धेन चन्द्रधर्म्मस्य नभसः उपमेयभूतहंसधर्म्मस्य पयसश्च इत्यर्थः, भेदः कृतः दर्शितः। (अत्रेदमवधेयं,–यत् उपमानं चन्द्रः, उपमेयः हंसः, तयोः

साधारणधर्मः शुक्लता, तस्याश्च शब्देनानुपादानादपि प्रसिद्धतया प्रतीतिः वियदम्भोरूपविभिन्नधर्म्मत्वेन तयोः भेदश्च प्रदर्शितः इति प्रतीयमानसादृश्यलक्षणोऽयं व्यतिरेकः, तस्य सदृशव्यतिरेकाख्योभेदश्च। उपमानोपमेययोर्भेदबोधने परस्परविम्बानुविम्बत्वरूपयोर्भिन्नधर्म्मयोः सङ्घटनायां विरुद्धधर्म्मप्रयोगेण नञादिवाचकशब्देन वा यथा भेदस्य स्फुटत्वं प्रतीयते अत्र न तथेति सदृशव्यतिरेकत्वम्। तथा हि,–चन्द्राश्रयनभसः नक्षत्रमालित्वम्, हंसाश्रयभूतस्य पयसः फुल्लकुमुदत्वञ्च धर्म्मद्वयं भिन्नमपि न विरुद्धम्, परन्तु स्वच्छतासाधर्म्येण उभयोः गम्यसाम्यप्रतीत्यनन्तरं भेदः प्रतीयये एव, ततश्च उत्फुल्लकुमुदत्वेन नभोऽपेक्षया तोयस्योत्कर्षप्रतीतिपर्य्यालोचनया तदाश्रितस्य हंसस्यापि आधिक्यमेव प्रतीयत इति)।।१९५।।

## प्रभा

उक्तोदाहरणद्वयं विशदयति–**प्रतीयमानेति**। अस्मिन् पूर्वश्लोके। प्रतीयमानद् वाचकशब्दाभावात् वर्णनानुरोधेन यथाकथंचिद् उन्नीयमानं शौक्ल्यादि आदिशब्देन नैर्मल्यस्य संग्रहः। तेन साम्यं ययोस्तादृशयोः। वियदम्भसोः आकाशपयसोः। तथा प्रतीतशुद्ध्योः सदानुभूततयावगतशुद्ध्योश्चन्द्रहंसयोर्भेदः कृतः। प्रथमोदाहरणे अम्बरतोयाभ्यां द्वितीयोदाहरणे नक्षत्रकुमुदाभ्याम् सादृश्यनिषेधः। कृतः। इमे च भेदके अम्बरतोये नीलत्वादिना नक्षत्रकुमुदे च मनोहराकारत्वेन परस्परसदृशे इति सदृशव्यतिरेकः। पूर्वोदाहरणे वियदम्भेसाः शौक्ल्यादिसादृश्यं दुरूहतया प्रतीयमानम्

उत्तरोदाहरणे शुद्धिस्तु सर्वानुभवसिद्धा इति सा प्रतीता इत्यनयोर्भेदः। अत्र केचिदुपमानोपमेयभूतयोश्चन्द्रहंसयोः प्रतीतशुद्धिरूपसमानधर्मयोः प्रतीयमानसौक्ष्म्यरूपसमानधर्माभ्या वियदम्भोभ्याम् आधारतया चन्द्रहंसयोर्भेदः कृत इति एकमेवोदाहरणं मन्यन्ते। तन्मते सदृशयोर्व्यतिरेकः सदृशव्यतिरेक इति समासः॥१९५॥

---

**स्वजातिव्यतिरेकोऽयं तमोजातेरिदं तमः।**
**दृष्टिरोधितया तुल्यं भिन्नैर्धर्मैरदर्शि यत्॥१९६॥**

## रत्नश्री

यद् यस्मात् तमोजातेः प्रसिद्धाया बहिर्ध्वान्तस्य तुल्यमिदमनन्तरोक्तं तमः। कथम्? दृष्टिरोधितया हेयोपादेयदर्शनविबन्धकत्वेन हेतुना। अन्यैः दृष्टिरोधितायाः सकाशात् भिन्नैः अरत्नालोकसंहार्यत्वादिभिर्धर्मैः हेतुभूतैः भिन्नं विलक्षणं तमोजातेरित्युत्प्रेक्ष्यते। अदर्शि यद् दर्शितमुक्तम्। तस्मात् स्वजातिव्यतिरेकोऽयमीदृशः। तस्याः तमोजातेः प्रसिद्धायाः कथञ्चिद् व्यतिरिक्तत्वाद् एवंविधस्य तमस इति॥

॥ इति व्यतिरेकचक्रम् ॥

विभावनामुद्भावयन्नाह–

## हृदयङ्गमा

पूर्वत्रेति।–पूर्व्वत्र पूर्वस्मिन् त्वन्मुखमित्यत्र उदाहरणे, शब्दवत्साम्यं शब्दयुक्तसादृश्यं, फुल्ले सुरभिगन्धिनी इति शब्दाभ्यां मुखपद्मयोः साम्यं विहितम् अतः शब्दोपादानसादृश्योऽयं व्यतिरेक इति भावः। उभयत्र त्वन्मुखमित्यादौ चन्द्रोऽयमित्यादौ च श्लोकद्वयेऽपीत्यर्थः, तुल्यं कृष्णत्वादिना स्वच्छत्वादिना च गम्यसाम्यं, भृङ्गनेत्रादि भ्रमदभ्रमरत्व लोलनेत्रत्वादिकम्, (आदिना वियदम्भसोरपि ग्रहणं), तच्च भेदकं उपमानोपमेययोरुत्कर्षापकर्षप्रतिपादनार्थं भिन्नत्वाधायकम्। तत् तस्मात्, सदृशव्यतिरेकता, अस्येति शेषः॥१९६॥

## प्रभा

पूर्वोदाहृतशब्दोपात्तसादृश्यं सदृशव्यतिरेकोदाहरणं व्याचष्टे- **पूर्वत्रेति** पूर्वत्र त्वन्मुखमित्युदाहरणे। शब्दवत् शब्दः समानधर्मवाचकः शब्दः सोऽस्मिन्नस्ति इति शब्दवत्। साम्यं फुल्लत्वादिकमस्ति। उभयत्रापि शब्दोपात्तप्रतीयमान-सादृश्यद्वयोदाहरणेपि। वैधर्म्यप्रतिपादकं भृङ्गनेत्रादि आदिशब्देन अम्बरतोयनक्षत्रकुमुदानां संग्रहः। तुल्यम्। भ्रमल्लोलेति भिन्नशब्दाभ्यां प्रतिपादितस्यापि वस्तुतोभिन्नस्य चाञ्चल्यस्य उभयत्र विद्यमानत्वात् तयोस्तुल्यता। तथा अम्बरतोययोः शौक्ल्यादिना नक्षत्रकुमुदयोर्मनोहराकारत्वेन च सादृश्यं ज्ञेयम्। तत् तस्मात् भेदकयोः सादृश्यात् सदृशव्यतिरेकता बोद्धव्या।।१९६।।

## विवृति

स्वयं व्याचष्टे-

प्रतीयमानसौक्ष्म्यादिसाम्ययोर्वियदम्भसोः भेदः कृतः परस्परवैलक्षण्यं कृतम्, तथा प्रतीतशुद्ध्योश्च चन्द्रहंसयोरस्मिन् भेदः कृत इति। प्रतीयमानं शब्देनानुपात्तं सौक्ष्म्यादिना साम्यं समता ययोस्ते प्रतीयमानसौक्ष्म्यादिसाम्ये वियदम्भसी तयोरस्मिन् भेदः नभसस्तावको याव(स्तावत्तोया)व्यातिरेको नक्षत्रमालीत्यनेन शब्देन, पयसश्च हस्तो (नभसो)व्यतिरेकः उत्कुमुदमित्यनेन चन्द्रोयमम्बरोत्तंस इत्यनेन हंसाच्चन्द्रस्य व्यतिरेकः। 'हंसोऽयं तोयभूषण' मित्यनेन हंसस्य चन्द्राव्द्यतिरेक इति। कथंभूतयोः। प्रतीता शब्देनानुपात्ता शुद्धिर्धावल्यं ययोरिति।

'त्वन्मुखं पुण्डरीकं चे' त्यादौ शब्दवत् साम्यम् 'फुल्ले सुरभिगन्धिनी' इत्युभयोरुपादानात् सादृश्यमुक्तं तस्योभयत्र भेदकं भृङ्गनेत्रादि भ्रमद्भ्रमरमम्भोजमिति तथा लोलदृष्टिमुखं तवेति 'तुल्यं तच्च भृङ्गनेत्राद्यन्योन्यसदृशमिति। तस्मात् सदृशव्यतिरेकता (इति 'स)दृशव्यतिरेकश्च पुनरन्यः प्रदर्श्यत' इति यदुक्तं तदुपसंहृतम्।।

पूर्वार्धे चन्द्रहंसयोः प्रतीतशुद्ध्योः उत्तरार्धे प्रतीयमानसौक्ष्म्यादिसाम्यधर्मयोः वियदम्भसोश्च, वियदम्भोभ्यां नक्षत्रकुमुदाभ्यां च प्रतीयमानसादृश्याभ्यां, व्यतिरेकः कृतः।।

व्याकृतमर्थं अनेन प्रतिपादयति प्रतीयमानेति। पूर्वं निर्दिष्टेन चन्द्रोऽयमिति श्लोकेन प्रतीयमानसौक्ष्म्यादिसाम्ययोः नभस्सलिलयोः भेदः प्रतीयमानवैमल्यो चन्द्रहंसौ अधिकृत्य दर्शितः। **पूर्वत्र**–शब्दोपात्तसादृश्ये; इति शब्दवत्साम्यम्। त्वन्मुखमित्यादौ **उभयत्रापि**–मुखे पुण्डरीके च–फुल्लत्वसुरभिगन्धित्वे साधारणे, भेदके तु भृङ्गनेत्रे, तद्धर्मौ भ्रमणलौल्ये तुल्ये, इत्याह–भेदकं भृङ्गेति। आदिशब्देन भ्रमणलौल्ये गृह्येते। उपसंहरति–**तत् सदृशव्यतिरेकता** इति।।१९५–१९६।।







# ALL MAHAPURANAS

Text with Shloka Index & Introduction

**Agni Mahapurana**
664 pp 450.00

**Bhagavata Mahapurana-**
4vols 2304 pp Set 1500.00

**Bhavishya Mahapurana**
3vols 1400 pp Set 1200.00

**Brahma Mahapurana**
728 pp 450.00

**Devi Bhagavata Mahapurana**
1154 pp 800.00

**Ganesha Purana**
832 pp 1993 450.00

**Garuda Mahapurana**
668 pp 400.00

**Harivansha Purana**
मूल, हिन्दी अनुवाद तथा श्लोकानुक्रमणी सहित
1802 pp 2vols set 900.00

**Kurma Mahapuran**
298 pp 300.00

**Linga Mahapurana**
774 pp 400.00

**Markandeya Mahapurana**
मूल, हिन्दी अनुवाद तथा श्लोकानुक्रमणी सहित
828 pp 450.00

**Narada Mahapurana**
932 pp 600.00

**Padma Mahapurana**
2381pp 4vols set 1600.00

**Shiva Mahapurana**
1504 pp 2vols set 900.00

**Shiva Mahapurana** (Small Type)
412 pp 400.00

**Skanda Mahapurana**
5600 pp 8 vols set 4000.00

**Skanda Mahapurana** (small type)
1452 pp 3vols set 1500.00

**Vamana Mahapurana**
472 pp 400.00

**Vayu Mahapurana**
540 pp 400.00

**Vishnudharmottara Mahapurana**
1246 pp 900.00

**Vishnu Mahapurana-with two commentaries**
680 pp 500.00

**विष्णुमहापुराण**
मूल, हिन्दी अनुवाद तथा श्लोकानुक्रमणी सहित
—डा० श्रद्धा शुक्ला
2 vols Press

**Maha Bhagavat Devipurana**
Press

**Ekamara Purana**
490 pp 150.00

**Kalki Purana**
316pp 120.00

**Kuber Purana** (Text With Study) Press

**Narasimha Purana**
380 pp 100.00

**Saura Purana**
290 pp 100.00

**Srimadbhargavopapuranam**
—Brijesh Kumar Shukla
pp 348 Rs. 124.00

**Vasuki Purana**
260 pp 100.00

**Ashtadasha Purana Darpana Contents of 18 Puranas**
432 pp 180.00

## PURANAS WITH TEXT, TRANS & NOTES IN ENGLISH VERSWISE

**Vishnu Purana**—*H.H. Wilson*
1065 pp 2 vols Set 500.00

**Matsya Purana**—*N.S. Singh*
1252 pp 2 vols 500.00

**Narasimha Purana** —*Dr.S.Jena*
750 pp 400.00

**Kalika Purana**
*Prof. Biswanarayan Shastri*
1770 pp 3vols set 900.00



**NAG PUBLISHERS**
11/A (UA) Jawahar Nagar, Delhi - 110007 (INDIA)